सामान्यनिरुक्तिगादाधरी पत्रिका ।

विविधबिरुदावलीविराजित मानोन्नत द्विजराज काशीराज

श्रीमन्महाराज आदित्यनारायण सिंहशर्म्म

बाहादुराश्रित

श्रीश्यामाकान्त तर्कपञ्चाननेन

सम्पादिता प्रकाशिता च

श्रीयुक्त मधुसूदन तर्कतीर्थ

श्रीयुक्त सतीन्द्रनाथ तर्कतीर्थाभ्यां

परिशोधिता ।

सन् १९३२ ई०

मूल्यमाणकाष्टकम् ।

बिबिधबिरुदावलीबिराजित मानोन्नत द्विजराज

काशीराज श्रीमन्महाराज आदित्यनारायण

सिंहशर्म्म बाहादुर वीरपुंगव महोदय

करकमले समर्पितोऽयं ग्रन्थः

श्रीश्यामाकान्त भट्टाचार्य्येण ।

निवेदनम् ।

—:o:—

विदितप्रायमेवैत न्नव्यन्यायशास्त्राध्येतॄणां यद्गदाधर विनिर्मित सामान्यनिरुक्तिग्रन्थो व्युत्पत्तिसाधकतया विजिगीषूनां जयसम्पादकतया अत्युपादेयोवर्त्तते। तस्यच श्रीराम गोलक चन्द्रनारायण कालीशंकरादिभिः वहुभावनाभिः कृताः पत्रिकाः प्रचलन्तिस्म तासां विस्तारेण विद्यार्थिनां आयत्ती करणे दुःखप्रदा एव ता आसन्, इत्याकलय्य सुप्रसिद्ध विचाररसिक न्यायकेशरि जयनारायण तर्करत्नेन संक्षिप्य वहुभिर्नूतनोद्भावितैः कथानकैः संयोजिता एका पत्रिका निरमायि साच तच्छात्र परम्परया प्रचरति। तां तर्करत्न मुखादुपश्रुत्य तच्छात्र यामिनीनाथ लिखितां पत्रिकाञ्च विलोक्य मया संकलिता, सेयं वहुभिः पण्डितैः विद्यार्थिभिश्च मत्तः संगृहीता इति भूयाभूयस्तेषामादरातिशयदर्शनेन उत्साहितः तां सर्वेषां दृग्गोचरी कर्त्तुं प्रयत्नमकरवम् तत्र श्रीमत् सतीन्द्रनाथतर्कतीर्थ श्रीमनमधुसूदनतर्कतीर्थौ लेखन कार्य संपादनेन परिशोधनेन च साहाय्यमकुरुतां तयोर्यत्नाति-शयमन्तरा ग्रन्थसंपादनं दुष्करमेवासीत् इति तौ भूयोभूयः

स्नेहाशिषा संवर्द्धयामि । यदत्र गुणलेशोविद्यते स गुरुपादानाम् दोषास्तुममैव । दीर्घकालालोचना विरहितस्य मम प्रतिपदमेव च्युति सम्भावना विद्यत एव इति । अध्येतॄणामध्यापकानाञ्च सविधे प्रार्थयामि यत् क्षमा र्होऽयं दीनसम्पादक इति ।

श्रीश्यामाकान्त तर्कपञ्चाननस्य,

४८ नं०	सोनारपुरा काशी
नूतन ५३ नं०	वास्तव्यस्य ।

नमो गणेशाय ।

सामान्यनिरुक्तिगादाधरी पत्रिका ।

एतावता प्रबन्धेनेति शिरोमणिः । तृतीयाया अभेदोऽर्थः, निरूप्येति क्रियाया विशेषणत्वेऽपि नामधेयस्य क्रियाविशेषणत्वे तृतीयापीत्यनुशासनात् तृतीया । क्रियाविशेषणस्य द्वितीयान्तस्य तृतीयान्तस्य वा सर्वत्रैवाभेदो विभक्तेरर्थः, द्वितीयार्थाभेदस्य सम्बन्धविधया तृतीयार्थस्य च प्रकारविधया भानमात्रं ॥ १ ॥

निरूप्यन्ते इत्यत्र ज्ञानानुकूलव्यापारो धात्वर्थः । लट्प्रत्ययस्याव्यहितोत्तरकालीनत्व मर्थः । मयेति कृतिसाध्यत्वरूपतृतीयार्थस्य व्यापारान्वये ऽपि उत्तरकालवृत्तितायां कृतिसाध्यत्वप्रकारकोदीच्यो मानसो बोध इति । न प्रतिजानीते इत्यनेन भिन्नार्थता । हेत्वाभासेषु याचितमण्डनन्यायेन तादृशज्ञानानुकूलव्यापारविषयतान्वय इति प्राचीनाः । रूपधातो र्बोधे व्यापारे च शक्तिः । ततो बोधविषयता मादाय- अन्वय इति खण्डशक्तिवादिनो वैयाकरणाः । गदाधरमते व्यापार एव धात्वर्थः । फलं कर्म्मप्रत्ययेन बोध्यते, अथवा तादृशज्ञानानुकूलव्यापारो धात्वर्थः, फलं कर्म्मप्रत्ययार्थ एतन्मते फलस्यद्विधाप्रवेश इति प्रथमकल्पएव प्रथमः ॥ २ ॥

हेत्वाभासेति, हेत्वाभासनिरूपणप्रयोजकतावच्छेदकं संगतित्वं प्रसंगवृत्ति व्याप्ति पक्षधर्म्मताविशिष्ट हेतुनिरूपणकालीन व्याप्तिपक्षधर्म्मतावत् हेतुविशिष्टदुष्टहेतुस्मरणात् दुष्टहेतौ तादृशवैशिष्ट्यं च स्ववृत्तिधर्म्मविरोधिधर्म्मवत्त्वसम्बन्धेन । स्वविषयतातच्छेदकत्वघटितसामानाधिकरण्यं हेतुतावच्छेदकसम्बन्धः । मूले विरोधि .दं वैशिष्ट्यव्यासज्यवृत्तिधर्म्मानवच्छिन्नाभाव लाभार्थंस्वरूपसम्बन्धेन तद्विरहलाभार्थं वा ॥ ३ ॥

सपरिकरं हेतुं निरूप्येत्यत्रासमस्ततत् पदेन तदाभासे त्यत्र शुद्धहेतो र्ग्रहणे तात्पर्य्यं । अथ दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ इत्यादाविवसमस्तै कदेशेप्यन्वय सम्भवात्कथं भिन्नविभक्त्या निर्देश इतिचे न्न तत्पदस्य बुद्धिविषयतावच्छेदकत्वोपलक्षितधर्म्मावच्छिन्ने शक्तिः तथा च समस्तपदजन्यपदार्थैकदेशस्यान्वयवाधात् हेतो बौधान्तरं, तत्पदस्य च तादृशार्थबोधकतेति प्रयत्नसाध्यं तादृशं इत्यतोऽसमस्त निर्देशः ॥ ४ ॥

मूलोक्तस्याथशब्दस्य निरूप्येत्यन्त मर्थ मभिधाय सा मञ्जस्यकरणात् मूलवाक्यनिष्टन्यूनतापरिहार सामार्थ्यं शिरोमणेः ॥ ५ ॥

परिकरशब्दस्य यथाश्रुतार्थः व्याप्तिः पक्षधर्मताचान्यथा एकेणैव सामाञ्जस्यात् पक्षधर्म्मतान्तानुसरणं वृथैव ॥ ६ ॥

उक्तक्रमेण दुष्ट हेतोः स्मृतत्वस्य प्रसंगनिर्वाहकस्य लाभायेति भ-ठी । नचात्र उत्पत्तिकालावच्छिन्नोघटो

गन्धवान् पृथिवीत्वादित्यादौ हेतौ व्याप्ति धर्म्मतासत्वात् तस्योक्तक्रमेण स्मृतत्वानुपपत्या संगतिविरहान्निरूपण मसंगत मिति वाच्यं ? निरूप्यतावच्छेदकावच्छेदेन संगति सत्वस्याप्रयोजकतया तत्सामानाधिकरण्येन संगति सत्वेऽपि निरूपणोपपत्ते रिति, जगदीशस्तु परिकरः सहकारी स च व्याप्तिपक्षधर्म्मत्वादिः इति व्याख्यानस्वरसेन वाधनिश्चयादिक मप्यादिपदेन संगृहीतवान् ॥ ७ ॥

तत्त्वनिर्णयपदोपादानेनैव एककार्य्यानुकूलत्वरूपसंगतेर्लाभसम्भवे विजयपर्य्यन्तानुसरणं वादजल्पभेदेन प्रयोजनप्रदर्शनार्थं। गुरुशिष्ययोः कथा वादः। विजीगीषुद्वयस्य कथा जल्पः। तत्वनिर्णयः प्रमितकोटिनिश्चय इत्यर्थकरणेनैव चरितार्थतायां अथवेति कल्पान्तरानुसरणं तत्वं ब्रह्मणि याथार्थ्येइति यथाश्रुतार्थाभिप्रायेण ॥ ८ ॥

तथाचेय मनुमितिः प्रमा स्वविषयीभुतसाध्यव्याप्तिपक्षधर्म्मताविशिष्टहेतुज्ञानजन्यत्वात्। इदं ज्ञान मप्रमा स्वविषयीभूतसाध्यव्याप्तिपक्षधर्म्मत्वाभावविशिष्टप्रकृतहेतु विषयकत्वे सति स्वीयसाध्यविषयतानिरूपितव्याप्तिविषयत्वादिनिरुपित प्रकृतहेतुविषयकत्वा दिति द्विविध मनुमानं प्रथमं कल्पद्वये समानं, द्वितीयं प्रमितकोटिनिश्चयकल्प एव ॥ ९ ॥

इदं ज्ञान मप्रमा स्वविरोध्यनुमितिजनकहेत्वदुष्टत्वकालीनत्वा दिति रीत्योपयोगिनो ऽप्रामाण्यग्रहे विपरीतहेत्वदुष्टत्वग्रहस्य प्रतिवन्धको दुष्टत्वग्रह इति तस्य—प्रामाण्यग्रहे

परम्परया प्रयोजकत्वं । पराहंकारखण्डनं विजयः । अहंकार आह मस्मा दुत्कृष्ट इतिज्ञानजन्यसंस्कारः, तन्नाशानुकुलव्यापारी विजयः ॥ १० ॥

अनुमितित्वव्यापकप्रतिवध्यतानिरुपितप्रतिवन्धकताशालियथार्थज्ञानविषयत्वं हेत्वाभासत्व मित्यनेनैवसामञ्जस्ये अनुमितिकारणीभुताभावप्रतियोगियथार्थज्ञानविषयत्व मिति कथ मुक्त मिति चेन्न, प्रतिवन्धकत्वं नाम द्विविधं कारणीभूताभावप्रतियोगित्वं । कार्य्यानुत्पादप्रयोजकत्वं चेति । तत्राद्ये पृथक्प्रतिवन्धकत्वपरिचयस्य प्रयोजनविरह मंगीकृत्योक्तत्वात् ॥ ११ ॥

अनुमितिनिष्ठकार्य्यतानिरुपितकारणतावदभावप्रतियोगियथार्थज्ञानविषयत्व मर्थः । अत्र कार्य्यतापदानुपादाने अनुमित्यभावविषयकप्रत्यक्षत्वावछिन्नं प्रति अनुमित्यभावस्य तादात्म्येन हेतुत्वमिति मते अनुमितिनिष्ठा या प्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकता तन्निरुपिता या अनुमित्यभावनिष्ठकारणता तदाश्रयो यो ऽनुमित्यभावः तत्प्रतियोगि यत् अनुमित्यात्मकं यथार्थज्ञानं तद्विषये वह्निमत् पर्वते अतिव्याप्तिरिति तदुपादानं ॥ १२ ॥

अथात्र कारणतापदविरहे अनुमितिनिष्ठकार्य्यत्वनिरुपितकार्य्यत्वाभावत्वावच्छिन्ना या प्रतियोगिता तदाश्रयकार्य्यत्वाभावप्रतियोगियथार्थज्ञानविषये वह्निमत्पर्वते ऽतिव्याप्ति

कार्य्यत्वं कार्य्यस्वरुपमितिमत माश्रित्य इति ध्येयं ॥ १३ ॥

षष्ठीसमास माश्रित्त परामर्शविषये वह्निव्याप्यधुमवत्-पवर्वतेऽतिव्याप्ति रिति भूतपदं कर्म्मधारयसमासलाभार्थं ॥१४॥

अभावपदानुपादाने अनुमितिनिष्ठकार्य्यतानिरुपितकारणताश्रयपरामर्शप्रतियोगिव्याप्तिज्ञानविषये वह्निव्याप्यधूमवत्-पवर्वते अतिव्याप्तिः। व्याप्तिज्ञानस्य कारणत्वमते तस्य परामर्शवत्त्वसम्बन्धेन तथात्वात् परामर्शरुपसम्बन्धप्रतियोगित्व मिति ॥ १५ ॥

मूलोक्त लक्षणानां दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः। यथार्थज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयताश्रयत्वपर्य-न्तस्य समूहालम्बनविषयताश्रयोदासीनपदार्थवारणाय प्रथम-लक्षणे विवक्षणीयतया बाधादिज्ञानप्रतिबन्धकतायां प्रायशोहेतु-विषयताया अनवच्छेदकत्वात् तत्रहेतावव्याप्तिश्चेति भटी।— अथेदृशविवक्षाया मपि उदासीने ऽतिव्याप्ति रपरिहार्य्यैव। वह्नयभावजलोभयवान् ह्रद इतिज्ञानीयोभयत्वावच्छिन्नाया उभयनिष्ठाया एकस्याः प्रकारताया स्तादृशप्रतिबन्धकतावच्छे-दकत्वस्यावश्यं वक्तव्यतया उदासीनस्यापि जलस्य प्रतिबन्ध-कतावच्छेदकीभूत विषयताश्रयत्वात। एवमुक्तरीत्या ऽसङ्कीर्ण-बाधादिस्थलीयहेता वव्याप्तिरपिनघटते इति चेन्न,— तादृश-प्रतिबन्धकतानवच्छेदकीभूतकिञ्चिदवच्छिन्नविषयता शून्ययथा-र्थज्ञानीय विषयताश्रयत्वस्य विवक्षितत्वात्। तथाचो क्तज्ञान-निष्ठोभयत्वनिष्ठविषयताया स्तादृश प्रतिबन्धकतानवच्छेदकी

भूताया निरूपकत्वा न्न लक्षणघटकत्वं। वह्न्यभाववद्ध्रद इत्यादा वपि वह्नित्वनिष्ठ निरवच्छिन्न प्रकारताया अवच्छेदकत्व विरहेणासंग्रहप्रसङ्ग वारणाय किञ्चिदवच्छिन्नेति विषयता-विशेषणं। वह्नित्व निष्ठावच्छेदकताख्य विषयताया अवच्छेद कत्वकल्पनेनैवाभिप्रायसिद्ध्यातन्निष्ठ प्रकारताया स्तथात्वकल्पने मानाभावात्।

न्यायरत्नपादास्तु, अनुमितित्वव्यापकप्रतिवध्यतानिरूपित-प्रतिवन्धकतावच्छेदकीभूता या व्यासज्यवृत्तिधर्म्मानवच्छिन्न-विषयतातदाश्रयत्व मिति वाधादौ समूहालम्वनहेतुविषयता मादाय लक्षणसमन्वयः यादृशस्थले हेतु विषयता, व्यासज्य-वृत्तिधर्म्मावच्छिन्ना भवति तत्रत्याव्याप्ति रादिपदा दिष्टैवेति। पूर्व्वकल्पे अवच्छेदकपदव्यावृत्ति र्न भवतीति ॥ १६ ॥

वाधादीत्यत्रा दिपदेन वह्निमत्शिखरावच्छिन्नपर्व्वतो वह्निमात् धुमादि त्यादौ वह्न्यभाववच्छिखरावच्छिन्नपर्व्वत-रूपाश्रयासिद्धिपरिग्रहः। ह्रदो वह्निमान् ह्रदा दित्यादौ हेतु-विषयताया अवच्छेदकत्वात् प्रायश इति। तत्रेत्य सङ्कीर्णवाधा-दिस्थलीय हेतौ अव्याप्तिरित्यर्थः। अन्यत्र दोषान्तर मादाय दुष्टत्वव्यवहार इति। नचोत्पत्तिकालीनघटो गन्धवान् पृथिवीत्वा दित्यातौ गन्धाभाववान् उत्पत्तिकालीनघट इत्याकारकवाधवत् गन्धाभावव्याप्य पृथिवीत्ववान् उत्पत्तिकालीनघट इत्याकारक सत्प्रतिपक्षस्यापि सम्भवेन तद्घटकीभूतहेतुविषयताया

अवच्छेदकत्वा न्नाव्याप्ति रिति वाच्यं । साध्याभाववद्वृत्तित्व-रूपाव्याप्तिः तथाचनिरवच्छिन्नाधिकरणताया अप्रसिद्धत्वात् व्याप्ते रसत्वात् । नच प्रतिहेतुव्यापक साध्याभावसमानाधि-करण प्रतिहेतुमत् पक्षरूपसत्प्रति पक्ष इतिवाच्यं तादृशसत्प्रति-पक्षे मानाभात् । वस्तुतस्तुविषयविरोध एव ज्ञानस्य विरोधित्वं तेन नात्र सत्प्रतिपक्ष सम्भावना द्वितीयक्षणे घटे गन्धस्य गन्धाभावव्याप्यपृथिवीत्वस्य च सत्त्वेन विषयविरोधविरहात्। एकावच्छेदेनैकत्र सत्त्ववतो विंषययो विंरोधस्याननुभवि कत्वादिति ॥ १७ ॥

अन्यविधव्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्व सम्भवे ऽपि ते चे त्यादिना दुष्टहेतूना मेव विभजना दित्यादि भ-टी—॥ अन्यविधव्युत्पत्ति स्तु हेतो राभासा इति ॥ अथात्रदुषणान्तरं किमित्युपात्त मिति चेन्न तेचेत्यादिना ग्रन्थस्थ भावपरनिर्देशेन दोषविभाजकत्वेनैव सामञ्जस्यात् ॥ १८ ॥

अनुमितिपदस्या नुमितिसामान्य परत्वे ऽतिप्रसङ्गात् । अनुमितिपदस्य प्रकृत पक्षसाध्यहेतुकानुमितिसामान्यपरत्व मावश्यकं तथाच व्यभिचारादा वव्याप्ति रिति भटी—॥ यत् किञ्चि दनुमिति परत्वे ऽतिप्रसङ्गात् सामान्यपरत्वे ऽसम्भवा-दित्यर्थः क्वचि त्तथैव पाठः । अथवा सामान्यपदं नव्याप-कत्वार्थकं अपितु तादृशानुमितित्व जात्यच्छिन्नपरं । तद्धेतु-धर्म्मिक व्याप्ति ज्ञानोत्तर जातानुमितिं प्रति, तद्धेतु धर्मिक

व्यभिचार ज्ञानं प्रतिवन्धक मिति प्राचीनमत मनुसृत्य व्यभिचा राव्याप्तिवारकं प्रकृत हेतुकत्व पदं ।

नव्यमते पुनर्ग्राह्याभावानवगाहितयाव्यभिचारज्ञानस्या प्रतिवन्धकत्वात् तत्राव्याप्तिराशङ्कितेतिसन्दर्भसङ्गतिः। वस्तुतस्तु वह्निव्याप्यमहानसीयवह्नीतरवह्न्यभाववत्पर्व्वतकालीन धूमवान् पर्व्वत इतिपरामर्शोत्तराजातेतरवाधसहकृतवह्निसाध्यकमहानसीयवह्निप्रकारकानुमितिस्थले प्रकृतपक्षसाध्यकानुमितिसामान्यान्तर्गतायां पर्व्वतो वह्निमान् इत्यनुमितौ प्रतिवध्यताविरहेण महानसीय वह्न्यभाववान् पर्व्वत इत्याकारकवाधे प्रसजन्त्या अव्याप्ते र्व्वारणाय प्रकृतहेतुकत्वपदं प्रकृतहेतुज्ञानाव्यवहितोत्तर जायमानत्वं प्रकृत हेतुकत्वं इति तदुपादाने चात्र प्रकृतहेतुज्ञानोत्तरं महानसीयवह्निप्रकारिकैवानुमिति रितिनाव्याप्तिशङ्का। नचतथाप्युक्तएव परमर्शो यदा महानसीय वह्न्यभाववत् पर्व्वत विषयः समूहालम्वन स्तदा तदुत्तरजायमान वह्निसाध्यकानुमिते र्महानसीय वह्निप्रकारकत्वासम्भवेन तद्दोषतादवस्थ्यमेवेति निरर्थक मेतदितिवाच्यं। पूर्व्वोक्तपरामर्शोत्तरजातानुमितिस्थलीयवाधाव्याप्तिवारकत्वमात्रेणपि तस्य सार्थक्य सम्भवात् अणु रपि विशेषो ऽध्यवसाय इति। यद्धर्म्मिकयादृशधर्म्मावच्छिन्नव्याप्यवत्त्वनिश्चयोत्तरं यदनुमितिः तद्धर्म्मिकतादृशधर्म्मावच्छिन्नघटितयद्विशेष धर्म्मावच्छिन्नेतरवाधनिश्चयः तद्विशेष धर्म्मावच्छिन्नप्रकारकत्वं तदनुमितेरिति नियमः।

केचित्तु ह्रदो वह्निमान् जला दित्यादिस्थलीयवह्निव्यापकी-भूताभावप्रतियोगिजलादिरूपासाधारण्यादा वव्याप्तिः, जलवान् ह्रद इतिनिश्चयाव्यवहितोत्तरजायमानह्रदो वह्निमानित्यादिबुद्धिं प्रत्येव वह्निव्यापकीभूताभावप्रतियोगिजल मित्यादिनिश्चयत्वेनैव प्रतिवन्धकत्वमते वह्निव्यापकीभूताभावप्रतियोगि जल मित्यादि निश्चयस्य प्रकृतपक्षकप्रकृतसाध्यकशैवालवान् ह्रद इत्यादिनिश्च-याव्यवहितोत्तरजायमानह्रदो वह्निमान् इत्याद्यनुमित्यविरो-धित्वात्। प्रकृतहेतुकत्वनिवेशेच पक्षे हेतुमत्त्वनिश्चयाव्यवहि-तोत्तरजायमानपक्षःसाध्यवानित्याकारिकाया एवानुमिते र्लाभा न्नाव्याप्ति रित्याहुः॥ अन्येतु पुनः—हेतुप्रकारार्थकं हेतुकत्वपदं, तथाच पक्षः साध्यवान् हेतुमांश्चेति समूहालम्बना नुमिते र्लक्षणघटकत्व मिति व्याख्याय स्वरूपासिद्धाव्याप्तिवारण प्रयोजन माहु स्तच्चिन्त्यं हेतुपदस्यैतादृशार्थकस्य कदाप्य दर्शनादिति॥ १६॥

अनुमितिनिष्ठकार्य्यतासाक्षात्कारजनकसाक्षात्कारविष-यतात्मकनिरूपकत्वस्य लाभायेति भ-टी—॥ अत्रद्वितीय साक्षात्कारपदानुपादाने पर्व्वतो वह्निमानित्यनुमितित्वेन घटवद्भूतलावगाहिज्ञानसाक्षात्कारस्यापि तादृशसाक्षात्कार जनकत्वात् तद्विषयघटवद्भूतलविषयकज्ञाननिष्ठप्रतिवध्यतानि-रूपितप्रतिवन्धकताशालियथार्थज्ञानविषये घटाभाववद्भूतले ऽतिव्याप्तिः तदुपादानेच यद्रूपावच्छिन्न विषयताशालिसाक्षात्

कारत्वव्यापकं कार्य्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपति- जनकत्वं तद्रूपावच्छिन्नविषयताश्रयेत्यादि कोऽर्थः, तथाच नातिव्याप्तिसम्भवः, कार्य्यतासाक्षात्कारत्वावच्छिन्नजन्यतानि- रूपितजनकतावच्छेदकविषयताश्रयनिष्ठप्रतिवध्यतेव्युक्तौ तत्रै- वातिव्याप्तेः ॥

अस्यानुगमस्तु प्रकृतानुमितित्वावच्छिन्नकार्य्यतासाक्षात्- कारत्वावच्छिन्नजन्यतानिरूपितजनकतावृत्तिरूपाश्रयेत्यादि । वृ- त्तित्वं स्वावच्छिन्नविषयताशालिसाक्षातकारत्वव्यापकत्व सम्बन्धेन ॥ २० ॥

अत्र प्रथमसाक्षात्कारपदानुपादाने ऽनुमतिः पर्व्वतपक्ष- कवह्निसाध्यककधूमहेतुकानुमितित्वावच्छिन्नकार्य्यतावती (ता- दृशानुमित्यनुयोगिककालिकेन) घटवद्भूतलविषयकज्ञाना दिव्याकारिका या प्रकृतपक्षसाध्यहेतुकानुमितित्वावच्छिन्न कार्य्यताविषयकानुमितिः तज्जनको यः कार्य्यत्वव्याप्यघटवद्- भूतलविषयकज्ञानवती अनुमिति रित्याकारकपरामर्शः अलौकिकसाक्षात्कारात्मकः किम्वा कार्य्यत्वव्याप्यघटवद्भू- तलविषयकज्ञानवानहं इत्याकारकं यललौकिकसन्निकर्षजन्यसा- क्षात्कारात्मकं व्याप्तिज्ञानं तद्विषयतावत्यद्घटवद्भूतल- विषयकज्ञानं तन्निष्ठप्रतिवध्यतानिरूपितप्रतिवन्धकताशालि— यथार्थज्ञानं यद्घटाभाववद्भूतलविषयकं—तद्विषये घटा- भाववद्भूतले पर्व्वतपक्षकवह्निसाध्यकधुमहेतुकस्थले दोषताप्रसङ्ग स्यादिति ॥

वस्तुतस्तु यत् पक्षकयत्साध्यकानुमितित्वावच्छिन्नकार्य्यतासाक्षात्कारो नियमतस्तद्व्यक्तित्वेनैव कार्य्यतामवगाहते नतु कदाचिदपिरूपान्तरेण तादृशकार्य्यतासाक्षात्कारस्य विषयितासम्बन्धेन तद्व्यक्ति विशिष्ट साक्षात्कारत्वेनैव जन्यतायाविवक्षणीयत्वेनजन्यतावच्छेदकविषयतायां धर्म्मसम्बन्धसाधारणावच्छेदकत्वस्यनिवेशासम्भवेन (कार्य्यतासाक्षात्कारत्वव्यापकत्व) पर्य्यवसितस्यानस्वव्यापकतत्कत्व तिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य प्रवेशनावश्यकत्वेन प्रथमसाक्षात्कारपदबयावश्यं निवेशनीयत्वात् अन्यथा सम्बन्धिसाक्षात्कार निरूपितजन्यताया ज्ञानेच्छासाधारणकार्य्यतानिरूपितविषयत्वाव्यापकत्वात् असम्भवापत्तेश्च।

ननु द्वितयीसक्षात्कारपदं निरर्थक मिति चेन्न यतोऽत्र कार्य्यतासाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वं न स्वरूपसम्बन्धविशेषः धर्म्मसम्बन्धसाधारणावच्छेदकतात्वस्याननुगततया तन्निवेशासम्भवात् किन्त्वनतिरिक्तवृत्तित्वं। नचात्र तस्या ननुगतत्वे ऽपि धर्म्ममात्रसाधारण मवच्छेदकत्वंनिवेशयितुंशक्यते यतः सम्बन्धिद्वयसाक्षात्कारस्य सम्बन्धसाक्षातकारं प्रति वद्यक्तिनिष्टनिषयताशालिसाक्षात्कारत्वेन एवंच परामर्शनुमितिनिष्ठा या साक्षात्कारविषयता सा, तादृशकार्य्यतासाक्षात्कारजनकतायां धर्म्मविधयैवावच्छेदिकेति नकाप्यनुपपत्तिरितिवाच्यं यत्पक्षक यत् साध्यकानुमितित्वाबच्छिन्नकार्य्यतासाक्षात् कारजनकानुमितिसाक्षात्कारः

तद्व्यक्तित्वेनैवानुमिति मवगाहते नतु कदाचिदपि रूपान्तरेण तदनुमितिसाक्षात्कारस्य तादृशकार्य्यतासाक्षात्कारं प्रति विषयितासम्बन्धेन तद्व्यक्तिविशिष्टसाक्षात्कारत्वेनैव लाघवतो हेतुतया तत्तदनुमितिनिष्ठसाक्षात्कारीयविषयता धर्म्मविधयानवच्छेदकीभुताया निरूक्तनिवेशास्पर्शात् तत्तत्स्थलीय वाधाद्यसंग्रहप्रसङ्गात्।

नच (संसर्गमात्रसाधारणमेवावच्छेदकत्वमिहनिवेशनीयमिति) सर्व्वत्रानुमितिसाक्षात्कारस्य स्वनिष्ठकार्य्यतासाक्षात्कारं प्रति विषयितासन्बन्धेनस्वविशिष्टसाक्षात्कारत्वेन हेतुताहनि न काप्यनुपपत्ति रिति वाहशं उक्तरूपेणा नुमितिसाक्षात्कारस्यकार्य्यतासाक्षात्कारहेतुत्वे घटत्वेनानुमित्यवगाहिनः साक्षात् कारस्या संग्रहतापत्तेः विषयितासम्बन्धेनोक्तसाक्षात्कारस्यानुमितिविशिष्टत्वाभावात् तद्धर्म्मावच्छिन्ननिरूपितस्यैव विषियित्वस्य विषयितात्वेन तद्धर्म्मावच्छिन्न संसर्गतास्वीकारात्। स्वव्यापकतत्कत्वमेवानतिरिक्त वृत्तित्वं वाच्यं, अन्यथा ह्रदो वह्निमान् नित्यनुमितिकालीन पर्व्वतो वह्निमानित्यनुमिमिानहं इत्याकारक साक्षात्कारीया या ह्रदोवह्निमानित्यनुमितिनिष्ठ विषययिताव्यक्तिः तस्याः पर्व्वतपक्षक वह्निसाध्यकानुमितित्वावच्छिन्नकार्य्यतासाक्षात्कारजनकतानतिरिक्तवृत्तित्वेन तदाश्रयोक्तानुमितिप्रतिवन्धकता मादाय पर्व्वते वह्निसाधने वह्न्यभाववद्ध्रदस्यदोषत्वं स्यात्। एवञ्च तादृशकार्य्यतासाक्षात्

कारत्वावच्छिन्नजन्यतानिरुपिजनकता यन्निरूपित विषयता-शालि सक्षात् कारत्वव्यापिका तन्निष्ठिप्रतिवध्यतेत्यादि लक्षणा-र्थलाभावात् द्वितीयसाक्षात्कारानिवेशेऽसम्भवःस्यात्। ज्ञाने च्छानुमित्यादिसाधारणनिरूपितविषयिताव्यापकत्वस्य कार्य्यं तासाक्षात्कारजनकतायामस्सत्वात्। एतेन निष्टत्व सम्बन्धा-वच्छिन्नतादृशकार्य्यतानिष्ठावच्छेदकतानिरूपितविषयत्वनिष्ठाव-च्छेदकतानिरूपकजन्यताप्रवेशेनोक्तकार्य्यताविधेयकानुमितित्वा-वच्छिन्नजन्यतायाः कार्य्यतात्वावच्छिन्नविषयित्वावच्छि-नायाः निष्ठत्वसम्बन्धावच्छिन्नकार्य्यतानिष्ठावच्छेदकतानि-रूपित विषयतानिष्ठावच्छेदकत्वविरहेनोपादातु मशक्यतया तद्वारकं प्रथमसाक्षात्कारपदं व्यर्थ मितिनिरस्तम्॥ २१॥

नन्वनुमि तिनिष्टकार्य्यतासाक्षात्कारविषयतावत्त्वेनानुमि-तितत्कारणपरामर्शयो रमुगमसम्भवेन किंगुरुतरोक्तेन? सत्यं तथासति पर्व्वतोवह्निमानि त्यनुमिमितित्वावच्छिन्नकार्य्यता विषयको घटवद्भूतलविषयकश्च यः समूहालम्वहनो वोधः तद्विषयघटवद्भूतलनिष्टप्रतिवध्यतानिरूपितप्रविन्धकताशालिय-थार्थज्ञानविषये घटाभाववद्भूतले ऽतिव्याप्तिः स्यादतः गुरुतरा-नुसरण मिति॥ २२॥

अथ प्रकृतपक्षसाध्यकानुमितित्वावाच्छिन्नकार्य्यताविषयको ह्रदपक्षकवह्निसा यकानुमितित्वावच्छिन्नकार्य्यताविषयकश्चयःस-मूहालम्बनसाक्षात्कारः तन्निष्ठजन्यतानिरूपितजनकताशालि

साक्षात्कारविषयीभुताया ह्रदोवह्निमानित्यनुमितेः प्रतिवन्धकत्व मादाय पर्वतपक्षकवह्निसाध्यकस्थले वह्न्यभाववद्ध्रदस्य दोषता वारणाय साक्षात्कारीयतादृशकार्य्यताविषयकत्वावच्छिन्नजन्यतापर्य्यन्तं निवेशनीयं। नच तथापि पर्वतपक्षकवह्न्यनुमित्यवगाहिसमूहालम्बनात्मकह्रदपक्षक वह्निसाध्यकानुमितिसाक्षात्कारस्य तादृशकार्य्यतासाक्षात्कारजनकत्वेन तद्विषयीभूतह्रदपक्षकवह्निसाध्यकानुमितिप्रतिवन्धकतामादायपुनरूक्तातिव्याप्तितादवस्थ्य मितिवाच्यं? तादृशकार्य्यताविषयकसाक्षात्का""त्रावच्छिन्नजन्यतानिरूपित जनकतावच्छेदकीभूतसाक्षात्कारायत्निषयताश्रयत्वपर्य्यन्तस्थनिवेशनीयत्वात्। उक्तस्थले च ह्रदो वह्निमानि त्यनुमिते निरुक्तप्रतिवन्धकतावच्छेदकीभूतविषयताशुन्यत्वा ददोष इति॥ २३॥

प्रकृतानुमितित्वव्यापकप्रतिवध्यता प्रकृतानुमितिकारणीभूतज्ञानत्वव्यापकप्रतिवध्यता एतदन्यतरनिरूपितप्रतिवन्धकतानिवेशे गौरवं स्यादिति तन्नोक्तमिति॥ २४॥

स्वप्रतियोगित्वस्वानुयोगित्वोभयसम्वधेन स्वरुपस्वनिरुपितकारणतावत्त्वोभयसम्वन्धेन वा कार्य्यताविशिष्टग्रहत्वव्यापकप्रतिवध्यतानिरूपितप्रतिवन्धकतेत्यादिनिवेशे ह्रदो वह्निमान् धूमादित्यादौ वह्निव्याप्याभाववद्ध्रदे ऽतिव्याप्तिः, न च समूहालम्वनानुमितिघटितकल्पेऽपि ताहशातिव्याप्ति रस्त्येवेति

वाच्यं तत्कल्पे पक्षः साध्यवान् साध्यव्याप्यो हेतुः हेतुमांश्चपक्ष इत्याकारकसमूहालम्बनानुमितिपरत्वात् ॥ २५ ॥

तादृशसाक्षात्कारत्वावच्छिन्नजन्यतानिरूपितसाक्षात्कारनिष्ठजनकताप्रवेशे पूर्व्वोक्तरीत्या पूर्व्वोक्तस्थलेऽतिव्याप्तिः, तादृशसाक्षात्कारत्वावच्चिन्नजनकताप्रवेशेच तत्रैवातिव्याप्तिः। तादृशसाक्षात्कारत्वव्यापकत्वोक्तौ चासम्भवः। तादृशजन्यतानिरूपितयद्रूपावच्चिन्नसाक्षात्कारनिष्ठजनकताप्रवेशे तत्रैवातिव्याप्तिः। यद्रूपावच्छिन्नसाक्षातकारत्वावच्छिन्नजनकताप्रवेशेऽपि तथा—अतः तादृशजनकत्वं यद्रूपावच्छिन्नसाक्षात्कारीयविषयत्वव्यापकं तद्रूपवद्ग्रहनिष्ठप्रतिवध्यत्वं निवेशनीयं ॥२७॥

कल्पस्यास्य प्रकारविधया अनुगमो यथा— तादृशानुमितित्वावच्छिन्न कार्य्यतासाक्षात्कारत्वावच्छिन्न जन्यतानिरूपित जनकतावृत्त्यभावीय प्रतियोगितानिरूपितावच्छेदकतात्वनिष्ठावच्छेदकतानिरूपित प्रतियोगित्वनिष्ठावच्छेदकतानिरूपित भेदनिष्ठावच्छेदकतानिरूपित साक्षात्कारनिष्ठावच्छेदकतानिरूपित विषयत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकत्वनिष्ठावच्छेदकताविशिष्टावच्छेदकता तन्निरूपित धर्म्मिनिष्ठावच्छेदकतानिरूपित वृत्तित्वनिष्ठावच्छेदकतानिरूपित भेदनिष्ठावच्छेदकतानिरूपित प्रतियोगित्वनिष्ठावच्छेदकतानिरूपितावच्छेदकतात्वनिष्ठावच्छेदकताप्रतियोगिताकाभाववत् प्रतिवध्यतानिरूपित प्रतिवन्धकताशालि यथार्थज्ञानविषयत्वं तत्त्वं। एतदुक्तावपि

वह्निव्याप्याभाववद्ध्रदेऽतिव्याप्तिः अवच्छेदकतावैशिष्ट्यं स्वनिरूपितावच्छिन्नत्व सम्वन्धावच्छिन्नावच्छेदकतावच्छेदक-धर्म्मावच्छिन्नसंसर्गतानिरूपित्व स्वावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूप वृत्तित्वोभयसन्धेन, वृत्तित्वंच स्वावच्छेदकतात्वच्छिन्नेसम्वन्धेन ॥ २८ ॥

कल्वान्तरमाह साध्यव्याप्येति गा-टी।

अथ स्वावच्छेदकत्वस्वनिरूपितकारणतावच्छेदकत्वान्य-तरसम्वन्धेन तादृशकार्य्यताविशिष्टं यद् विषयित्वं तदवच्छिन्न-प्रतिवध्यतानिवेशेनैवोपपत्तौ कल्पान्तरानुसरणं किमर्थं ? यतः—परामर्शीयविषयतायाः स्वनिरूपितकारणतावच्छेदकत्व-सम्वन्धेन निरूक्तकार्य्यताविशिष्टतया तदवच्छिन्नप्रतिवध्यता मादाय व्यभिचारादौ प्रकृतपक्षसाध्यकानुमितिविषयतायाश्च स्वावच्छेदकत्वसम्वन्धेन कार्य्यताविशिष्टतया तदवच्छिन्नप्रति-वध्यता मादायच वाधादौ लक्षणसमन्वयो निरपवाद इतिचेन्न साध्यव्याप्यहेतुमत्तापरामर्शाव्यवहितोत्तरत्वावच्छिन्नं प्रति तादृशपरामर्शत्वेन हेतुतया साध्यपक्षोभयवैशिष्ट्यावगाहितायाः कार्य्यतानवच्छेदकतया निरूक्तान्यतरसम्वन्धेन कार्य्यतावि-शिष्टत्वाभावादनुमितिविरोधिज्ञानविषयवाधादावव्याप्तेः। नच घटाद्यनुमित्युपधायकघटादिव्याप्यवत्तापरामर्शकालीन वह्निव्या-प्यवत्तापरामर्शधर्म्मिकानन्ततत्तदप्रामाण्यज्ञानानां तत्तदनन्ता-प्रामाण्यज्ञानाभावविशिष्ट वह्निव्याप्यवत्तापरामर्शजन्यतावच्छे-दककोटौ उत्तेजकत्वायेक्षया लाघवेन वह्निव्याप्यधूमपेरामर्शोत्तर

प्रकृतपक्षसाध्यकानुमितित्वमेव तत्कार्य्यतावच्छेदकं वाच्यं तेन न पूर्व्वोक्तस्थले वह्निव्याप्यवत्त्वपरामर्शोत्तरघटानुमिति-त्वावच्छिन्नस्योत्पादेऽपि प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्न-स्यानुत्पादाद्व्यभिचारः। यदि च प्रकृतपक्षसाध्यकानुमिति-त्वस्यपरामर्शकार्य्यतावच्छेदकत्वेऽपि परामर्शधर्म्मिकाप्रामाण्य-ज्ञानानां परामर्शजन्यतावच्छेदककोटौ अवश्य मुत्तेजकतया निवेशनीयं, अन्यथा यत्राप्रामाण्यज्ञानास्कन्दितवह्निव्याप्यधूम-परामर्शोत्तरं तादृशालोकपरामर्शस्तदुत्तरप्रकृतपक्षसाध्य-कानुमितेर्वह्निव्याप्यधूमपरामर्शाव्यवहितोत्तरतया तत्राप्रामाण्य-ज्ञानानास्कन्दितवह्निव्याप्यधूमवत्तापरामर्शासत्त्वेन कारणासत्त्वे कार्य्यसत्त्वरूपव्यभिचारः स्यादित्युच्यते तथापि तत्तत्स्थलीया-प्रामाण्यज्ञानव्यक्तीनां तादृशपरामर्शकार्य्यतावच्छेदककोटौ प्रवेशेऽपि घटादिव्याप्यवत्तापरामर्शकालीनवह्निव्याप्यवत्ता परामर्शधर्म्मिकतत्तदप्रामाण्यज्ञानानां वह्निव्याप्यवत्तापरामर्श-कार्य्यतावच्छेदककोटौ अनिवेशेन महालाघवादिति वाच्यं साध्यव्याप्त्यभाववति साध्यव्याप्तिप्रकारकं धूमाभाववति धूमप्रकारकं इत्याद्यप्रामाण्यज्ञानानां तादृशज्ञानत्वेनानुगतेन विशेष्यत्वसामानाधिकरण्योभयसम्बन्धेनावच्छिन्नप्रतियोगिता-काभावानां परामर्शजन्यतावच्छेदकशरीरे परामर्शविशेषणतया निवेशनीयत्वादनन्ताप्रामाण्यज्ञाननिवेशगौरवानवकाशेनप्रकृतपक्ष साध्यकानुमितित्वस्यकार्य्यतानवच्छेदकत्वात्। केचित् पुनः विशेषत्वरूपवृत्त्यनियामकसम्बन्धावच्छिन्नाभाव निवेशस्या

वश्यकतया निरुक्तरूपेणा नुगमय्याप्रामाण्यज्ञानाभावनिवेश-मनादृत्य तत्तदप्रामाण्यज्ञानानामेवाभावं निवेशयन्ति। तन्म-तेऽपि खलेकपोतन्यायेन भानस्वीकारस्या वश्यकतया च दोषः स्वीकार्य्य इति विलक्षणः। वस्तुतस्तु—एतन्मतेखलेकपोतन्या-येनभानस्वीकारोदुष्परिहरः। इतिध्येयं॥ २६॥

प्रकृतपक्षतावच्छेदकविशिष्टपक्षकप्रकृतसाध्यतावच्छेद-कावच्छिन्नतद्व्याप्तिविशिष्ट प्रकृतहेतुतावच्छेदकावच्छिन्नप्रकार-कानुमितिसामान्यपरं इति गदाधरः—

पक्षांशे साध्यप्रकारकानुमिते रपि निरुक्तानुमितिसामा-न्यान्तर्गततया तत्रसिद्धेरप्रतिवन्धकत्वेन नसिद्धिविषये वह्नि-मत्पर्व्वतादा वतिव्याप्तिः। साध्यविधेयकानुमितेरेव सिद्धि-प्रतिवध्यत्वादिति॥ ३०॥

तथाच तादृशानुमित्वव्यापकप्रतिवध्यतानिरूपितप्रति-वन्धकताशालियथार्थज्ञानविवयत्वमिति पर्य्यवसितार्थः। एवंच साध्यतावच्छेदकावच्छिन्नादिप्रकारकानुमितिसामान्या-न्तर्गतायां पर्व्वतो वह्निमान् विह्नव्याप्यधूमवां श्चेत्याद्यनुमितौ ह्रदो न वह्निमा नित्यादिनिश्चयस्या प्रतिवन्धकत्वा न्नातिप्रसंग इति भट्टाचार्य्यः—

अथ तथापि किं व्यापकतानिवेशेन? हेतुसाध्यभेदेन हेत्वाभासलक्षणभेदात् यांकाश्चिदितरपदार्थाविषयकनिरुक्त-तादृशसमूहालम्बनानुमितिव्यक्तिमादाय तद्व्यक्तिनिष्ठप्रति-

वध्यतेत्यादिविवक्षरोनैव निर्द्दोषत्वसम्भवा दिति चेन्न यदि ह्रदो वह्निमान् वह्निव्याप्यधूमवां श्चेत्याद्यनुमिते रेवघटवद्भूतल-घटाभाववद्भूतलान्यतरविषयेन नियतं सम्पद्यते नैतयो रन्यतरत् परित्यज्य तदानीं तद्व्यक्तिनिष्ठ प्रतिवध्यतानिरूपित प्रतिवन्ध-कताशालियथार्थज्ञानविषये घटाभाववद्भूतले ऽतिव्याप्त्यापत्तेः। व्यापकत्वनिवेशेच नानयोरेकतरप्रतिवध्यतापितादृशानुमितित्व-व्यापिकेति नदोषः।

अत्र प्रतिवध्यताद्वयं, एका घटत्वावच्छिन्नप्रकारकपर्व्व-तत्वावच्छिन्नविशेष्यकनिश्चयत्वावच्छिन्ना अपराच घटाभाव-त्वावच्छिन्नप्रकारताकपर्व्वतत्वावच्छिन्नविशेष्यताकनिश्चयत्वाव-च्छिन्नेति नैकापि तादृशानुमितित्वव्यापिकेति ॥ ३१ ॥

बाधसत्प्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिष्व व्याप्तिवार-णाय प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनिवेशः इति गदाधरः, जलवां श्च ह्रद इत्याकारकज्ञानसमानकालीन साध्य-व्यापकीभूताभावप्रतियोगिजलं मित्याकारकासाधारणे ऽव्या-प्तिसम्भवे कथंनोक्तमितिचेत्, न लक्षणेऽ स्मिन् तादृशासा-धारण्येऽ व्याप्तिसत्त्वात्।

अनुमितित्वव्यापकप्रतिवन्धकतावच्छेदकयथार्थज्ञानविष-यताश्रयत्वं हेत्वाभासत्व मत्राभिप्रायः। प्रतिवन्धकताया मनुमितित्वव्यापकत्वं च स्वावच्छेदकविषयत्वावच्छिन्नप्रति-वन्धकतानिरूपित प्रतिवध्यतावत्त्वसम्बन्धेन अतोनासाधारण्ये

ऽव्याप्तिः। किञ्चयद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापकोऽनुमित्यप्रतिवन्धकत्वासाधारण्यविषयताशून्यत्वोभयाभाव स्तद्रूपवत्त्वं हेत्वाभासत्व मित्यसाधारणे नाव्याप्तिः ॥ ३२ ॥

अथात्र द्वितीयदलप्रवेशा देवाश्रयासिद्धौ नाव्याप्ति रिति चेन्न सकृन्निवेशाभिप्रायात्। तत्प्रणालीच,—पक्षतावच्छेदकविशिष्टानुमितित्वव्यापकप्रतिवध्यतेत्यादि वैशिष्ट्यञ्च स्वावच्छिन्नविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्न प्रकारताकत्व स्वावच्छिन्नविशेष्यतानिरूपितसाध्यव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारताकत्वोभयसम्वन्धेन।

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितविशेष्यतासाध्यव्याप्यहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपित विशेष्यताद्वये ऽवच्छिन्नत्वसम्वन्धेनपक्षतावच्छेदकस्य सकृत्प्रवेशाभिप्रायेण चतुर्थव्याप्ति र्दत्ता, किञ्च—साध्यतावच्छेदकावच्छिन्नप्रकारताविशिष्टसाध्यव्याप्यहेतुतावच्छेदकावच्छिन्न प्रकारताशाल्यनुमितिपरं। वैशिष्ठ्यञ्च स्वनिरूपकज्ञानीयत्व स्वानिरूपितविशेष्यतावच्छेदकपक्षतावच्छेदकावच्छिन्न विशेष्यतानिरूपितत्वोभयसम्वन्धेन ॥ ३३ ॥

अवच्छेदकत्वं च तत्पर्य्याप्त्यधिकरणत्वं तेनेत्यादि भट्टाचार्य्यः।

पक्षतावच्छेदकतायां न्यूनवारकपर्य्याप्त्यनिवेशे अतेजस्वी पर्व्वतो वह्निमान् धूमादित्यत्र वह्न्यभाववदतेजस्वी पर्व्वत इत्याकारकवाधे काञ्चनमयपर्व्वतो वह्निमान् इत्यत्रकाञ्चनमयत्वाभाव-

वत् स्वतरूपाश्रयासिद्धौ वाव्याप्ति र्दत्ता भट्टाचार्य्येण नच पूर्वोक्तस्थलएवाश्रयासिद्धावव्याप्तिसंभवेस्थलान्तरानुसरणमनर्थकमिति वाच्यम् । पर्व्वतत्वसामानाधिकरण्येन तेजःसामान्याभाववत्त्वस्य निश्चये अवच्छेदावच्छेदेनतेजोवत्त्वस्य निश्चयः प्रतिबन्धक इतिनियमात् अवच्छेदावच्छेदेनतेजस्वित्वनिश्चयो भ्रमात्मक एव तादृशस्थले दोषो नास्तीति स्थलान्तरानुसरणं । नचात्रापि पूर्वोक्तचतुर्षु असाधारण्येचाऽव्याप्ति संभवेकथं बाधाश्रयासिद्ध्योर्द्वयोरेवाव्याप्तिप्रदर्शनमितिवाच्यम् । आद्यन्तयोः कीर्त्तनेन मध्य पतितयोः सत् प्रतिपक्ष स्वरूपासिद्धयोरपि तात्पर्य विषयत्वात् । प्रकृतानुमित्यप्रतिबन्धकत्वाऽसाधारण्य विषयता शून्यत्वोभयाभावो यद्रूपावच्छिन्न विषयताशालिनिश्चयत्वव्यापक इत्यर्थस्य सिद्धान्ते विवक्षणीयतया असाधारण्येऽव्याप्तिविरहाच्च ।

यद्वा प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणप्रतिहेतुमत्पक्षरूपः सतप्रतिपक्ष इहाभिप्रेतः । तथाच स्वावच्छेदकीभूतविषयित्वावच्छिन्न प्रतिबन्धकतानिरूपितप्रतिबध्यतावत्त्वसम्बन्धेन तादृशानुमितित्वव्यापकप्रतिबन्धकतेत्यादिनिवेशेनैव तत्राव्याप्तिविरहात् उक्तसत्प्रतिपक्षनिश्चयस्य ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतया समानाकारज्ञानीयविषयताया ऐक्येन उक्तप्रतिबन्धकतावच्छेदकीभूतप्रतिहेतुव्यापकसाध्याभाव समानाधिकरणप्रतिहेतुमत्त्वावच्छिन्नविषयतायाः वह्निसाध्यकस्थलमात्रएव साम्येन पक्षांश भेदेऽपि निरुक्तसम्बन्धेन

प्रतिबन्धकताया व्यापकत्वस्या व्याहतत्वात् असाधारण्ये प्युक्तरीत्या लक्षणसमन्वयसम्भवेनच, तस्यानुल्लेखः। यत्र यत्रतदभाववत्ताघटित दोषः तत्र तत्रैव तदभावव्याप्यवत्ता-दोषघटिकेतिमते निरुक्तनयेन यत्किञ्चिद्वस्तुव्यापकहेत्वभाव-समानाधिकरण यत् किञ्चिद्वस्तुमत्पक्षइत्यस्यापि ज्ञान-वैशिष्ट्यावच्छिन्नप्रतिबन्धकतावतः स्वरूपासिद्ध्यन्तर्गतत्वात्, तत्रापि निरुक्तरीत्या लक्षणसमन्वयसम्भव इतिस्वरूपासिद्धि-त्वावच्छेदेनाव्याप्तिविरहात् त्तदनुल्लेखः।

एवं हेत्वभाववत्पक्षस्यस्वरूपासिद्धित्वकल्पेऽपि निरुक्त-स्थले गगनादे र्हेतुत्वे अवृत्तिगगनादे रेव पक्षानन्तर्भावेन स्वरूपासिद्धित्वसम्भवात् तत्रलक्षणगमनं निर्विवाद मित्यपि भाव्यं।

नचैवं ह्रदादिमात्रपक्षकस्थले लक्षणगमनात्—बाधत्वा-वच्छेदेनाव्याप्तिविरहेण तदुक्ति रपि सन्दर्भविरुद्धेति वाच्यं प्रदर्शितजातीयस्थलीयबाधत्वावच्छेदेनैवाव्याप्तिसम्भवात् स्व-रूपासिद्धौ तु प्रदर्शितस्थलएवोक्तरीत्या लक्षणगमनात् सन्दर्भसंगति रिति।

अथवा ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतास्थले सामा-नाधिकरण्येन बुद्धि मपि सामानाधिकरण्येन बुद्धिः प्रति-बध्नातीतितर्कग्रन्थीयमथुरानाथलिखनस्वरसपरिप्राप्तमते प्रद-र्शितसत्प्रतिपक्षादिप्रतिबन्धकता निरूपितप्रतिबध्यताया पक्षांशे पर्य्याप्त्यनिवेशेपि निरुक्तानुमितित्वव्यापकत्वघटन-

सम्भवः। प्रदर्शितस्थले अतेजस्विपर्व्वतधर्म्मिकनिरुक्तप्रति-हेतुमत्ताज्ञानस्यापि पर्व्वतमात्रधर्म्मिकवह्न्यनुमितेः प्रतिबन्ध-कत्वसम्भवात् ॥ ३४ ॥

साध्यतावच्छेदकावच्छिन्नस्या प्रवेशे ह्रदो धूमजनक-तेजस्वी वह्निव्याप्यधूमवांश्चेत्यादिसमूहालम्बनानुमिति मादाय पूर्व्वोक्तस्थले ऽव्याप्तिं दत्त्वा भट्टाचार्य्येण अनुमितिघटकधूम-जनकत्वनिवेशनं साध्यमात्रनिष्ठप्रकारताभिप्रायेण। साध्यता-वच्छेदकावच्छिन्नांशे न्यूनवारकपर्य्याप्तिनिवेशश्च पर्व्वतो महा-नसीयवह्निमान् धूमादित्यादौ पर्व्वतो वह्निमान् महानसीय-वह्निव्याप्यधूमवांश्चे त्याकारकानुमिति मादाय महानसीय-वह्न्यभाववत्पर्व्वते अव्याप्तिवारणाय ॥ ३५ ॥

यथाश्रुतमूलोक्तलक्षणे महानसीयवह्न्युभयाभाववान्तदव-यवइत्यादो महानसीयवह्निमत्तदवयवरूपबाधानात्मके ऽति-व्याप्तिः। उभयाभाववत्ताबुद्धिमात्रं प्रत्येव तद्धर्म्मावच्छिन्न-प्रकारतानिरूपितासती तद्धर्म्मावच्छिन्नप्रकारतानिरूपित-तद्धर्म्मावच्छिन्नविशेष्यताशालिनिश्चयत्वेनैव उभयवान् एकत्रद्वयमितिरीत्या तद्वान् तद्वांश्चेति बुद्धिद्वयलाभाय प्रति बन्धकताया वक्तव्यत्वात् अत्रापि महानसीयवह्न्यभाववान्त-दवयव इत्यनुमितिकारणीभूतो य स्तदवयवे महानसीयवह्नि-मत्तानिश्चाभावस्तत्प्रतियोगियथार्थज्ञानविषयत्वस्य महानसीय वह्निमत्तदवयवे सत्त्वात्। नचनित्यज्ञानावृत्तिविषयत्वाव-

च्छिन्नत्वंप्रतिवध्यतायां वाच्यं अतो नोक्तातिप्रसंग इतिवाच्यं? तथासति यथार्थपदवैयर्थ्यापत्ते रिति चेन्न सर्वत्रैवप्रतिवध्य-प्रतिवन्धकस्थले एकं प्रमा—अपर मप्रमा, अत्रोभयज्ञानस्य प्रमात्वेन योगिना मुभयज्ञान मेव भविष्यति तथाच तेषां प्रतिवन्धकज्ञानसत्त्वे प्रतिवध्यज्ञानस्यानुपपत्तिभयेन प्रति-वध्यतायां यौगिकसन्निकर्षाजन्यत्वावच्छिन्नत्वस्य निवेशनीय-त्वात् । अत्रप्रतिवध्यतायां यौगिकसन्निकर्षाजन्यत्वाव-च्छिन्नत्वनिवेशेनैवो क्तातिप्रसंगवारणात् ॥ ३६ ॥

यत्तु साध्याप्रसिद्ध्य व्याप्तिवारणप्रयोजनमस्ये ति तु न सत्—वह्नि र्न काञ्चनमय इत्यादि गदाधरः । नन्वत्रपि पक्षतावच्छेदकावच्छिन्नत्वस्येव साध्यतावच्छेदकावच्छिन्नत्व स्यापि सकृन्निवेशाभिप्रायः सम्भवति । तथाहि साध्यतावच्छे-दकविशिष्टविशेष्यतानिरूपकानुमितित्व व्यापकेत्यादि, वैशिष्ट्यं स्वावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न विशे-ष्यताकत्व स्वावच्छिन्ननिरूपितव्याप्तिविशिष्टहेतुतावच्छे-दकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न विशेष्य-ताकत्वोभयसम्बन्धेनइतिचेन्न । एतादृशपरम्परायाः संसर्गत्व-स्वीकारेमानाभावात् । नहि प्रागुक्त परम्परायाअपि-संसर्गत्वेमानाभावेनपक्षतावच्छेदकस्यापि सकृन्निवेशाऽसम्भव इतिशक्यते वक्तुम्, यतः "साध्यव्याप्यहेतुमान् पक्षः साध्यवान्" इत्याकारकसमूहालम्बनानुमितिप्रदर्शने शिरोमणिना पक्षपदस्य सकृदुल्लेखेनतस्य सकृन्निवेशोपयोगिपरम्परायाः प्रामाण्यमङ्गी

कृतं साध्यपदस्यच द्विधाउल्लेखेन तदीयसकृन्निवेशोपयोगि-परस्परासंसर्गे मानाभाव इति ॥ ३७ ॥

द्वितीयदलप्रवेशाद्व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः । इति गादाधरी ॥ नचात्राऽनुपसंहारित्वे साध्य व्याप्त्यभाववद्धेतुरूपव्याप्यत्वासिद्धौचाऽव्याप्ति संभवे कथं तन्नोक्तमितिवाच्यम् । अनुपसंहारित्वस्य व्यभिचारान्तर्गतत्वात् व्यभिचार पदेनैव तल्लाभः । साध्यतेऽनुमीयतेऽनेनेति साधनं हेतुर्व्याप्तिश्च, साधनञ्च साधनञ्च साधने तयोरप्रसिद्धि रितिव्युत्पत्त्या साधनाऽप्रसिद्धि पदेन हेत्वप्रसिद्धि व्याप्यत्वासिद्ध्युभयो रेव लाभात् । अथवा गुणीय संयोगेन वन्हेः साध्यतायां संयोगेन गुणीयत्वाभावस्य, गगन साध्यकस्थले अवृत्ति गगनस्यवा व्याप्यत्वा सिद्धित्व स्वीकर्तृमते व्याप्यत्वासिद्धित्वावच्छेदेन नाव्याप्तिसम्भावनेति न तदुल्लेख इतिध्येयम् ॥ ३८ ॥

अन्वयव्याप्तिव्यतिरेकव्याप्ती विशिष्योपादाय तदुभय विशिष्ट हेतुप्रकारकत्वमेवनिवेश्य मिति भट्टी । अत्र साध्यतावच्छेदकावच्छिन्नान्वयव्याप्ति प्रकारता निरूपित हेतुतावच्छेदकावच्छिन्न विशेष्यत्वावच्छेद्य प्रकारता निरूपित पक्षतावच्छेदकावच्छिन्न विशेष्यताकत्वेसति तादृश व्यतिरेकव्याप्ति प्रकारता निरूपित हेतुतावच्छेदकावच्छिन्न विशेष्यत्वावच्छेद्य प्रकारता निरूपित पक्षतावच्छेदकावच्छिन्न विशेष्यताकत्वेच सति साध्यतावच्छेदकावच्छिन्न प्रकारता निरूपित पक्षताव

४

च्छेदकावच्छिन्न विशेष्यतानिरूपकानुमितित्वव्यापकत्वमिति तात्पर्यम् । अथान्वयव्यतिरेकव्याप्तिद्वयस्य एकत्रद्वयमिति-रीत्या हेतुतावच्छेदकावच्छिन्नांशे प्रवेशेनैव सामञ्जस्ये कुतो-नोक्तमिति चेन्न । अन्वयव्यतिरेकव्याप्त्युभयाभाववद् धूमे अतिव्याप्तेः ।

नचान्वयव्याप्तिव्यतिरेकव्याप्त्योरन्यतरस्य विशेष्यतावच्छेद कत्वं कृत्वैवान्वयव्याप्ते र्व्यतिरेकव्याप्तेश्च प्रवेशसम्भवे कथं नोक्त मिति वाच्यम्? हेतुतावच्छेदक सामानाधिकरण्येन व्यभिचारेऽनुपसंहारित्वेच अव्याप्त्यापत्तेः, भट्टाचार्यमते धर्मि-तावच्छेदकैकदेशव्यापकतायाः संसर्गांशेऽनंगीकारात् हेतुताव-च्छेदकसामानाधिकरण्येन व्याप्तिमत्ता बुद्धिं प्रतिच हेतुतावच्छेदकसामानाधिकरण्येन व्यभिचार निश्चयस्याप्रति-बन्धकत्वात् ॥ ३९ ॥

व्याप्तिद्वय प्रकारतानिरूपित हेतुप्रकारतायाः स्तत्साध्यक तद्धेतुकानुमितिजनकतावच्छेदकप्रकारतात्वेनानुगमय्य निवेश स्तु न सम्भवति इति गदाधरः ।

अत्र साध्यपदं किमर्थ मिति नाशङ्कनीयं तदभावे पर्व्वतो धूमवान् वह्ने रित्यादौ द्रव्यत्वव्याप्यवह्निमान् पर्व्वत इत्याकारक परामर्शाव्यवहितोत्तरजायमानानुमिति जनकतावच्छेदकव्याप्ते-रनुमितिघटकतया तादृशानुमितित्वव्यापकप्रतिबध्यतानिरूपित प्रतिबन्धकत्वाभावात् धूमव्यभिचारी वह्निरित्यादा वव्याप्तेः ।

नच तादृशस्थले अव्याप्तिःस्वमतेऽप्यस्तीति वाच्यं यादृशस्थल-विशेषे एकविधव्याप्तिज्ञानादेवानुमिति स्तत्रान्यसाधारण्यादा वव्याप्तेः ॥ ४० ॥

पर्व्वतो धूमवान् वह्ने रित्यत्र धूमव्याप्यालोकवान् वह्निमत्पर्व्वत इत्याकारकनिश्चयोत्तरजातधूमसाध्यकवह्निमत्पर्व्वत-धर्म्मिकानुमितित्वावच्छिन्नजन्यतायाअपि प्रकृतहेतुभूतवह्नि-प्रकारताया अवच्छेदकत्वस्यावश्यकतया उक्तानुमिते रपि हेतुप्रकारकनिश्चयाव्यवहितोत्तरतया प्रकृतहेतुकत्वेन लक्षण-घटकत्वात् तन्निरूपितजनकतावच्छेदकीभूतप्रकारताशालिनी या धूमवान् धूमव्याप्यालोकवांश्च वह्निमत्पर्व्वत इत्याकारकानु-मितिः तदविरोधितया धूमाभाववद्वृत्तिवह्निरूपसाधारण्येऽ व्याप्तिभयेन तादृशजनकतावच्छेदकीभूतप्रकारतायां हेतुताव-च्छेदकावच्छिन्नत्वस्यनिवेशः। एवं चोक्तानुमितौ पक्षताव-च्छेदकघटकीभूतहेतुप्रकारतायां पक्षतावच्छेदकावच्छिन्नविशे-ष्यतानिरूपितत्वविरहेण तस्या धर्त्तुमशक्यत्वान्न दोष इति।

यद्वा गोत्वसाध्यकाश्वत्वादिहेतुकाश्वत्ववत्पर्व्वतादिपक्षस्थले गोत्वव्याप्यजातिमान् अश्वत्ववत्पर्व्वत इत्याकारकप्रकृतहेतु-प्रकारकनिश्चयोत्तरजात गोत्वसाध्यकानुमितित्वावच्छिन्नजन्य-ताया अपि धर्त्तुंशक्यतया तन्निरूपितजनकतावच्छेदकीभूत प्रकारताशालिनी या गोत्वव्याप्यजातिमान् अश्वत्ववत् पर्व्वतो गोत्ववानित्यनुमिति स्तदविरोधितया गोत्वासमानाधिकरणा-श्वत्वरूप विरोध्येऽव्याप्तिरतस्तादृशजनकतावच्छेदकीभूतप्रकार

तायां हेतुतावच्छेदकावच्छिन्नत्वनिवेशः। एतेन साधारण्या व्याप्ति रत्नकल्पे ऽस्त्येवेति वैयर्थ्यं तद्वारण प्रयोजनकविशेषण-दानमस्येति परास्तं।

तद्धेतुकत्वपदेन तद्धेतुप्रकारकनिश्चयोत्तरतादृशानुमिति-त्वावच्छिन्नजन्यतेत्यादिनिवेशे तु नात्र व्यावृत्तिसम्भावना उक्तस्थले पक्षतावच्छेदकीभूत अश्वत्व प्रकारकज्ञानस्य निश्चय-त्वेन निरुक्तानुमितिजन्यतावच्छेदकत्वविरहात् तस्यज्ञानत्वेन जन्यतावच्छेदकत्वंलाघवात् स्वीकर्त्तव्यम्। धर्म्मितावच्छेद-कांशेसंशयानभ्युपगमात् तदभावाऽप्रकारकत्वेसति तत्प्रकारक-ज्ञानत्वरूप निश्चयत्वनिवेशेगौरवादिति विभावनीयम्।

नचैवमपि तद्धेतुकत्वपद मनर्थक मिति वाच्यं, प्रकृतपक्ष-साध्यकानुमितित्वावच्छिन्नं प्रति पक्षताविधयासाध्यसंशय-स्यापि प्रकृतपक्षसाध्यकानुमितित्वावच्छिन्नजन्यतानिरूपित-जनकतावच्छेदकीभूता भावत्वावच्छिन्नहेतुपक्रारता शाल्यनु-मितित्वेन (रत्नकोषकारेणसंशयाकारणानुमितेः स्वीकारात् तन्मतेनेदम्) उपादातुं शक्यतया वह्न्यभाववद्वृत्तिअभावरूप-साधारण्ये अव्याप्तिप्रसङ्गात् तदुपादाने च पक्षताजन्यताव-च्छेदककोटौ हेतुकत्वानिवेशेन न तल्लाभसम्भावना।

इदन्तु साध्यसंशयत्वेन साध्यानुमितेर्हेतुत्वमिति मथुरा-नाथोक्तमत मवलम्ब्योक्तं साध्यवत्त्वनिश्चयनिवर्त्तनीयत्वेनतस्य हेतुत्वे नोक्तव्यावृत्तिसम्भावनेतिभाव्यं। वस्तुतस्तु अत्रापि

द्रव्यत्ववान् द्रव्यत्वाभावादित्यादिस्थलीयविरोधे उक्तरीत्या ऽव्याप्तिसंगमनेन व्यावृत्तिर्बोध्या साधारण्याव्याप्तौ ग्रंन्थ-कृदुक्तत्वाद्। गोत्ववानश्वत्वादित्यादौ गोत्ववान्पशुत्वव्याप्या-श्वत्ववानित्यनुमितेरपि प्रकृतहेतुकानुमितित्वावच्छिन्नजन्यता निरूपितजनकतावच्छेदकीभूतप्रकारताशाल्यनुमितित्वेन धर्त्तुं शक्यतयाविरोधे अव्याप्तिरिति प्रकृतसाध्यकत्वनिवेशः॥ ४१॥

नत्वेन न वर्णस्य पक्षत्वे वन्हेः साध्यत्वे उत्तरत्वसम्बन्धेन आवर्णस्यहेतुत्वे नोवन्हिमान् आतइत्याकारकानुमितौ वन्ह्यभाव-वद्वृत्ति आरुप साधारण्येऽव्याप्तिवारणायानुमितित्वनिवेशः। तथाहि नोवन्हिमानित्याकारकोत्तरत्वसम्बन्धावच्छिन्नात्वा-वच्छिन्नप्रकारक नविशेष्यक निश्चयोत्तर नविशेष्येकवह्नि-विषयकशाब्दत्वावच्छिन्नजन्यताया अपिप्रकृतहेतुनिश्चयोत्तर प्रकृतसाध्यविधेयकत्वावच्छिन्नतया लक्षणघटकत्वेन तन्निरूपित जनकतावच्छेदकीभूतविशिष्ट आत्वावच्छिन्नप्रकारताशालिनी या नत्वावच्छिन्ने वह्नित्वावच्छिन्नप्रकारताशालिनी नोवह्निमान् विशिष्टआवांश्चेति समूहालम्बनात्मिकावाक्यज्ञानरूपानुमिति स्तद्विरोधित्वस्य वह्न्यभाववद्वृत्तिआरूपसाधारण्येविरहात् अथ तादृशाव्याप्ति लक्षणे ऽस्त्येवेतीष्टापत्ति रिति चेन्न यादृश-स्थलविशेषे व्यतिरेकव्याप्ते र्ज्ञानं कदापि नजातं तत्राव्याप्ति रिति बोध्यम्। अत एव वा वह्न्यसमानाधिकरण आ रूपे विरोधे ऽव्याप्तिप्रसंगरूपो दोषो बोध्यः॥ ४२॥

तादृशप्रकारतानिरूपितविशेष्यताशाल्यनुमितित्वेत्यादिनिवेशप्रणाली—तथाचप्रकारतानिरूपितेति निरूपितत्वांशानिवेशेन लाघवात् तत्पक्षकतत्साध्यकतद्धेतुकानुमितिजनकतावच्छेदकीभूतविशेष्यताशाल्यनुमितीत्यादि कथं ननिवेशितमिति चेन्न, यत्साध्यकानुमितिर्नियतमेकत्रैव पक्षे भवति तत्रजन्यतावच्छेदककोटौ पक्षनिवेशस्यानावश्यकतया तादृशाङ्कुरतत्पक्षकत्वावच्छिन्नजन्यत्वाप्रसिद्धेः। नचतादृशस्थलीयलक्षणेऽपितत् पक्षकत्वं नदेय मिति वाच्यं एकोक्तयालक्षणस्यैवाभिप्रेतत्वादिति। प्रकृतपक्षकेत्युक्तावपि निरूपकत्वप्रवेशात् विशेषो नास्ति पदार्थसाम्यादिति ॥ ४३ ॥

अथप्रकृतानुमितित्वावच्छिन्न यत्किञ्चिज्जन्यतानिरूपितजनकतावच्छेदकीभूतहेतुप्रकारताशाल्यनुमितित्व व्यापकप्रतिबध्यतानिवेशेनैव साधारण्याद्यव्याप्तिवारणसम्भवेनैतत् कल्पपरित्यागो निर्व्बीज इति, नच यत्किञ्चित्वमननुगतमिति वाच्यं तादृशजन्यताविशिष्टप्रतिबध्यतेत्यादिरीत्या तदनुगमसम्भवात्। वैशिष्ट्यं च स्वविशिष्टानुमितित्वव्यापकत्वसम्बन्धेन, वैशिष्ट्यं च स्वनिरूपितजनकतावच्छेदकीभूतहेतुप्रकारतानिरूपित पक्षतावच्छेदकावच्छिन्नविशेष्यताकत्व स्वकालीनसाध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताकत्वोभयसम्बन्धेन।

एतादृशीपरम्परायाः संसर्गत्वानभ्युपगमे तु तादृशजन्यतावृत्त्युभयावृत्तिधर्म्मावच्छिन्नावच्छेदकतानिरूपक निरूपितत्वनिष्ठावच्छेदकतानिरूपकजनकत्वनिष्ठावच्छेदकतानिरूपकावच्छे-

दकत्वनिष्ठावच्छेदकतानिरूपक हेतुतावच्छेदकावच्छिन्नप्रकारतानिष्ठावच्छेदकतानिरूपक निरूपितत्वनिष्ठावच्छेदकतानिरूपक पक्षतावच्छेदकावच्छिन्नविशेष्यतानिष्ठावच्छेदकतानिरूपिका सती साध्यप्रकारतानिष्ठावच्छेदकतानिरूपकपक्षविशेष्यत्वनिष्ठावच्छेदकतानिरूपिका या अनुमितित्वावच्छिन्नावच्छेदकता तन्निरूपकवृत्तित्वनिष्ठावच्छेदकतानिरूपक भेदत्वावच्छिन्नावच्छेदकतानिरूपक प्रतियोगित्वनिष्ठावच्छेदकतानिरूपक निरूपितत्वनिष्ठावच्छेदकतानिरूपिका या अवच्छेदकतात्वावच्छिन्नप्रतियोगिता तन्निरूपकाभाववत् प्रतिवध्यतानिरूपितप्रतिबन्धकेत्यादिरीत्या प्रकारमुद्रया नुगमेन—लब्धां यां कांचिज्जन्यताव्यक्तिं समादाय तद्व्यक्तिनिरूपितजनकतावच्छेदकीभूतहेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपित पक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनी साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदकावच्छिन्न विशेष्यता शालिनीच याऽनुमितिः तद्वृत्तिभेदीयप्रतियोगित्वीयावच्छेदकत्वं नास्तीति व्यापकत्वरूपाभाववत्प्रतिवध्यतामादाय साधारण्यादौ लक्षणगमनसम्भवात्—इतिचेन्न, ह्रदोवह्निमान् धूमादित्यादौ साध्यव्याप्याभाववद्ह्रदे ऽतिव्याप्ते रुक्तरीत्या वारणासम्भवात्। सिद्धान्ते तु—साध्यव्याप्यो हेतुः हेतुमान् पक्षः साध्यवानिति त्रिखण्डाकारानुमिते रेव लक्षणघटकतया नोक्तदोषशङ्केति।

आचार्य्यानुमिति मनुसृत्य व्याचक्षमाणानां जगदीशानां

मते उक्तातिव्याप्तिवारणार्थं लक्षणघटकीभूतप्रतिबध्यताया मगत्यासाध्यव्याप्यहेतुप्रकारक पक्षविशेष्यकबुद्धित्वावच्छिन्नप्रतिबध्यताभिन्नत्वं निवेशनीयं ॥ ४४ ॥

व्याप्तिविशिष्ट-विषयकत्वस्ये ति गादी—

अथात्रस्वरूपासिद्धावव्याप्ति र्दर्शिता व्यभिचारविरोधयोः संभवा त्तत् कथं न दर्शित मिति नाशङ्कनीयम्। उभयकल्पे तत्राव्याप्त्यसंभवात् अतः स्वरूपासिद्धिमात्रकथनम्। हेतुनिष्ठ-प्रकारत्वनिवेशे स्वरूपासिद्धौ व्यभिचारे चाव्याप्ति र्दर्शिता, अत्रापि साधनाप्रसिद्धिविरोधयोः संभवे तत्परित्यागे कारणम् आद्यन्तोत्कीर्त्तनेन मध्यपतितयोः संभवात्। व्यतिक्रमेण निवेश स्तु लिपिसौकर्य्यार्थ मेवेति ॥ ४५ ॥

धर्म्मितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्ति विशेष्यतायाव्यापकत्व मेव संसर्गांशे भासते इतितात्पर्य्यं वृत्तित्वंच स्वावच्छेदकतात्ववच्छिन्नेत्यादि सम्बन्धेन।

नच तदेकदेशव्यापकत्वावच्छिन्नसंसर्गतायाः प्रामाणिकत्वे कोदोषः इति वाच्यं द्रव्यं वह्निमद् धूमादित्यादौ वह्निव्याप्य धूमवद्द्रव्यं वह्निमदित्यादौ एकदेशव्यापकत्वस्वीकारे प्रतीते भ्रमत्वापत्तेः नच लिङ्गोपधानलैङ्गिकभानवादिमते तादृस्थले प्रतीते भ्रमत्वापत्तिरिति वाच्यं तादृस्थले तन्मते दोषस्वीकारात् ॥ ४६ ॥

तादृशसंसर्गतायाः प्रामाणिकत्वे नीलपर्वतविशेष्यिकायां पर्वतविशेष्यिकायाश्चानुमितौ, पर्वतत्वावच्छेद्यत्वस्यस्वीकरणीयतया, पर्वतत्वावच्छेदेनानुमितिस्थलएव पृथक् २ कार्य्यकारणभावकल्पनस्यावश्यकतया महागौरवापत्तिः। सिद्धान्तेतु पर्व्वतत्वावच्छेदेन पर्व्वतमात्रविशेष्यकानुमितेरेव संभवात् एकविधकार्य्यकारणभावेनैवोपपत्तिरिति ॥ ४७ ॥

तद्धर्म्मावच्छिन्नविशेष्यतानिरूपिततदेकदेशव्यापकत्वावच्छिन्नसंसर्गताया अप्रामाणिकत्वा दिति गा-टी ॥

नच तदेकदेशव्यापकत्वावच्छिन्नसंसर्गतायाअस्वीकारे यत्रपर्व्वतत्वावच्छेदेन वह्नेः साध्यता तत्रवह्निव्याप्यधूमवति पर्व्वते वह्नौच लाघव मिति लाघवज्ञानानन्तरं वह्निव्याप्यधूमवान् पर्व्वतो वह्निमानित्याकारकानुमित्यप्रतिवन्धकत्वात् पर्व्वतत्वसामानाधिकरण्येन वह्नयभाववत्तानिश्चयस्य वाधत्वानुपपत्ति रिति वाच्यं विशेष्यांशे लाघवज्ञाने प्रमाणाभावात्। लिंगोपधानमते अव्यवहितोत्तरत्वस्य कार्य्यतावच्छेदककोटावप्रवेशाल्लाघवमिति ॥ ४८ ॥

एकदेशव्यापकत्वास्वीकारे पर्व्वतत्वावच्छेदेन परामर्शस्यैव तादृशविशिष्टपर्व्वतत्वावच्छेदेनानुमितिहेतुत्वमवश्यमभ्युपेयं अन्यथा पर्व्वतत्वावच्छेदेन परामर्शस्थले प्रविवन्धकान्तरासत्त्वेऽपि पर्व्वतत्वसामानाधिकरण्येन सिद्धिमात्रसत्वेऽनुभवसिद्धानुमितेरनुत्पत्तिःस्यात्। तथाच दर्शितस्थले सामानाधिकरण्येन वाधस्य सिद्धेश्च विशिष्टपर्व्वतत्वावच्छेदेनानुमिते

रप्रतिबन्धकत्वात् अनुमित्यापत्तिर्दत्ता भट्टाचार्येण एकदेश-व्यापकतास्वीकारे च पर्व्वतत्वावच्छेदेन परामर्शस्य पर्व्वत-त्वावच्छेदेन तत्सामानाधिकरण्येनचानुमित्योरेव हेतुत्व कल्पनात् नोक्तापत्तिसंभावनेति तात्पर्य्य मिति ॥ ४६ ॥

ननुतदेकदेशव्यापकत्वावच्छिन्न संसर्गतायां कुतोऽ प्रामा-णिकत्व मिति चेन्न तदवच्छेदेन तद्वानित्युक्तौ अवच्छिन्नत्व-सम्बन्धेनोद्द श्यतावच्छेदकस्य संसर्गांशे पारतन्त्र्येनान्वयो भवति अवच्छिन्नत्वं च स्वव्यापकविधेयप्रतियोगिकत्वं तथाच यत्रोद्द श्यतावच्छेदकद्वयं तत्रैकस्यावच्छिन्नत्वसम्बन्धेन संस-र्गांशे ऽन्वयो भवति नान्यस्येति नियमाभावात् अप्रामाणिकत्व मुक्तं । अथ तादृश एव नियमः—क्रियते इति चेत्तदा महा गौरवम् ॥ ५० ॥

सामानाधिकरण्येन वाधसिद्ध्योः सत्योरनुमितिं कश्चि-दुपैतीति गदाधरः ।

सामानाधिकरण्येन वाधस्य तादृश सिद्धेश्च प्रतिवध्य कोटौ, धर्म्मितावच्छेदकताया इतर वारक पर्याप्ति निवेशस्या-वश्यकतया, लिंगोपधानमते—हेतोरधिकस्य सर्वदैव धर्म्मिताव-च्छेदकतया भानाच्च अत्रानुमिति सामान्यापत्तिरवगन्तव्या ।

ननु लिंगोपधानमते सामानाधिकरण्येन सिद्धेः प्रतिबन्ध-कताया अपलापापत्तिभिया साध्यव्याप्यहेतुभिन्नत्वे सति-पक्षतावच्छेदकेतरो यो धर्म्मः स्तदनवच्छिन्न विशेष्यताकत्वस्य प्रतिवध्यतावच्छेदकत्वकल्पनौचित्यात् सामानाधिकरण्येन

प्रतिबन्धकत्वादेव नोक्तापत्तिरितिचेन्न पर्वतत्व सामानाधिकरण्येण वह्नेः सिद्धिदशायां प्रतिबन्धकान्तरासत्वे पर्वतत्वावच्छेदेन वह्निव्याप्यधूमपरामर्शात् सर्वजनानुभवसिद्धानुमितेरनुत्पादप्रसंगेन संयोगत्वमात्रावच्छिन्न संसर्गताकत्वस्य तादृश सिद्धेः प्रतिबध्यतावच्छेदकत्वमावश्यकम् । तथाचोक्त स्थले वह्निव्याप्यधूम, पर्वतत्व धर्म्मद्वयव्यापक संयोगत्वावच्छिन्न संसर्गताकानुमितेर्नानुपपत्तिः भट्टाचार्य प्रदर्शितस्थले अनुमित्यापत्तिश्च सुसंगतैवेति ॥ ५१ ॥

एवमपि लिङ्गानुपधानमते तादृशविषयतायां प्रमाणाभाव एव । ग्रन्थोऽपि न लिङ्गोपधानमताभिप्रायकः तन्मते ऽनुमितेः सर्व्वत्रैव तथाकारतया तादृशाकारकत्वस्याव्यावर्त्तकतया अनुमितिपदस्य तादृशाकारकानुमितिपरत्वप्रदर्शनानुपपत्ते रिति गदाधरः । अथ ह्रदो वह्निमान् जलादित्यत्र जलावच्छेदे वह्न्य भाववत्त्वनिश्चयस्य वह्नित्वावच्छिन्नप्रकारतानिरूपित जलत्वावच्छिन्नावच्छेदकताकविशेष्यताशालिबुद्धित्वस्य प्रतिबध्यतावच्छेदकतयालिङ्गोपधानमते जलवान् वह्न्यभाववानित्यत्रातिव्याप्तेः वह्निव्याप्यजलवान् ह्रदो वह्निमानित्याकारानुमितेः तादृशनिश्चयप्रतिबध्यत्वादिति चेदिद मपि लक्ष्यमेव हेतौ साध्याभाववद्वृत्तित्वस्येव साधनवति साध्याभावस्य व्यभिचारत्वादिति ॥ ५२ ॥

नन्वत्र लक्षणशरीरे व्याप्त्यादेरप्रविष्टतया लिङ्गोपधानमते साधारण्यानुपसंहारित्वयो रव्याप्तिः, सत्य मत्रसमाधानं—

त्तादृशजन्यताविशिष्टप्रतिवध्यतानिरूपितप्रतिवन्धकताशालियथार्थज्ञानविषयत्व मिति—वैशिष्ट्यं स्वसमानाधिकरणभेदप्रतियोतिागनवच्छेदकत्व सम्पन्धेन ॥ ५३ ॥

ननु तथापि तद्वत्तावुद्धिं प्रति तदभावव्याप्यवत्तानिश्चयत्वेन प्रतिवन्धकतया ह्रदो वह्निमान् घटत्वा दित्यत्र वह्न्यभावव्याप्यवद्घटे ऽतिव्याप्तिः। नचतस्याऽपि लक्ष्यत्व मिति वाच्यं साधनवति साध्याभावव्याप्यवत्तादिकन्त्वाविरोधान्नाभास इति साधारणग्रन्थे दीधितिकृता तस्या भासत्व खण्डनात् एवं ह्रदो गगनवान् धूमादित्यत्र वृत्त्यवच्छेदेनगगनाभाववत्ताया अपि दोषत्वाप्रत्तिः तजज्ञानस्यापि धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकगगनत्वावच्छिन्नसमानाधिकरण धूमवान् ह्रदो गगनवान् इत्तनुमितिप्रतिवन्धकत्वात्।

एवं ह्रदत्वसामानाधिकरण्येन वह्निसाध्यकजलहेतुकस्थले जलवद्ह्रदत्वावच्छेदेन वह्न्यभावस्यापि दोषत्वापत्ति रिति चेन्न प्रकृतलक्षणघटकीभूतप्रतिवन्धकतायां उक्तविशिष्टज्ञानीयालक्ष्यीभूततत्तत्प्रतिवन्धकताभेदस्य निवेशा न्नदोषः। निवेशप्रकारस्तु यथाक्रमेणघटत्वावच्छेदेन वह्न्यभावव्याप्यवत्तानिश्चयत्वावच्छिन्नप्रतिवन्धकताभिन्नप्रकृतानुमितित्वव्यापकप्रतिवध्यतानिरूपितप्रतिवन्धकताशालीत्यादि। एवं वृत्त्यवच्छिन्नावच्छेदकताकविशेष्यतानिरूपितगगनाभावत्वावच्छिन्नप्रकारताशालिनिश्चयत्वावच्छिन्नप्रतिवन्धकताभिन्नेत्यादियथायथ मूह्यं। यद्वा साध्यतावच्छेदकावच्छिन्नप्रकरतानिरूपितपक्षतावच्छेदकावच्छि

न्नविशेष्यताशालिग्रहत्वाभाववत् प्रकृतानुमितित्व व्यापक-प्रतिवध्यतेत्यादिनिवेशः कार्य्यः। अभाववत्ताचस्वाव्यापक-वृत्त्यवच्छिन्नावच्छेदकताकविशेष्यतानिरूपितसाध्यतावच्छेदका वच्छिन्नप्रकारताशालिग्रहत्व व्यापक प्रतिवध्यतात्ववत्ता-सम्बन्धेन।

तर्करत्नास्तु—पक्षः साध्यवानित्याकारकग्रहत्वाव्यापकत्वे सति हेतुतावच्छेदकावच्छिन्नविषयताशालिग्रहत्वाव्यापकत्वेसति सा-ध्याधिकरणवृत्तिहेतुमान्पक्षःसाध्यवानित्याकारकग्रहत्वव्यापि—का या प्रतिवध्यता तदन्यप्रकृतानुमितित्वव्यापकप्रतिवध्य-तेत्यादिनिवेशः कार्य्यः। तथाच वृत्तिमत्पक्षकगगनसाध्य-कस्थलेसाध्याधिकरणवृत्तिहेतुमान् साध्यवानित्याकारकग्रहत्व व्यापिका प्रतिवध्यता पक्षः साध्यवानिति ग्रहत्वाव्यापिका न भवतीति तदन्यत्वं अस्त्येवेति नाव्याप्तिः। वृत्त्यवच्छेदेगगना भावस्थले च साध्याधिकरणवृत्तिहेतुमान् साध्यवानिति ग्रहत्वव्यापिकैव पक्षः साध्यवानिति ग्रहत्वाव्यापिका प्रति-वध्यता तदन्यत्वं नास्तीति नातिप्रसंग इतिप्राहुः॥ ५४॥

तत्रक्षणैकविलम्बेनानुमित्यभ्युपगमे व्यभिचारासम्भवान्न तत्रव्यभिचारो दर्शित इति गदाधरः। यत्र वह्नित्वसामानाधिकर-ण्येन व्यभिचारज्ञानं तत्सामानाधिकरण्येन च तल्लिङ्गकपरामर्श स्तत्र यत्रचापेक्षाबुद्ध्यात्मकव्यभिचारज्ञानं तद्रुपावच्छिन्न-लिंगकपरामर्शस्तत्र, यत्रच यद्रूपावच्छिन्न धर्म्मिकव्यभिचार-ज्ञानंद्वितीयक्षणे तद्रूपावच्छिन्न लिंगकपरामर्शस्तृतीयक्षणे उत्तर

क्षणे वाधबुद्धि प्रत्यक्षात्मकसामग्री चतुर्थक्षणेवाधबुद्धिस्तत्रच-क्षणैक विलम्बेनानुमितिस्वीकारेऽपि व्यभिचार सम्भवान्नतत्र-व्यभिचारइतिलिखनमसंगत मितिचेन्न प्रथमस्थले हेतुतावच्छेदक सामानाधिकरण्येनव्याप्तिज्ञानस्य अनुमित्यजनकत्वात् । द्वितीय स्थले सर्वत्रापेक्षाबुद्धे स्त्रिचतुःक्षणावस्थायित्वे प्रमाणाभावात् । तृतीय स्थलेच चतुर्थक्षणे अनुमितिस्वीकारात् वाधबुद्धेः कार्य-काल वृत्तितया प्रतिवन्धकत्वे मानाभावात् । यत्रादौपरामर्शः तदनन्तरं तद्धर्म्मिकव्यभिचारज्ञानं तत्रानुमितावेव व्यभिचार सम्भवेन अन्यस्य परामर्शादिति पर्यन्तं कथमनुसृतमितिचेन्न परामर्शात् परंयदि तद्धेतु धर्म्मिकव्यभिचारज्ञानं जायतेतर्हि तव्द्यभिचारज्ञानं दोष विशेष जन्यमेव किन्तु अनुमितौ दोष-विशेषाद्यजन्य व्यभिचारज्ञानाभावस्यैव कारणत्वमित्युक्तौ तत्र-नदोषोऽतआह "अन्यस्ये" ति ॥ ५५ ॥

अथ धर्म्मावच्छिन्न लिंगककत्वश्चाव्यवहितोत्तरत्व सम्बन्धेन तद्रूपावच्छिन्न धर्मिक व्याप्तिज्ञान विशिष्टत्वं तादृश सम्बन्धेनव्यभिचारज्ञानविशिष्टं यत्तदन्यत्वंवा जन्यता वच्छेदकं वाच्य मितिगादी ।

अथद्वितीयक्षणमात्र पर्यवसिताव्यवहितोत्तरत्व निवेश एव पूर्वकल्पेनिरुक्तदोषासम्भवाद्वितीय कल्पानुसरणं निर्वीज-मितिचेन्न यत्रतल्लिङ्गकव्यभिचारोत्पत्तिद्वितीय क्षणे लौकिक-सन्निकर्षादिनातल्लिङ्गकपरामर्शस्तत्रक्षणैक व्याजेन स्वीकृताया अवश्यम्भाव्यानुमितेरुक्तपरामर्शद्वितीयक्षणे उत्पादप्रसङ्गात

तदनुमितेरुक्त सम्बन्धेन व्याप्तिज्ञान विशिष्टत्वाभावेन व्यभिचार ज्ञाना प्रतिवध्यत्वादिति । अथवा यत्र पूर्व्वोत्पन्नवाधादिज्ञान-प्रतिवन्धात् परामर्शतृतीयक्षणे ऽनुमिति स्तत्र तदनुमिते व्याप्ति-ज्ञानविशिष्टत्वापत्तिः अव्यवहितोत्तरत्वस्य तृतीयक्षणसाधा-रणयेतु तत्र तथात्व मिष्ट मेव ॥ ५६ ॥

अत्रत्यीयर्द्वितीयक्षणमात्रवृत्त्यव्यवहितोत्तरत्वं इत्यस्या-नुगमः । व्याप्तिज्ञानविशिष्टत्वं स्वविशिष्टक्षणोत्पतिकत्व-सम्वन्धेन, स्ववैशिष्ठ्यं क्षणे स्वाधिकरणसमयध्वंसाधिकरण-समयध्वंसानधिकरणत्व स्वाधिकरणसमयध्वंसाधिकरणत्वोभ-यसम्वन्धेन ।

अत्रोत्पत्तिपदानुक्तौ यत्र प्रथमं धूमव्यभिचारी वह्नि-र्धूमव्याप्येन्धनवां श्चेति समूहालम्वनं ततो धूमवान् पर्व्वत इति अपेक्षाबुद्धयात्मिका अनुमितिः ततो लौकिकसन्निकर्ष-जन्यो धूमव्याप्योवह्नि रिति व्याप्तिज्ञानं तत्र पूर्व्वोक्तसम्वन्धेन पूर्व्वानुमिते व्याप्तिज्ञानविशिष्टत्वात् तदनुमिते व्याप्तिज्ञानपूर्व्व-क्षणे ऽनुत्पादापत्तिः कारणस्य वह्निधर्म्मिकव्यभिचारज्ञाना-भावस्यासत्त्वादत उत्पत्तिपदं । तथाच तादृशसम्वन्धेनो त्तरकालोत्पन्नव्याप्तिज्ञानस्याविशिष्टत्वात् पूर्व्वानुमिते र्न दोषः ॥ ५७ ॥

अथैवं सति व्यभिचारज्ञानाभावस्यान्वयव्यतिरेकसिद्ध-कारणत्वनिर्व्वचनस्या विरुद्धतया कथ मग्रे अन्यथा सिद्धत्वोक्ति रस्य संगच्छते, दर्शितानुमितेर्वह्निलिंगकत्वाभ्युपगमेतु

व्यभिचारएवेति चेन्न मध्यस्थस्य सन्दिग्धकारणताकपदार्थस्या न्यथासिद्धत्व मिति परामर्शलिखितपारिभाषिकान्यथासिद्धत्व मस्येति तात्पर्य्यम् ॥ ५८ ॥

अन्तेच प्रमेयत्वाभाववद्वृत्तित्वष्स्या प्रसिद्धया न तद् भ्रमत्वं किन्त्वभावांशे अनुयोगिताविशेषसम्बन्धेन साध्यस्य-भ्रमत्व मित्येतादृशविशेषमादृत्य शिष्यव्युत्पादनायानेकविध-भ्रमकथन मिति गदाधरः ।

अथ केवलान्वयिसाध्यकस्थले अप्रसिद्ध्यासाध्याभाव-वद्वृत्तित्वरूपा व्याप्ति र्दोषलक्षणघटकानुमितौ न निवेश्या किन्तु-व्यापकसामानधिकरण्यरूपैवेति, तथाचाभिधेयत्वं मेयत्वस्य व्यभिचारीत्यत्र तादृशसाध्याभाववद्वृत्तित्वरूपव्यभिचारस्यानु-पयोगितया तद्घटनप्रयासो न संगत इतिचेन्न तादृशव्याप्ति-लक्षण मत एवायं ग्रन्थः। अनुमितिं च भ्रमात्मिका मादाय दोषलक्षण मिति नच तथात्वे तन्मते केवलान्वयिसाध्यकहेतो र्दुष्टत्वे "नेत्यादिसद्धेतुस्थले" इत्यादिग्रन्थविरोधइतिवाच्यम् एकोक्त्यानिर्वाहाभिप्रायेण सर्वासा मेवव्याप्तीनां लक्षणघटका-नुमितौ निवेशात्। साध्या भाववदवृत्तित्वरूपव्याप्तिज्ञानप्रति-वन्धकता मादाय दोषशङ्कानिराकरणार्थ मयं प्रयासः ।

नचैव मप्रतियोगिसाध्य मित्यादेः केवला न्वयिसाध्यके दोषस्य सत्त्वात् तादृशसद्धेतुत्वकीर्त्तनमस्यासङ्गत मिति वाच्यं दर्शितातिव्याप्तिविषयव्यभिचारादिदोषरहित इत्येव सद्धेतुपदार्थ त्वात्। अतिव्याप्तिस्तु व्यभिचारे दर्शितेति न काप्यनुपपत्ति

रिति, एवं च साध्याभाववदवृतित्वरूपव्याप्तिमात्रनिषेधेऽपि ग्रन्थः सुष्ठु संगच्छते। यद्वा अप्रतियोगिसाध्यमितिज्ञानं नैतन्मते प्रतिवन्धकं असमानाकारत्वा दित्यपि केचित् ॥ ५६ ॥

प्रतियोगित्वांशे सम्बन्धविशेषावच्छिन्नत्वस्य भ्रम इत्यपि न युक्तं तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्ते रिति गदाधरः।

सम्बन्धघटकविशेषणे प्रकारत्वं तद्विषयतायां सम्बन्धावच्छिन्नत्वं च न स्वीक्रियते तत्र प्रकारतास्थले विशेषणतास्वीकारः सा च संसर्गानवच्छिन्नेति तात्पर्य्यं, अस्ति वा उभयत्रैव प्रकारता, किन्तु नोभयसाधारणी, धर्मस्था संसर्गावच्छिन्ना, संसर्गतावच्छेदकस्था च तदनवच्छिन्नेति विशेषः स्वीकार्य्यः। अथवा उभयप्रकारतायाः संसर्गावच्छिन्नत्वे प्यस्ति मिथो भेदः इति स्वीकार्य्य मेव, अनयोः कथ मपि वैलक्षण्यास्वीकारे विशेषणज्ञानं विना विशिष्टसम्बन्धज्ञानस्यानुप्पदय प्रसङ्गः, विशेषणज्ञानं विना विशिष्टबुद्ध्यनुत्पत्या तत्प्रकारकबुद्धित्वावच्छिन्नं प्रति तद्विषयकज्ञानत्वेन कारणत्वस्यावश्यं कल्पनीयत्वात्। भेदे तु धर्म्मप्रकारतैवात्र कार्य्यतावच्छेदककोटौ निविष्टेति नानुपपत्तिः। तथाच धर्म्मसम्बन्धसाधारणानुगतभ्रमत्वं निर्वाचयितुमशक्यम्। तदभाववति तत्कारकत्वं धर्म्मांशे भ्रमत्वं अधिकरणतानिरुपित निरुपकतानिरुपित सांसर्गिकावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरुपावृत्तिसंसर्गताकत्वं। वृत्तित्वंचस्वावच्छेदकता-

त्वावच्छिन्नत्वादिसंसर्गेन । संसर्गांशेभ्रमत्व मिति द्विविधमेव-भ्रमत्वंनिर्वाचनीयं । एवंच पूर्वोक्तभ्रमस्यात्रासम्भवप्रदर्शनार्थं तत्प्रकारकत्वघटिततद्भ्रमत्वानुपपत्तेरित्युक्तं ।

नच यथाकथंचित्भ्रम एव व्यावृत्तिसम्भवात्तदनुपपत्तावपि काक्षति रिति वाच्यं शिरोमण्युक्तेनैकेनैव भ्रमशब्देनाननुगत तादृशद्विविधभ्रमसंग्रहस्यानुपपत्तौ तात्पर्य्यात् । नाप्यत्र भ्रमश्च भ्रमश्चेत्येकशेषतो भ्रमद्वितयलाभसंभवः एकप्रवृत्तिनिमित्तानामेव एकशेषइतिपाणिनीयानुशासनात् । यद्यपि इन्द्रचन्द्रादिपरहरिशब्दस्य हरयइत्येकशेष समस्यमानत्वंदृश्यते तथाप्यत्र भ्रमादित्येक वचनान्त निर्द्देशेन तस्यायुक्तत्वादिति । नच सर्व्वत्रैव संसर्गांशे भ्रम मादाय व्यावृत्तिः संगमनीयेति वाच्यं परामर्शविरोधिनो भ्रमद्वयस्यैकविधत्वे वैचित्र्यविरहेण स्थलद्वयानुसरणस्यवैफल्यादिति ।

अथ गुणीयत्वाभाववान् संयोग इति निश्चयसत्त्वे गुणीयः संयोग इति बुद्धे रिव गुणीयसंयोगेन वह्निमान् पर्व्वत इतिबुद्धेरप्यनुदयात् अनुगतरूपेण प्रतिबध्यप्रतिवन्धकभावनिर्व्वचनार्थमेव धर्म्मसंसर्गतावच्छेदकसाधारणी अनुगतप्रकारता तादृशप्रकारतायां संसर्गावच्छिन्नताच वक्तव्येति चेन्न उक्तप्रतिवध्यप्रतिवन्धकभावस्य स्वरूपसम्वन्धातिरिक्तसम्वन्धानवच्छिन्नगुणीयत्वविशेषणता निरूपितसंयोगत्वावच्छिन्नविशेष्यताशालिबुद्धित्वेन स्वरूपसम्वन्धावच्छिन्नप्रतियोगिताकगुणीयत्वाभावप्रकारकसंयोगविशेष्यकनिश्चयत्वेन कल्पनयैवा-

नुपपत्तिविरहात्। समवायस्यैव संयोगनिष्ठसंसर्गता-नियामकत्ववत् गुणीयत्वनिष्ठसंसर्गतावच्छेदकतानियामकत्व स्वरूपसम्बन्ध एव नान्यत्।

एवंच गुणीयत्वनिष्ठसंसर्गतावच्छेदकतायाः स्वरूप-सम्बन्धानवच्छिन्नत्वे ऽपि स्वरूपसम्बन्धावच्छिन्नप्रतियोगि-ताकगुणीयत्वाभावप्रकारकनिश्चयस्य गुणीयत्वनिष्ठसंसर्गता-वच्छेदकताकबुद्धौ विरोधित्व मनुभवसिद्धं।

नचैवंसंयोगसम्बन्धावच्छिन्नगुणीयत्वाभावप्रकारकनिश्चयो ऽपि प्रतिबध्नातु गुणीयसंयोगेन वह्निमत्ताबुद्धिं। तत्रापि संयोगसंसर्गातिरिक्तसम्बधानवच्छिन्नगुणीयत्वप्रकारकबुद्धित्व-स्यैव प्रतिबध्यतावच्छेदकत्वेन तुल्ययुक्त्या वक्तव्यत्वा दिति-वाच्यं सम्बन्धभेदेन प्रतिबध्यप्रतिबन्धकभावपार्थक्येनैव निर्वचननियमात् उक्तसंयोगसम्बन्धस्थले संयोगसम्बन्धाव-च्छिन्नप्रकारताक बुद्धित्व मेवप्रतिबध्यतावच्छेदकं वाच्यं संसर्गानवच्छिन्नप्रकारताकबुद्धे रप्रतिबध्यत्वेन प्रतिबध्यताव-च्छेदकीभूतप्रकारतायां संसर्गानवच्छिन्नत्वनिवेशस्या नावश्य-कत्वात्।

अथोक्तयुक्त्या भ्रमत्वनिर्वचनेऽपि तत्सम्बन्धावच्छिन्न-तदभाववति तत्सम्बन्धारिक्तसम्बन्धानवच्छिन्नतद्विशेषणता कत्वरूप मनुगत मेव धर्म्मसम्बन्धसाधारणं भ्रमत्वं वाच्य मिति चेन्न, वह्नित्वावच्छिन्नप्रतियोगितासम्बन्धेन वह्निमान-भावइति ज्ञानस्यापि संयोगसम्बन्धावच्छिन्नप्रतियोगिताक

वह्नित्वावच्छिन्नाभाववति प्रतियोगित्वे संयोगातिरिक्तसम्बन्धानवच्छिन्नाया वह्नित्वावच्छिन्नत्वनिष्ठसंसर्गतावच्छेदकीयविशेषणताया निरूपकत्वेन भ्रमत्वापत्तेः। अनुगतरूपेण भ्रमत्वनिर्वचनस्यैवाभिप्रेतत्वेन प्रकारतावच्छेदकसम्बन्धभेदेन, लक्षणभेद इत्यस्यापि दुर्वचत्वात्।

अनुगमस्तुः—प्रतियोगिताविशिष्ट विशेष्यताकत्वम्, वैशिष्ट्यं च स्वनिरूपिताभाववन्निष्ठत्व, स्वविशिष्टविशेषणता निरूपितत्वोभयसम्बन्धेन। विशेषणतायां प्रतियोगितावैशिष्ट्यं च स्वावच्छेदकधर्मावच्छिन्नत्व, स्वानवच्छेदकसंबन्धानवच्छिन्नत्वोभयसम्बन्धेन। केचित्तु तत्प्रकारकत्वघटिततत्भ्रमत्वानुपपत्ते रिति ग्रन्थार्थस्तु स्वरूपसम्बन्धावच्छिन्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वाभाववति तत् सम्बन्धेनप्रमेयत्वप्रकारकत्वरूप प्रमेयत्वभ्रमत्वानुपपत्तिरिति सम्बन्धस्य निरुक्तस्यालीकतया तद्घटितभ्रमत्वासिद्धिरिति तात्पर्य्यम्॥ ६०॥

केचित्तु—इत्यपिवदन्तीतिगाटी।

एतन्मते असमानाकारकज्ञानस्य प्रागेवाप्रतिबन्धकत्वनिर्वचनात् साध्यव्याप्यो हेतु रिति दोपलक्षणघटकानुमितौ स्वरूपसम्बन्धेन प्रकारीभूतव्याप्तिज्ञानस्य हेतुः साध्यस्य व्यभिचारीत्यस्य दर्शितव्युत्पत्तिलभ्यतादृशवृत्तित्वस्वरूपसम्बन्धवन्निष्ठाभेदसम्बन्धावच्छिन्नप्रकारताक हेतुविशेष्यकज्ञानस्यप्रतिबन्धकत्वविरहात् प्रथमायानिरूपितार्थकत्वस्य

व्युत्पत्तिविरुद्धत्वेन च न सम्यक्त्वमुक्तार्थस्ये त्यस्वरससूचनाय वदन्तीति ।

पूर्ववंमतेतु असमानाकारकज्ञानस्य प्रागेवाप्रतिवन्धकत्व स्वीकारा न्नायं दोषः । निरर्थकत्वं च स्वमते भट्टाचार्य्येण मत्वर्थीयस्य समर्थित मवयवग्रन्थे इति नानुपपत्तिः ॥ ६१ ॥

स्वव्यधिकरणप्रकाराद्यवच्छिन्नान्या या विषयता तत्तद्‌निरूपकत्वं इतिगादी । अथात्र क स्तावदनुगमः न तावत् प्रकारताविशिष्टविशेष्यताशून्यत्वं वैशिष्ट्यं च स्वविशिष्टप्रतियोगिताकाभाववद्वृत्तित्व, स्वनिरूपितत्वोभय सम्वन्धेन । प्रतियोगितायां स्ववैशिष्ट्यं च स्वावच्छेदक धर्मावच्छिन्नत्व स्वावच्छेकसम्वन्धावच्छिन्नत्वोभयसम्वन्धेन तथासति रंगे स्वरूपतोरजतत्वावगाहिन इदं रजतमिति ज्ञानस्य प्रमात्वापत्तिः ।

नचोक्तसम्वन्धघटकप्रतियोगितायां प्रकारतावैशिष्टं स्वावच्छिन्नत्व स्वावच्छेक सम्बन्धावच्छिन्नत्वोभयसम्वन्धेन विवक्षणीय मिति रजतत्वनिष्ठनिरवच्छिन्न प्रकारताया अवच्छेदकाप्रसिद्धावपि विवक्षितोभयसम्वन्धेन रंग विशेष्यतायां सत्तान्नोक्तापत्ति रिति वाच्यं । विशिष्टसत्तावान् गुण इति ज्ञानीयविशिष्टसत्तानिष्टप्रकारत्वावच्छिन्न सत्तानिष्ट प्रतियोगिताका भाववद्वृत्तित्वस्यगुणनिष्टविशेष्यतायामसत्वेन विशिष्टसत्तावान् गुण इति ज्ञानस्य प्रमात्वापत्तेः । यदिचावच्छिन्नप्रकारताविशिष्टविशेष्यताशून्यत्वेसति निरवाच्छिन्नप्रकारता

विशिष्ट विशेष्यताशून्यत्वं भ्रमसामान्यभिन्नत्वं वैशिष्ट्यं च यथायथं पूर्वोक्तसम्बन्धेन। तथा च विशिष्टसत्तावान् गुण इति ज्ञानस्य अवच्छिन्नप्रकारताविशिष्टविशेष्यताशून्यत्वविरहेन निरुक्तेदं रजत मिति ज्ञानस्य च निरवच्छिन्नप्रकारताविशिष्टविशेष्यताशून्यत्वेन च प्रमात्वापत्तिवारणं सुघट मित्युच्यते तथापि प्रकारत्वेन घटत्वावगाहिज्ञाने धर्म्मिणि विषपितया स्वरूपतो घटत्वप्रकारताकस्य अवच्छिन्न प्रकारताविशिष्ट विशेष्यताशून्यत्वेसति निरवच्छिन्नप्रकारताविशिष्टविशेष्यताशून्यत्वेन प्रमात्वापत्तिः।

अत्रोच्यते विशेष्यताविशिष्टप्रकारताशून्यत्वं भ्रमसामान्यभिन्नत्वं, वैशिष्ट्यं चस्वनिरूपितत्व, स्वविशिष्टवृत्तितावदन्यत्वोभयसम्बन्धेन। वैशिष्ट्यं च वृतितायां स्वाश्रयनिष्ठाधिकरणतानिरूपितत्वसम्बन्धेन। वृत्तितावत्ताच स्वावच्छेदकसम्बन्धावच्छिन्नत्व,—स्वसामानाधिकरण्य, स्वानवच्छेदकानवच्छिन्नत्व,— स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धावच्छिन्नाधेयत्वैतच्चतुष्टयसम्बन्धेन। ह्रदो वह्निमानिति ज्ञानस्य प्रकारतायां ह्रदनिष्ठाधिकरणतानिरूपितकालिकसम्बन्धावच्छिन्न वृत्तितात्त्वसत्वेन प्रमात्वापत्तिवारणाय स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशः। रङ्गे रजतत्वागाहिन इदं रजतमिति ज्ञानस्य रजतत्वनिष्ठनिरवच्छिन्नप्रकारतायां रङ्गनिष्ठाधिकरणतानिरूपितरङ्गत्वनिष्ठनिरवच्छिन्नवृत्तितावत्त्वसत्त्वेन प्रमात्वापत्तिवारणाय स्वसामानाधिकरण्य निवेशः। विशिष्ट

सत्तावान्गुणइतिज्ञानस्य विशिष्टसत्तात्वावच्छिन्नप्रकारतायां गुणनिष्ठाधिकरणतानिरूपितसत्तात्वावच्छिन्नवृत्तितावत्त्वसत्त्वेन प्रमात्वापत्तिवारणाय स्वानवच्छेदकानवच्छिन्नत्वनिवेशः । प्रकारत्वेन घटत्वावगाहिनि ज्ञाने विषयितया स्वरूपतो घटत्व-प्रकारकज्ञानस्य निरवच्छिन्नघटत्वप्रकारतायां विशेष्यीभूत-ज्ञाननिष्ठाधिकरणतानिरूपितविषयित्वसम्बन्धावच्छिन्न घटत्व-त्वावच्छिन्नवृत्तितावत्त्वसत्त्वेन प्रमात्वापत्तिवाराणाय निरु-काधेयत्व निवेशः । तथा चोक्तप्रकारतायां स्वानवच्छेदकान-वच्छिन्नत्वसत्त्वेऽपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन निरूपकतावृत्तित्वविरहात् आपत्तिविरह इति ध्येयम् ॥ ६२ ॥

तर्हि यथार्थेतिव्यर्थमितिशि गा-टी ।

अथ संशयाहार्य्यज्ञानवारणाय अनाहार्य्यत्वनिश्चयत्व-निवेशस्यावश्यकतया तदपेक्षया लाघवेन यद्रूपावच्चिन्नविषय तायां यथार्थज्ञानीयत्वनिवेशन मेवोचितं इतियथार्थपदसार्थक्य सम्भवे तद्वैयर्थ्याभिधान मसंगतमिति । नच ह्रदो वह्निमान् वह्न्यभाववांश्च वह्न्यभाववद्ह्रदो वह्निमा नित्याकारकज्ञानानां यथार्थपदेनवारणेऽपि ह्रदो वह्निमानिति निश्चयोत्तरकालीने च्छाप्रयोज्यवह्न्यभाववान् ह्रद इत्याकारकप्रत्यक्षस्याहार्य्यतया न तेन तद्वारणसम्भव इत्यनाहार्य्यत्वनिवेशन मावश्यक मिति वाच्यं . उक्ताहार्य्यज्ञानव्यक्तीनां भेदनिवेशे ऽपि नियताहार्य्य समूहालम्बनाहार्य्य व्यक्तीनां भेदानिवेश एव यथार्थपदप्रवेशे लाघवम्सम्भवा दिति चेन्न आहार्य्यव्यक्तीनां तत्तद्व्यक्तित्वेन

भेदा लक्षणे न निवेश्यन्ते गौरववात् । अपितु इच्छाविशिष्टप्रत्यक्षेन वैशिष्ट्यं च सविषयकत्वस्वसामानाधिकरण्य स्वोत्तरत्वैतत्रितयसम्बन्धेन तथाच यथार्थपदाप्रवेशे कतिपयाहार्य्यव्यक्तिभेदानिवेशनिवन्धनलाघवप्रतिसन्धानं व्यर्थमिति ।

नच तथापि संशयान्यत्वाप्रवेशेनापि लाघव मितिवाच्यं तदप्रवेशे वृक्षः कपिसंयोगीत्यत्र कपिसंयोगाभाववद्वृक्षरूपवाधेऽव्याप्त्यापत्तेः उक्तविशिष्टविषयकज्ञानस्य वृक्षः कपिसंयोगवान्नवेति यथार्थसंशये सत्त्वात् नच वृक्षः कपिसंयोगीति वुद्धौ निरवच्छिन्नस्वरूपसम्बन्धेन वृक्षधर्म्मिककपिसंयोगाभाववत्त्वनिश्चयस्यैव विरोधितया शुद्धस्वरूपसम्बन्धेन तादृशनिश्चयस्या नुमितिप्रनिवन्धकतातिरिक्तवृत्तित्वात् उक्तविशिष्टस्य वाधत्वं नांगीक्रियते निरवच्छिन्नस्वरूपसम्बन्धेन तादृशविशिष्टस्यचाप्रसिद्धेः नास्त्युक्तस्थले वाध इति सद्धेतु रेव कपिसंयोगसाध्यकतद्वृक्षपक्षकतद्वृक्षत्वहेतु रिति वाच्यं वृक्षधर्म्मिककपिसंयोगवत्तावुद्धिं प्रति अव्याप्यवृतित्वज्ञानाभावविशिष्टवृक्षधर्म्मिक शुद्धस्वरूपसम्वावच्छिन्नकपिसंयोगाभावप्रकारकनिश्चयस्यापि विरोधितया अथवा विरुद्धत्वग्रह काले समानाधिकरण द्वय कोटिक संशस्यापि यथार्थत्वेन, वह्न्यभावविरोधिजलमितिज्ञानोत्तरं ह्रदोवह्न्यभाववान् जलवान्नवेतिज्ञानस्य संशयात्मकस्य प्रतिबन्धकत्वविरहेन संशयान्यत्वनिवेशस्यावश्यकत्वादिति तत्र तादृशविशिष्टस्य वाधत्व स्यावश्यकत्वात् ॥ ६३ ॥

नव्यास्तु—गदाधरमते अनुगतरूपेण प्रामाण्यज्ञान-व्यक्तीनां निवेश्यतया यद् यदप्रामाण्य ज्ञानसत्वे पर्व्वतोवह्नि-मानितिनिश्चयसत्वे उत्तरकालं पर्व्वतोवह्न्यभाववानिति बुद्धिः प्रामाणिकी तत्तदप्रामाण्यज्ञानाभावविशिष्टनिश्चयत्वेन प्रति-वन्धकत्वं।

नचैवं यत्तदर्थयो रननुगमाल्लक्षणस्या ननुगम इति वाच्यं स्वाश्रयसामानाधिकरण्य सम्वन्धेन तत्तत्कूटत्वविशिष्ट-निश्चयत्वेन प्रतिवन्धकत्वं वाच्यं। नन्वेवं सतिप्रतिवध्य-प्रतिवन्धकभावनिर्व्वचने प्रतिवन्धकताया अनुगतत्वं किन्तु लक्षणे वाधव्यभिचारादीनां प्रतिवन्धकत्वानां तद्रूपेणानुगमा-सम्भवात्।

सत्यं अभावविशिष्टान्ययद्रूपावच्छिन्नविषयताशालि-निश्चयत्वव्यापकं प्रकृतानुमितित्वव्यापकप्रतिवध्यतानिरूपित-प्रतिवन्धकत्वं तद्रूपवत्त्वं, वैशिष्ट्यंच स्वप्रतियोगिमन्निष्ठत्व स्वावच्छिन्नप्रतिवन्धकतावच्छेदकत्वोभयसम्वन्धेन। स्वप्रति-योगिमत्ताच विशेष्यत्व सामानाधिकरण्योभय स्वरुपान्यतर सम्वन्धेन, एवञ्च अनाहार्यत्व संशयान्यत्वाप्रवेश निवन्धन दोषाणामपि वारणसम्भवाद् यथार्थपद वैफल्यमिति ॥ ६४ ॥

भ्रमविषयविशिष्टस्याप्रसिद्धत्वादिति, शि-गाटी। अलीक धर्म्मिकाभावस्या स्वीकारात् भ्रमविषयविशिष्टनिष्ठप्रसिद्धत्वा-भावरूपमर्थं कल्पयितु न शक्यते, सत्यं भ्रमविषयतायां प्रकृतानुमितित्वव्यापकप्रतिवध्यतानिरूपित प्रतिवन्धकत्वाभाव-

वत्त्वं विवक्ष्यते स्ववृत्तिरूपावच्छिन्नवत्वसम्बन्धेन, स्वं प्रतिबन्धकतावृत्तित्वं स्वावच्छिन्नविषयताशालिनिश्चयत्वव्यापकत्वसम्बन्धेनेति न दोषः। अथवा भ्रमविषयस्य प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति विषयितानिरूपकतावच्छेदकत्वाभावादित्यर्थः ॥ ६५ ॥

नच ज्ञायमानविषयस्य प्रतिबन्धकत्वे तत्पुरुषीयत्वस्यान्तर्भावेण प्रतिवध्यप्रतिबन्धकभावकल्पनस्यावश्यकतया गौरवात् ज्ञानस्य तथात्वे तु समवायेन प्रतिवध्यप्रतिबन्धकभावकल्पनादेव व्यभिचारवारणेन न तत्पुरुषीयत्वनिवेशः। तज्ज्ञायमानदोषप्रतिबन्धकतामते किमिति तद्रूपेण प्रतिबन्धकत्वपरिकल्पनवीज मिति वाच्यं विरोधित्वप्रतिबन्धकत्वयोरैक्यस्यानुभविकत्वेन वह्न्यभाववद्ह्रदो वह्निमत्ताबुद्धे विरोधीति सार्व्वजनीनानुभवरक्षार्थ मेव विषयस्यप्रतिबन्धकत्वं कल्पनीयम् ॥ ६६ ॥

हेतुप्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटकहेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य तत्प्रकारतायां वावच्छिन्नार्थकतृतीयान्तलभ्यवह्नित्वावच्छिन्नत्वस्यान्वय इत्येवोपगन्तव्यत्वाददि गा-टी ।

हेतौ वैशिष्ट्यविधया वह्नित्वस्या न्वयेऽपि वह्नित्वावच्छिन्नप्रकारतालाभानुरोधेन पुनर्वह्नित्वस्या वच्छिन्नत्वसम्बन्धेन प्रकारतायां भान मभ्युपेयं अत स्तत्प्रयास मन्तरेणेष्टसिद्ध्यर्थं पक्षान्तर माह प्रकारतायाम्वेति ॥ ६७

एव मपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रम मादायातिप्रसंगादिति यथार्थपदसार्थक्य मिति गा-टी ।

नन्वत्रापि वैशिष्ट्यार्थकतृतीयान्तस्य विशेष्ये ऽन्वयाभ्युपगमे व्यवहारवाधसौकर्य्यं कथ मुपेक्षितं ? वैशिष्ट्यं च तादात्म्येन ग्राह्य मिति चेन्न, अत्रोभयमत एव दूषधातोः साधनपदस्य वा लाक्षणिकत्व मिति वह्नित्वावच्छिन्नत्वस्यापि लक्ष्यार्थे निवेशकल्पनं सन्दर्भसंगतं । इदानीन्तु वह्निनेत्यस्य साधनान्वयित्वाभ्युपगमे नास्ति लक्षणावश्यकता अनुमित्यर्थक साधनपदान्वयितृतीयार्थज्ञानजन्यत्वैकदेशे ज्ञाने वह्नित्वावच्छिन्नप्रकारतासम्बन्धेन वह्ने रन्वयाभ्युपगम एवानुमितौ वह्नित्वावच्छिन्नहेतुकत्वलाभस्या व्याहतत्वात् लक्षणाभ्युपगमस्यानावश्यकत्वं विशेषये तृतीयान्तस्या न्वये पूर्ववत् साधनपदस्य लाक्षणिकत्व मवश्य मभ्युपेय मिति विशेषः ॥ ६८ ॥

अथवेतरभेदानुमापक मेवेदं लक्षणं तथाच पर्वतपक्षकवह्निहेतुकधूमसाध्यकदुष्टलक्षणस्य तथाविधानुमितिविरोधिज्ञानविषयव्यभिचारादिभ्रम मादाय सद्धेता वितरभेदव्यभिचारित्वात् यथार्थपद मिति गाटी ।

अथास्य लक्षणस्येतरभेदानुमापकत्वे प्रतिवन्धकप्रकारकनिरुक्तसम्बन्धावगाहियथार्थ ज्ञानविशेष्यत्वमात्रस्यैव लक्षणार्थत्वेऽपि व्यभिचारादिविरहादितरांशस्य वैयर्थ्य मिति । नच सद्धेतावपि तदानीं प्रतिवन्धकप्रकारकप्रमाविशेष्यत्व रूप

लक्षणसत्त्वेन व्यभिचार इति वाच्यं तत्र तादृशानुमितौ दुष्टेतरभेदस्यैवाप्रसिद्धया साध्याप्रसिद्धे रेव व्यभिचारविरहा दिति चेन्न सामान्यमुखीव्याप्त्यनुरोधेन तादृशानिवेशात्। सा च यो यत्पक्षक यत्साध्यकयद्धेतुकानुमितिप्रतिवन्धकप्रकारक निरुक्तसम्बन्धावगाहि यथार्थज्ञान विषयतावान स तत्पक्षकतत्साध्यक तद्धेतुकानुमितिदुष्टशब्दप्रतिपाद्येतरभिन्न इत्येवंरूपा तथाच हेतुभूतलक्षणे तादृशानुमित्यप्रवेशे सामान्यमुखीव्याप्तिभङ्गप्रसङ्ग इति।

अथ तथापीतरभेदसाधन मनुपपन्नं प्रमेयरूपहेतुकस्थले तदितराप्रसिद्धे रिति चेन्न, प्रतियोगितावच्छेदकवत्यपि धर्म्मान्तरावच्छेदेन भेदसत्तास्वीकारात् सत्तात्वावच्छेदेन सत्तायां विशिष्टसत्ताभेदः विशिष्टसत्तात्वावच्छेदेनच्च सत्ताभेदः स्वीक्रियते तद्वदत्रापि तादृशदुष्टप्रमेयभेदो घटत्वाद्यवच्छेदेन प्रमेय एव प्रसिद्धत्वात्। अथवाप्रमेयहेतुकस्थले इतरभेदानुमापकत्वासम्भवे ऽपि दर्शितस्थल एव तत्सम्भवात् यथार्थपदसार्थक्य रूपेष्टसिद्धि रव्याहतेति ॥ ६६ ॥

ज्ञानं चात्र स्वज्ञानविषयप्रकृतहेतुतावच्छेदकसम्बन्धावगाहिग्राह्यं इतिभट्टाचार्य्यः ॥ नचैवं निरुक्तसम्बन्धेन तादृशप्रतिवन्धकवत्त्वस्य लक्षणार्थत्वे एवसम्यक्तेज्ञानघटितगुरुतरलक्षणं कथ मनुसृत मिति नाशंकनीयं, तथात्वे तृतीयलक्षणाभेदापत्ते रिति ॥ ७० ॥

ननु तथापि ह्रदो वह्निमान् प्रमेयधूमादित्यादौ प्रमेयत्व रूपस्वज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वस्यघटादौसत्त्वाद् ह्रदे प्रमेयधूमेन वह्निसाधने घटस्य दुष्टत्वापत्तया तथैव व्यभिचार स्तद्दोषवारणाय प्रकृतहेतुतावच्छेदकतात्वावच्छिन्नप्रतियगिता-कपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्ति निरूपकतावत्त्वसम्बन्धेन तथात्वविवक्षणे च ह्रदो वह्निमान् काञ्चनसयधूमादित्यत्र हेतोर्दुष्ट-त्वानुपत्तिरितिचेन्न स्वज्ञानविषयप्रकृहेतुत्वाधिकरण वृत्तिवृत्ति-तावच्छेदक हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्य-नुयोगितावच्छेदकरूपवृत्तिनिरूपकतावत्त्वसम्बन्धेन। वृत्तित्वंच स्वावच्छेदकतात्वेत्यादिना। अथवा प्रकृतहेतुताव्याप्यहेतु-तावच्छेदकवत्त्वसम्बन्धावगाहितादृशज्ञानं ग्राह्य मित्यदोषः।

अथवा हेतुनिरूपितवृत्तिताविशिष्टावच्छेदकत्वं ग्राह्यं वैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन तथाच प्रमेयवह्नि-हेतुकस्थले प्रमेयत्ववह्नित्वयो रवच्छेकत्वं तादृशवृत्तिताविशिष्ट मिति नातिव्याप्तिः। साधनाप्रसिद्धौ धूमत्वस्यै वावच्छेदकत्वं न तु काञ्चनमयत्वस्येति नाव्याप्तिः। नच प्रमेयहेतौ घटो दुष्ट इति व्यवहारापत्ति रिति वाच्यं तस्येष्टत्वात्॥ ७१॥

किन्तु ज्ञानीयपक्षतावच्छेदकाद्यवच्छिन्नविषयतानिरूपित-साध्याभावत्वावच्छिन्नविषयतावत्त्वेन तादृशविषयतया ज्ञान-विशिष्टत्वेन वा प्रतिबन्धकत्व मिति गादी॥ लाघवात् पक्षान्तर मुक्तं लाघवं च विषयतायाः संसर्गविधया प्रवेशतो बोध्यं। अथात्र प्रतिबध्यतावच्छेदकप्रतिबन्धकतावच्छेकसम्बन्धौको ?

नचविषयतया तद्वृत्तिबुद्धिं प्रति तादात्म्येन तादृशज्ञानविशिष्ट-त्वावच्छिन्नस्य च प्रतिबन्धकत्व मिति वाच्यं। हृदत्वेन घटावगाहिज्ञानविषयसाधारण्ये प्रतिबन्धकत्वानुपपत्ते रिति नच कालिकसम्बन्धेन प्रतिबध्यत्वप्रतिबन्धकत्व कल्पनेनैव सामञ्जस्य मिति वाच्यं तत् पुरुषस्य हृदो वह्न्यभाववानिति निश्चयसत्त्वे पुरुषान्तरस्य हृदो वह्निमानिति ज्ञानानुदय प्रसङ्गात्, तद्दोषवारणाय तत्पुरुषीयत्वस्य प्रतिबध्यतायां निवेशेपि हृदत्वादिनाऽतीत हृदावगाहि निश्चयसाधारण प्रतिबध्य प्रतिबन्धक भावानुपपत्तिरतो महाकालानुयोगिककालिक-संसर्गेण प्रतिबध्यत्वं प्रतिबन्धकत्वं च वाच्यं वस्तुतस्तु कालिकेन तथात्वं वाच्यं इति। तथा च तादृशविषयत्वादि-निरूपित विशेष्यतावच्छेदकत्ववत्त्वेन घटत्वादेः प्रतिबन्धकत्वं कल्पनीयं। एवंच सर्वत्र प्रतिबन्धकतावच्छेकविषयतावच्छेदक नित्यवस्तुन एव प्रतिबन्धकत्वं कल्पनीयं इति कालान्तरीय-वस्तुविषयज्ञानेऽपि नदोषः॥ ७२॥

यद्रूपावच्छिन्नविषयतासामान्यं प्रतिबन्धकतावच्छेदकं तद्रूपविशिष्टप्रकारकप्रमाविशेष्यत्व मेव विवक्षणीय मिति गादी। पाषाणमयो न वह्निमानित्याकारकज्ञानसमानकालीन ज्ञानविषय पाषाणमयत्ववत्पर्वतेऽतिव्याप्ति रिति चेन्न ज्ञानभेदेन विषयतायानानात्वात्। अथवा प्रतिबध्यतायां ज्ञानवैशिष्ट्या-नवच्छिन्नत्वेन विशेषणीयत्वात्। नच सत् प्रतिपक्षादौ दोषलक्षणा गमनजन्यतत्रत्यहेता वव्याप्तिरितिवाच्यम् तत्रापियत् किंचित्

प्रतिवन्धकता मादायलक्षणसमन्वयात्। वस्तुतस्तु यद्रूपावा-च्छिन्नविषयताशालिनिश्चयसामान्यं प्रकृतानुमितिप्रतिवन्धकता-वच्छेदक मेताहशनिवेशाभिप्रायेणात्र ज्ञानस्य नानात्वा न्नाव्याप्ति रिति ॥ ७३ ॥

यद्यपि अस्य दुष्टलक्षणत्वे ज्ञायमानदोषप्रतिवन्धकतामता नाश्रयणेऽपि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिवन्धक प्रमाविषयहेतुतावच्छेदकत्वं तद्रूपावच्छिन्नपक्षकसाध्यकस्थले तेनरूपेण दुष्टत्व मित्यर्थकतामुपगम्य यथार्थपदसार्थक्य मुपपादयितुं शक्यते इति गाटी—

अथ यत्र ह्रदादौ वह्निसाधने वह्निमद्ह्रदकालीनधूमादे र्हेतुतास्थले हेतुतावच्छेदकविषयिणी दोषविषयकप्रमा नियतमाहा र्य्याकारिकैव सम्भवति तत्राप्रतिवन्धकापत्त्या लक्षणागमनमिति चेन्न तादृशानुमितिप्रतिवन्धकतावच्छेदकी भूतविषयताशालिप्र-माविषयहेतुतावच्छेदकवत्वस्य। विवक्षणीयत्वात्। समानाका-रकज्ञानीयविषयताया ऐक्येन हेतुतावच्छेदकाविषयक तादृशज्ञा-नीय विषयताया आहार्य्याकारकज्ञानीयविषयताया अभेदा न्न काप्यनुपपत्ति रिति। एवं प्रतिवन्धकप्रमीयविषयताशालि-ज्ञानविषयहेतुतावच्छेदकवत्त्वविवक्षणेन यत्रहेतुतावच्छेकविषय-कज्ञानं नियतं भ्रम एव सम्भवति तत्राऽपि नास्ति दोषा-वकाश इति ॥ ७४ ॥

* इति प्रथमलक्षणम् *

द्वितीय लक्षणस्य ।

लिङ्गंशनिवेशस्य निष्प्रयोजनकतया आह लिङ्गमविवक्षित मिति गादी—नचात्र स्वसमानाधिकरण साध्यव्याप्यताव-च्छेदकधर्मान्तरघटितत्वरूपव्यर्थत्व सम्भवे कथं निष्प्रयोजन-कत्वमात्रमुक्तं भट्टाचार्य्येणेतिवाच्यं अखण्डाभावघटकतया तस्य सार्थकयसम्भवात्। अथात्र लिङ्गाज्ज्ञान मिति पञ्चमीसमास माश्रित्य यद्रूपावच्छिन्नविषयताशालि अनुमितित्वं प्रकृतानु-मितित्वव्यापकप्रतिवध्यतानिरुपितप्रतिवन्धकतानतिरिक्तवृत्तीत्य र्थकरणा दनाहार्य्यत्वसंशयान्यत्वाद्यप्रवेशेन लाघवात् लिङ्गांश-प्रवेशस्य न निष्प्रयोजनकत्वं ? मैवं वह्निपक्षकावृत्तित्वसाध्यक स्थले वह्निमतोऽपि दोषत्वेन वह्निमानित्याकारक निर्धर्मिताव-च्छेदककानुमिते रप्रसिद्धयाऽव्याप्तेः ।

नच तत्र वह्निमस्वान् घट इत्याकारकानुमितिमादाय लक्षणसमन्वयः सम्भवेदितिवाच्यम् अव्यापकीभूतविषयिता शून्यत्वाभावेन तादृशाकारानुमिते र्धर्त्तु मयोग्यत्वात्। नचैवं यत् किञ्चिद्विशेष्यतानिरूपित यद्रूपावाच्छिन्न विषयित्वाव्या-पकीभूतविषयिताशून्यत्व निवेशादे वन निरुक्ताव्याप्तिप्रसङ्ग इतिवाच्यम्। पर्वतपक्षक वह्न्यभाव साध्यक महानसीय-वह्नीतर वह्न्यभाववत् पर्वतकालीन धूमहेतुकस्थले इतरवाध घटित निरुक्तहेतुज्ञानजन्याया महानसीय वह्न्यनुमितेरानु-

भविकतया वह्निमत्पर्वतरूपदोषस्य दुर्घटत्वप्रसंगात्। यदि च लिंगज्ञानमित्यत्र लिंगपदस्य यत्किञ्चिल्लिंगकत्वं व्याख्याय निरूक्ताव्याप्तिदानप्रयासो विफलीकर्त्तुं शक्यते—

तथापि अप्रामाण्य ग्रहाभाव वैशिष्ट्यस्य निवेशनीयतया अप्रामाण्यज्ञानानां नानात्वेन वहुतर कार्यकारणभावप्रसक्ति वारणाय अभावविशिष्टान्यत्वरूपेणैवलाघवतोनिवेशः कार्यः। वैशिष्ट्यञ्च स्वप्रतियोगिमत्त्व, स्वावच्छिन्नप्रतिवन्धकतावच्छेदकविषयितानिरूपकतावच्छेदकरूपावच्छिन्नविषयि तावत्त्वोभय सम्बन्धेन। स्वपतियोगिमत्त्वं च एकक्षणावच्छिन्नैकात्म वृत्तित्वसम्बन्धेन।

तथाच संशयान्यत्वानाहार्यान्यत्वादेस्तावतैव प्रवेशेन लाघवविरहात्लिंगांशस्यनिष्प्रयोजनकत्वमुक्तम्। वस्तुतस्तुः— यादृशांकुरविशेषे दोषविषयकानुमितेरप्रसिद्धिस्तादृश स्थलीयदोषस्यासंग्रहभियाअनुमित्यात्मकज्ञानमात्रस्य निवेशयितुमशक्यत्वेन लिंगपदस्य निष्प्रयोजनकत्वाभिधानस्य सम्यकत्वादिति ॥ ७५ ॥

नचह्रदोवह्निमान् वह्निमद्ह्रदादित्यादौ वह्निमान् ह्रदो वह्निव्याप्यवद्ध्रदादित्यादौच लिङ्गविषयक दोष विषयकनिश्चयस्य नियतमेवाहार्य्यतया अव्याप्तिः सम्भवेकथं लिंगांशप्रवेशस्य निष्प्रयोजनकत्य मुक्तमितिवाच्यं, लिङ्गविषयकमित्यत्र लिङ्गनिष्ठविषयतायाः निश्चयान्तर्गतत्वात् लिङ्गतावच्छेदकस्याप्रवेशात् ॥ ७६ ॥

ननुयद्विषयकलिङ्गविषयकज्ञानस्यानुमितिविरोधित्व मित्यर्थे अव्यापकीभूतविषयिताशून्य दोष विषयक निश्चया-प्रसिद्धया असम्भवसम्भवे कथं निष्प्रयोजनकत्व मुक्तमितिचेन्न, स्वरूपासिद्धौ लक्षणगमनान्नासम्भवः। तथाचवाधेऽव्याप्तिः? सत्यं यद्रूपावच्छिन्न विषयतायाः अव्यापकीभूत विषयिता-शून्यज्ञानवृत्तित्वोपलक्षित यद्रूपावच्छिन्न विषयक लिङ्गविषयक निश्चयत्वव्यापकं प्रकृतानुमिति प्रतिवन्धकत्वं तत्त्वमि-त्यर्थे समूहालम्बनज्ञानीयविषयतामादायलक्षणसमन्वयेना-व्याप्त्यभावात्, तथाचात्र लिङ्गांशप्रवेशस्य निष्प्रयोजनकत्वं। यादृशस्थले दोषविषयक निश्चयएवातिरिक्त पदार्थ विषयकः अप्रामाण्यग्रहास्कन्दितोवा तादृशस्थलीयदोषे अव्याप्ति-वारणार्थं विषयतायां तादृशज्ञानीयत्वमेवनिवेशनीयं। तथाच समानाकारकज्ञानीयविषयतायाऐक्यात्संगतिरिति। यद्वा, पूर्वोक्त निवेशादेव वारणं ह्रदत्वादिना धूमादि लिङ्ग विषयितायावह्न्यभाववद्ध्रद इति ज्ञानेऽपि सत्त्वादिति। अथवा यद्रूपावच्छिन्न विषयितानिरूपित यद्रूपावच्छिन्न विषयितात्वं यादृश विशिष्टविषयिता समानाधिकरणाभाव प्रतियोगिता-वच्छेदकं तद्रूपावच्छिन्नविषयितानिरूपिततद्रूपावच्छिन्न विषयिताशून्यत्वरुपाव्यापकीभूत विषयिता शून्यत्वस्य निष्कृ-ष्टार्थाभिप्रायेण निरुक्तदोषानवकाशादिति॥ ७७॥

तेनसम्बन्धेन पर्व्वतादिमत्तायाः पर्व्वत महानसान्यतरत्व रुप सद्धेतौ सत्त्वेऽपि प्रसिद्ध धूमादिहेतावसत्त्वादिति गादी।

नचपर्व्वतत्वसामानाधिकरण्येन वह्निसाध्यक पर्व्वतमहान-सान्यतरत्वादिहेतुकस्थलेपर्व्वतत्वव्यापक वह्न्यभाव प्रतियोगि-कस्वरूपस्याप्रसिद्ध्याकथं पर्व्वतवत्त्वस्थ पर्व्वत महानसान्य-तरत्वरूप हेतौप्रसिद्धिरिति वाच्यं, पर्व्वतत्वसामानाधि-करण्येन पर्व्वत महानसान्यतरत्वा वगाहि तादृशान्यतरत्ववत् पर्व्वते वह्न्यभाव इत्याकारकव्यभिचारमादाय शुद्धस्वरूप सम्वन्धावच्छिन्नाधेयता सम्वन्धेन पर्व्वतवत्तायातादृशान्य-तरत्वहेतौ सम्भवात्।

अथवा पर्व्वते वह्न्यभाव इति निश्चयस्य वह्न्यभाव व्याप्यपर्व्वतत्वप्रतियोगिकसमवायसम्वन्धावच्छिन्न पर्व्वतत्व निष्ठावच्छेदकताकशुद्ध स्वरूपसम्वन्धावच्छिन्नाधेयतासम्वन्धा-वच्छिन्नप्रकारतानिरूपितवह्न्यभावत्वावच्छिन्न विशेष्यता-शालि निश्चयत्वेन प्रतिवन्धकतयातादृश प्रकारताव-च्छेदक सम्वन्धेन पर्व्वतवत्तायास्तादृशान्यतरत्व हेतौ सत्त्वेन धूमादिहेतावसत्त्वाच्चेति लिखनसंगतेः। एतच्च पर्व्वतत्वा-वच्छेदेन वह्न्यभावनिश्चये वह्न्यभावव्याप्य पर्व्वतत्व प्रतियो-गिकत्वं उद्देश्य तावच्छेदकता घटक सम्वन्धेभासते इति मताभिप्रायेण ॥ ९८ ॥

नचवह्न्यभावव्याप्यः पर्व्वते इत्याकारक पक्षविशेषणक भ्रमज्ञान प्रकारतापन्न पर्व्वत मादाय पर्व्वतो वह्निमान् धूमादि-त्यादौ प्रसिद्धधूम हेतावतिप्रसङ्ग सम्भव इतिवाच्यं? तावतापि वाधभ्रमस्थलेपक्षविशेष्यकभ्रममादायैव दुष्टत्वापत्तिः

सम्भवतीति अनु रपिविशेषोऽध्यवसायकर इति न्यायेन तद्ग्रन्थोक्ति सम्भवात् ॥ ७६ ॥

नच धूमत्ववत् पर्व्वतो वह्निमान् धूमादित्यादौ स्वरूपेण धूमत्वाभावप्रकारकत्वेनानुमितिप्रतिबन्धकत्वात् तेनसम्बन्धेन धूमत्वाभावस्य धूमादावसत्त्वाद्दुष्टत्वानुपपत्तिरिति चेन्न, धूमत्वाभावस्येव धूमत्वनिष्ठस्य समावायेन पर्व्वत वृत्तित्वाभावस्यापि आश्रयासिद्धित्वात्। नच रूपत्ववत् पर्व्वतोवह्निमान् पर्व्वतीयरूपादित्यत्र रूपत्वनिष्ठसमवाय सम्बन्धावच्छिन्न पर्व्वतवृत्तित्वाभाव पर्व्वतनिष्ठरूपत्वाभावरुपाश्रयासिद्धयोः तेनसम्बन्धेन हेतावसत्त्वाद्दुष्टत्वव्यवहारानुपपत्तिरितिवाच्यं। रूपत्वनिष्ठाधेयतायां पर्व्वतनिरूपितत्वाभावस्याश्रया सिद्धित्वात्। नचपर्व्वतनिरूपिताधेयत्वनिरूपिताधेयत्ववान् पर्व्वतो वह्निमान् पर्व्वतनिरूपिताधेयत्वात् इत्यत्रदुष्टत्वानुपपत्तिः, तत्र निरूपकत्वसम्बन्धावच्छिन्न प्रतियोगिताकपक्षतावच्छेदकाभावस्य, पक्षतावच्छेदकनिष्ठनिरूपकत्वसम्बन्धावच्छिन्न पर्व्वतवृत्तित्वाभावस्य तादृशपक्षतावच्छेदकनिष्ठाधेयतायां पक्षनिरूपितत्वाभावस्य च हेतावसत्त्वादिति वाच्यं। पक्षतावच्छेदकाभावव्याप्यो हेतुः पक्षे इत्यस्यापि आश्रया सिद्धित्वात्। तथाहि धूमत्वाभाव व्याप्यो धूमः, पर्व्वते, रूपत्वाभावव्याप्यं रूपं पर्व्वते, पर्व्वत निरूपिताधेयत्व निरूपिताधेयत्वाभावव्याप्यं, पर्व्वत निरूपिताधेयत्वं पर्व्वते इत्याकारकज्ञानानां संयोग, समवाय, निरूपकत्व आधेयत्व,

सम्बन्धावच्छिन्नपर्व्वत निष्ठप्रकार ताकत्वेन प्रतिबन्धकत्वात्। तेनतेनसम्बन्धेन तत्तद्वत्त्वस्य तत् तत् दुष्ट हेतौ सत्त्वात्। यद्वा अत्रापत्तिरेव नसम्भवति. धूमत्वाभावत्वेन घटाभावाव गाहि ज्ञानमादाय तत्रापि घटाभाव निष्ठ स्वरूपसम्पन्धा वच्छिन्न प्रकारताकत्वेनानुमिति प्रतिबन्धकतया तेनसम्बन्धेन तद्वत्त्वस्य हेतौ सत्त्वान्नानुपपत्तिः ॥ ८० ॥

अथ यत्प्रकारकत्वेन प्रतिबन्धकत्वं तत्वं दोषत्वं इति लक्षणे वह्नयभावादावतिप्रसंगोदत्तस्तत्कथंसङ्गच्छते वह्नय-भाववद्ध्रदादिनिष्ठप्रकारत्वस्यसम्भवेन सर्व्वत्रासम्भवसम्भ-वादिति, मैवं यत् प्रकारकत्वेन प्रतिबन्धकत्वमिति दुष्टस्य लक्षणं दोषलक्षणन्तु यद्विषयताकत्वादिघटितमेवेत्यदोषः। केचित्तु वह्नयभावत्वेनवह्नयभाववद्ह्रदावगाहिज्ञानमादाय-सर्व्वत्र लक्षण समन्वय इत्याहुः ॥ ८१ ॥

अत्राप्रामाण्यग्रहाभावादि विशिष्टयद्रूपावच्छिन्न विषयक निश्चयत्वं प्रतिबन्धकतावच्छेदकतातत्पर्य्याप्त्यधिकरणमिति गदाधरः। अत्र कीदृशीपर्य्याप्तिः? यद्रूपावच्छिन्नविषयक निश्चयत्वावच्छिन्न प्रतियोगिताकभेदप्रतियोगितावच्छेद-कतात्वावच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदक-रूपवृत्ति प्रतिबन्धकता तद्रूपावच्छिन्नत्वस्य विवक्षितत्वात् वृत्तित्वञ्च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्य्याप्त्य-नुयोगितावच्छेदकत्वसम्बन्धेनेति ॥ ८२ ॥

नच विशिष्टदोष विषयकत्वस्याप्रतिवन्धक संशयादौ सत्त्वात् पुनरसम्भवइतिवाच्यं ज्ञानस्येत्यत्रज्ञानपदमनाहार्य्यप्रामाण्यज्ञानानास्कन्दितनिश्चयपरमितिभट्टी। नच जतिमान वह्न्यभाववान् इत्याकारकज्ञानमादायासम्भववारणार्थं अव्यापकीभूतविषयिताशून्यत्व निवेशनमावश्यकं तावतैव संशयादिकमादायानति रिक्तवृत्तित्वकल्पे असम्भववारणात् कथमसम्भवोदत्तो भट्टाचार्य्येणेतिवाच्यं? अव्यापकीभूत विषयिताशून्यत्वस्य यथाश्रुतार्थाभिप्रायेणवोध्यं नत्। वस्तुतस्तु—स्वरुपतोभेदत्वसाध्यकह्रदपक्षकस्थले अव्यापकीभूतविषयविषयिताशून्यह्रदोभेदोनवेति संशयमादाय भेदभेदवद्ध्रदादौ अव्याप्तिर्वोध्या। असम्भवश्चात्र अप्रामाण्यज्ञानाभावानुपादानएव सम्भवति तथाच एकोक्त्यासम्पादनार्थमसम्भवः प्रदर्शित।

नन्वनाहार्य्याप्रमाण्यग्रहानास्कन्दितयद्रूपावच्छिन्नविषयकनिश्चयावृत्ति अनुमिति प्रतिवन्धकत्वाभावः तद्रूपावच्छिन्नत्वं हेत्वाभासत्व मितिलघुलक्षणं कुतोनोक्तमितिचेन्न अधिकरण भेदेनाभावभेदात्। किञ्चिन्निष्ठ प्रतिवन्धकत्वाभाववत्त्वस्य शुद्धह्रदत्वावच्छिन्न विषयकनिश्चयावृत्तित्वेनशुद्धह्रदत्वावच्छिन्नेऽतिव्याप्तेः। नच तादृशनिश्चयनिरुपितवृत्तितानवच्छेदकानुमिति प्रतिवन्धकताभावत्वमेव विवक्षितमितिवाच्यं विशेष्यवृत्तिपदार्थस्य विशिष्टानुयोगिकाभावाऽस्वीकारेऽसम्भवात्। सामान्यधर्म्मावच्छिन्नाधिकरणत्वानङ्गीकारे शुद्ध

ह्रदत्वावच्छिन्नेऽतिव्याप्तेः। कपिसंयोगाभाववत् कपिसंयोगवत्त्वावच्छिन्नेऽतिव्याप्तेश्च।

एतेन प्रतिबन्धकताशून्यानाहार्य्याप्रामाण्य ग्रहानास्कन्दित निश्चय वृत्तितानवच्छेदकं यद्रूपावच्छिन्न विषयकत्वंतद्रूपावच्छिन्नत्वंहेत्वाभासत्वमितिरीत्यायत्तुकल्पपरिष्कार प्रयासः परास्त इति॥ ८३॥

अनतिरिक्तवृत्तित्वश्चेहस्वव्यापकतत्कत्वमित्यादि गदाधरः। ननुप्रकृतानुमितिप्रतिबन्धकतायां तादृश निश्चयत्व व्यापकत्वनिवेशापेक्षया लाघवाद् यद्रूपावच्छिन्न विषयक निश्चयत्वं प्रकृतानुमित्यवृत्ति, अथवा प्रकृतानुमितिप्राक्क्षण वृत्त्यवृत्तिइत्येवंनिवेशयितुमुचितं। प्राकक्षणवृत्तित्वंच स्ववृत्तित्व स्ववृत्तिध्वंसप्रतियोगि कालवृत्तित्वोभय सम्बन्धेन अनुमितिविशिष्टत्वमितिचेन्न, आद्येवह्न्यभावव्याप्य साध्यकस्थले वह्निमत्पर्व्वते, द्वितीयेच, ह्रदोवह्निमान् जलवद्ध्रदादित्यत्र वह्न्यभाववज्जलवत्यतिव्याप्ते रिति॥ ८४॥

अथैवमपीत्यादिना असम्भवोदत्तो भट्टाचार्येण। ननुतत्कथं सङ्गच्छते सामानाधिकरण्येन साध्यतास्थले अवच्छेदावच्छेदेन तदभाववत्तानिश्चयत्वेन प्रतिबन्धकतयाह्रदत्व व्यापक वह्न्यभाव प्रतियोगिक स्वरूपेण वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयितायाजातिमान् वह्न्यभाववानितिज्ञाने विरहेन कथमसम्भवः? नचप्रमेयत्वेनाभावत्वावगाहिनि वह्नीयप्रमेयवत्त्वान् ह्रद इतिज्ञाने तादृश विषयताशालिनि प्रतिबन्धकत्व

विरहादसम्भव संगतिरितिवाच्यं ह्रदत्व व्यापकताघटित विशिष्टविषयकस्यापि तस्याभावत्वांशे निरवच्छिन्नावच्छेदकताकवह्न्यभावत्वावच्छिन्न ह्रदत्वव्यापकताघटित वह्न्यभाववद्ह्रदविषयकत्वाभावात् व्यापकतायाभिन्नत्वाच्च इतिचेन्न ह्रदत्वसमानाधिकरणाभाव प्रतियोगितावच्छेदकत्वीय प्रमेय वद् यद् (व्यापकतारूपाभावस्य प्रमेयत्वेनप्रवेशइति) वह्न्यभावत्वं तद् वत् प्रतियोगिक स्वरूपेण वह्न्यभाववान् ह्रद इति ज्ञाने यथायथं ह्रदत्वव्यापकता घटितोक्त संसर्गघटित वह्न्यभाववद् ह्रद विषयताया अक्षतत्वादसम्भवप्रसङ्ग सङ्गतिरित्य पिनमनोरमं प्रयोजनान्तरवशेन स्वीकरणीय संसर्गघटकविधया प्रविष्टव्यापकत्वरूपाभावस्य प्रमेयत्वेनभानानभ्युपगमात्, अन्यथातुल्ययुक्त्या संसर्गांशे उदासीनपदार्थस्यापि भानसम्भवात् ।

वस्तुतस्तु प्रमेयत्वेन संसर्गघटकस्वरूपत्वावगाहिनीं ह्रदत्वव्यापकवह्न्यभावप्रतियोगिकप्रमेयवत् संसर्गेन वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयिनीं बुद्धिमादायैवासम्भवः संगमनीयः । केचित्तु अवच्छेदावच्छेदेन साध्यत्व एवासम्भवो दर्शित इति ॥ ८५ ॥

पक्षतावच्छेदकाद्यंशे अन्याप्रकारकत्व मितिगदाधर आदिनासाध्यतावच्छेदक हेतुतावच्छेदकयोः परिग्रहः तेन जातिमान् ह्रदनिष्ठाभावप्रतियोगीत्याकारक ज्ञानमादाय ह्रदनिष्ठाभावप्रतियोगि वह्निरूपबाधे धूमाभाववद्वृत्ति जातिमानि-

त्यादिज्ञानमादाय धूमाभाववद्वृत्तिवह्निरूपे व्यभिचारेच नाव्याप्तिः।

अनुगमस्तु पक्षतावच्छेदकनिष्ठ विशेष्यताविशिष्टप्रकारता-शून्यत्वं। वैशिष्ट्यञ्च, स्वनिरूपितत्व, स्वावच्छिन्नावच्छेद-कतानिरूपितविशेष्यतानिरूपित प्रकारत्वानवच्छिन्नत्वोभय सम्बन्धेन। जातिमान् वह्न्यभाववानितिज्ञानीय वह्न्यभावनिष्ठं प्रकारताद्वयं, एका जातिमन्निष्ठविशेष्यतानिरूपिता, अन्या चजातिनिष्ठविशेष्यतानिरूपिता, तथाच निरुक्तज्ञाने जातित्व-निष्ठप्रकारताया निरुक्तोभयसम्बन्धेन जातिनिष्ठविशेषता विशिष्टत्वान्यतरस्यधर्त्तुंयोग्यत्वम्। वह्न्यभाववद्भूदज्ञानीयप्रकार-तायाः कस्याअपि तादृशसम्बन्धेन किञ्चिद्विशेष्यता विशिष्टत्वा-भावाददोष इति।

अत्र यद्रूपावच्छिन्न विषयित्वायच्छिन्न प्रतिबन्धकता वच्छेदक विषयिता निरूपित निरवच्छिन्नावच्छेदकताश्रय धर्म्मांशे एव अन्याप्रकारकत्वमवश्यं विवक्षणीयं अन्यथा प्रमेयत्वेनाभावत्वावगाहि वह्नीय प्रमेय वत्त्वानित्यादि ज्ञानमा-दायपुनरसम्भवःस्यात् तच्च तादृशधर्मनिष्ठ विषेष्यता विशिष्ट प्रकारता शून्यत्वं। वैशिष्ट्यंच स्वनिरूपितत्व स्वावच्छिन्ना-वच्छेदकता निरूपितविषयता निरूपितविषयत्वानवच्छिन्न-त्वोभय सम्बन्धेन। एवं च जलवान् वह्निमानितिस्थलीय दोषे नाव्याप्तिरत आह अविशेषितेत्यादि। ह्रदो जात्यभाव वानि-

त्यादिस्थलीय जातिमद्ध्रदादावव्याप्ति रिति ॥ ८६ ॥

तादृश प्रतिवन्धकता निरूपित स्वरूप सम्बन्धास्यावच्छेदकतावन्निरवच्छिन्नावच्छेदकताख्य विषयत्व समानाधिकरण यत् किञ्चिद्धर्मावच्छिन्न विषयताशून्यत्वस्य तादृशनिश्चये विशेषणत्वमितिनिरवच्छिन्नत्वप्रवेशात् जलवान् वह्निमानित्यादिस्थलीय वाधसंग्रहेऽपि ह्रदो जात्यभाववानित्यादि स्थलीय वाधादौ अव्याप्तिरितिवोध्यं इदमेव द्वितीयदोषानुसन्धानवीजं। अनुगमस्तु—तादृश प्रतिवन्धकतावृत्ति रूपवत्वं। वृत्तित्वं स्वविशिष्टाभाव विशिष्टान्य निश्चयत्वव्यापकत्वसम्बन्धेन। स्ववैशिष्ट्यं स्वावच्छिन्न विषयतावत्व स्वकालीनतादृश प्रतिवन्धकतावच्छेदकतावन्निरवच्छिन्नावच्छेदकत्वसमानाधिकरण धर्मावच्छिन्न विषयता शून्यत्वोभयसम्बन्धेन। प्रकारविधयाच तादृशप्रतिवन्धकतावृत्त्यभावीय प्रतियोगिता निरूपितावच्छेदकतात्व प्रतियोगित्व, भेद, निश्चयनिष्ठावच्छेदकतानिरूपितासती तादृश विषयताशून्यत्व निष्ठावच्छेदकता निरूपिता सती अभावविशिष्टान्यत्वनिष्ठावच्छेदकतानिरूपितासती विषयत्वनिष्ठा वच्छेदकतानिरूपितावच्छेकत्वनिष्ठावच्छेदकतानिरुपित निष्ठत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्मवत्वं तादृश प्रतिवन्धकतावछेदकतावन्निरवच्छिन्नावच्छेकत्वाख्य विषयत्वसमानाधिकरण यत्किञ्चिद्धर्मावच्छिन्न विषयताशून्य अभावविशिष्टान्य तद्धर्मावच्छिन्न विषयता शालिनिश्चयत्व

समानाधिकरण भेदप्रतियोगितावच्छेदकत्वं नास्तीत्यभावः ॥ ८७ ॥

तादृश विशिष्टाघटक पदार्थाविषयकत्वस्येत्यादि गदाधरः। यद्रूपावच्छिन्नविषयकत्व समानाधिकरण भेद प्रतियोगितावच्छेदक पदार्थाविषयकत्वमिति। भेद प्रतियोगितावच्छेदकता च स्वनिष्ठविषयता निरूपकत्व सम्वन्धावच्छिन्ना ग्राह्या। अथवा अनुमितित्वव्यापक प्रतिवध्यता निरूपित प्रतिवन्धकतावृत्तिरूपवत्त्वं हेत्वाभासत्वं। वृत्तित्वं स्वविशिष्ट निश्चयत्व व्यापकत्व सम्वन्धेन, वैशिष्ट्यं स्वावच्छिन्नविषयकत्व स्वावच्छिन्न विषयकत्व समानाधिकरण भेदप्रतियोगितानिरूपित स्वनिष्ठविषयतानिरूपकत्व सम्वन्धावच्छिन्नावच्छेदकतावत् पदार्थनिष्ठ विषयताशून्यत्व स्वावच्छिन्न निरूपकतानिरूपित विषयिताव्यापक विषयितानिरूपकभिन्न निष्ठनिरूपकतानिरूपित विषयताशून्यत्वान्यतरोभयसम्वन्धेन। प्रकारविधयाच तादृशप्रतिवन्धकता वृत्त्यभावीय प्रतियोगितानिरूपितावच्छेदकतात्व, प्रतियोगित्व, भेद वृत्तित्व, निश्चय, विषयत्व, अवच्छेदकत्व, निष्ठत्वसम्वन्धावच्छिन्नावच्छेदकतावद्धर्म्मवत्त्वं दोषत्वं इति संक्षेपः ॥ ८८ ॥

यद् यद् रूपावच्छिन्नस्य यस्य यस्य तादृशविशिष्टघटकता तत्तद्रूपावच्छिन्न तत्तन्निष्ठ विषयताभिन्न किञ्चिदवच्छिन्नविषयताशून्यत्वं इति गदाधरः।

यद्रूपावच्छिन्न विषयत्व समानाधिकरणभेद प्रतियोगितानवच्छेदकधर्म्मविशिष्टान्य किञ्चिदवच्छिन्न विषयता शून्यत्वं। भेदप्रतियोगितावच्छेदकता च स्वविशिष्ट विषयता निरूपकत्व सम्बन्धावच्छिन्ना, वैशिष्ट्यं च स्वावच्छिन्नत्व स्वसामानाधिकरण्योभय सम्बन्धेन। सम्बन्धघटकसामानाधिकरण्यपदोपादानात् अभाववान् वह्न्यभाववान् इति ज्ञानवारणं आकाशाभाववत् सर्व्वमित्यादौ न तादृश धर्म्मविशिष्टान्य विषयत्वाप्रसिद्धिः। ह्रदत्वादिनिष्ठ निरवच्छिन्न प्रकारत्वादीनां वारणाय विषयतायां किञ्चिदवच्छिन्नत्व निवेशः।

अथवा तादृश प्रतिबन्धकतावृत्तिरूपवत्वं हेत्वाभासत्वंवृत्तित्वंच, स्वविशिष्ट निश्चयत्व व्यापकत्वसम्बन्धेन वैशिष्ट्यं निश्चये स्वावच्छिन्न विषयकत्व, स्वावच्छिन्न विषयकत्व समानाधिकरण भेदप्रतियोगिनिरूपित स्वावच्छिन्नविषयकत्व सम्बन्धावच्छिन्नावच्छेदकत्वाभाववद्धर्म्मं विशिष्ट विषयता भिन्न किञ्चिदवच्छिन्न विषयता शून्यत्वोभयसम्बन्धेन। धर्म्म वैशिष्टं च स्वावच्छिन्नत्व स्वसामानधिकरण्योभय सम्बन्धेन। स्वावच्छिन्नत्वोपादानात् सर्व्वमाकाशवदित्यादिस्थलीय बाधेननाव्याप्तिः

स्वसामानाधिकरण्य प्रवेशात् अभावत्वेनह्रदत्वावगाहि अभाववान् वह्न्यभाववानितिज्ञानमादाय वह्न्यभाववद्ध्रदेनाव्याप्तिः।

प्रकारविधयाच तादृश प्रतिबन्धकतावृत्त्यभावीय प्रतियोगितानिरूपितावच्छेदकतात्व, प्रतियोगित्व, भेद, वृत्तित्व, निश्चय, विषयिता, निरूपकत्व, अवच्छेदकत्व, निष्ठत्वसम्बन्धावच्छिन्नावच्छेदकतावत्त्वेसति तादृश प्रतिबन्धकता वृत्त्यभावीय प्रतियोगितानिरूपित अवच्छेदकतात्व, प्रतियोगित्व, भेद, वृत्तित्व, निश्चय, अभाव, विषयिता, धर्म्म, (निष्ठत्वसं) अवच्छेदकत्व, निरूपकता, भेद, धर्मि, निरूपकत्व, (समानाधिकरण्यावच्छेदकत्वोभयसम्बन्धेनस्वविशिष्ट धर्मावच्छिन्नत्वसं) विषयित्व, व्यापकत्व, विषयित्व, निरूपकत्व, अवच्छेदकत्व, निष्ठत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्म्मवत्त्वमिति ॥ ८९ ॥

अथ यद्रूपावच्छिन्नस्य यस्य यस्य तादृशविशिष्टाघटकता तत्तद्रूपावच्छिन्न तत्तन्निष्ठविषयताशून्यत्वमेववक्तुमुचितं लाघवन्तु अनुगमे नञ्द्वयाप्रवेशनिबन्धनम्, अनुगमस्तु—यद्रूपावच्छिन्न विषयत्व समानाधिकरण भेद प्रतियोगितावच्छेदकधर्म्म विशिष्टविषयता शून्यत्वमिति। भेदप्रतियोगिता वच्छेदकताच स्वविशिष्ट विषयतानिरूपकत्व सम्बन्धावच्छिन्नाग्राह्या। वैशिष्ट्यं च स्वसामानाधिकरण्य स्वावच्छिन्नत्वोभयसम्बन्धेनेतिचेन्न। अभावत्वेन ह्रदत्वावगाहिज्ञानवारणासम्भवात्। एवं घटकसंख्यापेक्षया अघटक संख्याया आधिक्येन घटकतावच्छेदक रूपावच्छिन्न विषयता भेदकूट निवेशापेक्षया अघटकतावच्छेकरूपपावच्छिन्न विषय-

त्वाभावकूढ निवेशे गौरवात्। तादृश परम्परायाः— संसर्ग त्वानभ्युपगमे निरुक्तानुगमस्याशक्यत्वाच्च ॥ ६० ॥

मैवं यद्रूपावच्छिन्न विषयतात्व मित्यादि गादी। यद्रूपावच्छिन्न विषयकत्व समानाधिकरण भेद प्रतियोगिता वच्छेदकधर्म्मावच्छिन्न विषयताशून्यत्वमित्यर्थः भेदप्रतियोगिता वच्छेदकताच स्वावच्छिन्नविषयित्वसम्बन्धावच्छिन्ना ग्राह्या। अभाववान् वह्न्यभाववानिति ज्ञानवारणाय निश्चये धर्म्मविशिष्टान्यत्वं स्वातन्त्र्येण निवेश्यं नतु भ्रमसामान्यभिन्नत्वं तर्हि यथार्थपदं व्यर्थ्य मित्यनेन दोषं दत्वा एततकल्पावतारस्य सन्दर्भविरोधापत्तेः। धर्म्मवैशिष्ट्यं च स्वाश्रयनिष्ठ विशेष्यता निरूपित स्वनिष्ठप्रकारताकत्व स्वाभाववन्निष्ठविशेष्यतानिरुपित स्वनिष्ठप्रकारताकत्वोभयसम्बन्धेन।

लक्षणानुगमस्तु प्रकृतानुमिति प्रतिबन्धकता वृत्तिधर्म वत्वं। वृत्तित्वंच स्वविशिष्ट निश्चयत्वव्यापकत्वसम्बन्धेन स्ववैशिष्ट्यं च स्वावच्छिन्न विषयकत्व समानाधिकरण भेद प्रतियोगिता वच्छेदक धर्म्मावच्छिन्न विषयताशून्यत्व, स्वावच्छिन्न विषयकत्व, स्वकालीन धर्म विशिष्टान्यत्वैत त्रितय-संबन्धेन, धर्म वैशिष्ट्यं च पूर्व्वोक्त सम्बन्धाभ्यां। अथवा यद्रूपावच्छिन्नस्य यस्य इत्यादि स्वातन्त्र्येण निवेश्यम्।

प्रकारविधयाच तादृशप्रतिबन्धकतावृत्त्य भावीय प्रतियोगितानिरूपितावच्छेदकतात्व, प्रतियोगित्व, भेद, वृत्तित्व,

निश्चय, विषयित्व,निरूपकत्व, अवच्छेदकत्व निष्ठावच्छेदकता निरूपितासती तादृशप्रतिबन्धकतावृत्त्यभावीय प्रतियोगिता निरूपित परस्परयावच्छेदकतावान्निश्चय, अभाव, विषयित्व, निरूपकत्व, अवच्छेदकत्व, धर्म्म (निष्ठत्वसं) निष्ठत्वसम्बन्धा वच्छिन्नावच्छेदकत्व निष्ठावच्छेदकतानिरूपितावच्छेदक व निष्ठावच्छेदकत्वनिष्ठावच्छेकतानिरूपकत्वनिष्ठावच्छेकतानिष्ठाव च्छेदकनिरूपितासती वृत्तित्वात्व निष्ठावच्छेदकतानिष्ठा-वच्छेदकतानिरूपित प्रतियोगित्व, अभाव, वृत्तित्व, अधि-करण, विषयित्व, निरूपकत्व, अवच्छेदकत्व, निष्ठत्व सम्बन्धा वच्छिन्नावच्छेदकतावद्धर्म्मवत्त्वं तत्त्वं।

अथ तथापि अभावत्वेन ह्रदत्वावगाहिनोऽभाववान् वह्नय भाववानिति ज्ञानस्य वारणमशक्यं अभावत्वावच्छिन्न विष-यितात्वस्य वह्नयभाववद्ध्रदादि विषयित्व समानाधिकरणा-भावप्रतियोगितानवच्छेदकत्वात्।

नच यद्रूपावच्छिन्नविषयतानिरूपितयद्रूपावच्छिन्नविषय-तात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगि-तावच्छेदकं यद्रूपावच्छिन्नविषयतानिरूपित तद्रूपावच्छिन्न विषयताशून्यत्वं निश्चय विशेषणं देयं। तथाचाभावत्वाव-च्छिन्नविषयतानिरूपित वह्नयभाववद्ह्रदत्वावच्छिन्न विषय-तात्वं तथेति तादृशविषयताशून्यत्वं न तत्रास्तीति वाच्यं। अभावत्वावच्छिन्नविषयतानिरूपित वह्नयभाववद्ध्रदत्वाव च्छिन्न विषयताया अपि वह्नयभाववद्ध्रदत्वावच्छिन्नविषयता-

व्यापकत्वात् सुतरां न तस्य तादृशविषयताशून्यत्वमित्यसम्भव तादवस्थ्यं इतिचेन्न । यद्रूपावच्छिन्नविषयतात्वावच्छिन्न-निरूपकतानिरूपित यद्रूपावच्छिन्नविषयतातावच्छिन्ननिरूप्य-तावद्विषयतात्वं तादृशविशिष्टविषयकत्व समानाधिकरणाभाव प्रतियोगितावच्छेदकं तद्रूपावच्छिन्न विषयतात्वावच्छिन्न-निरूपकतानिरूपित तद्रूपावच्छिन्न निरूप्यतावद्विषयताशून्य-त्वस्य निवेश्यत्वान्नदोषः । अत्र वह्न्यभावावच्छिन्नविषयता-त्वावच्छिन्न निरूपकतानिरूपितत्वं नवह्न्यभाववान् ह्रद इतिज्ञानीयाभावत्वावच्छिन्न विषयतायां किन्त्वभाववान् वह्न्यभाववानितिज्ञानीय विषयताया एवेति तद्व्युदासः ॥६१॥

यादृश समुदायत्ववृत्ति निरूपकतानिरूपित विषयित्व-व्यापकं अनुमितिप्रतिबन्धकत्वं तादृशसमुदायत्वपर्य्याप्त्यधि-करणधर्म्मवत्त्वमित्यस्यैवसम्यक्त्वे कृतमव्यापकीभूत विषय-ताशून्यत्व निवेशनेन, वृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन । इतिचेन्न । वह्न्यभाववज्जातिमत्त्वावच्छिन्न निरूपकतायाअपि जातित्वावृत्ति स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्या-प्त्यनुयोगितावच्छेदकत्व सम्बन्धेन वह्न्यभाववद्ध्रदत्वपर्य्या-प्तसमुदायत्ववृत्तित्वात् जातिमान् वह्न्यभाववानितिज्ञानमादाय असम्भवप्रसंगात् ।

जगदीशेनतु जातित्वावृत्ति तादृशावच्छेदकतात्वावच्छिन्न प्रतियोगिताकत्वं पर्य्याप्तिसम्बन्धे न स्वीक्रियते इति तन्मते

अव्यापकीभूत विषयताशून्यत्वप्रवेशोनास्ति। यद्वा विलक्षण विषयितासम्बन्धेन यद्रूपावच्छिन्नविषयकनिश्चयत्वव्यापकं प्रतिबन्धकत्वमित्यर्थलाभायैव अव्यापकीभूतविषयता शून्यत्व निवेशः।

यस्तु तस्तु यत्र वह्न्यभाववद् ध्रदविषयकं ज्ञानं नियमतो मेयत्वविशिष्ट वह्न्यभाववद् ह्रदविषयकमेव जायते शुद्धवह्न्य भाववद्ध्रदविषयकंज्ञानं। नियमत आहार्य्यमेवजायते तत्र वह्न्यभाववद्ध्रदे अव्याप्तिः। तत्रत्यवह्न्यभाववदध्रदत्वावच्छिन्न निरूपकताया एव मेयत्व विशिष्टवह्न्यभाववद्ध्रदत्वावच्छिन्न तथा तस्यावह्न्यभाववद्ध्रदत्व मात्र वृत्तिसमुदायत्वे निरुक्त सम्बन्धेनावृत्तित्वात् तादृश समुदायत्व मात्रवृत्ति निरूपकताक विषयितायाश्चाहार्य्य ज्ञानएव सम्भवात् तत्रत्व प्रतिबन्धकत्वा सत्वाद्भवत्यव्याप्तिः एतद्वारणाय किञ्चिद्रूपावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्यत्वार्थकस्य अव्यापककीभूत विषयताशून्यत्वस्य निवेशः।

अत्रकिञ्चिद्रूपपदेन मेयत्वविशिष्ट वह्न्यभाववद् ध्रदत्ववस्य घटव्यतया नाव्यापकीभूत विषयता शून्यत्वा प्रसिद्धिशंकापि विशिष्टान्तरा घटितत्व विरहाच्चनमेयत्वविशिष्ट वह्न्यभाववद्- ध्रदे अतिव्याप्तिः। विशिष्टान्तरस्यच निरुक्ताहार्य्य ज्ञानएव प्रसिद्धिः। ईदृशांकुरमस्वीकृत्यैवजगदीशेन पर्य्याप्ति निवेशः कृतइति ॥ ६२ ॥

अथ यद्रूपावच्छिन्न विषयताशालि निश्चयत्वव्यापक प्रकृतानुमिति प्रतिबन्धकत्वं यद्रूपावच्छिन्न विषयताशालि निश्चयत्वव्यापकं तद्रूपावच्छिन्न विषयत्वाव्यापकीभूत विषयिताशून्यत्वस्य लक्ष्यतावच्छेदकावच्छिन्न विषयताशालि निश्चय विशेषणत्वेनैव सामञ्जस्ये विशिष्टान्तरा घटितत्व विशिष्टद्वयाघटितत्व निवेशो व्यर्थ इति तथाच्च मेयत्वविशिष्ट व्यभिचारत्वावच्छिन्न विषयताया मेयत्वविशिष्ट व्यभिचारत्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतावच्छेदक शुद्धव्यभिचारत्वाद्यवच्छिन्न विषयत्वाव्यापकत्वेन तत्शून्यत्वस्य मेयत्वविशिष्ट व्यभिचारज्ञानेऽसत्त्वात्।

एवं वह्न्यभावज्जलवद्वृतिजलवद्ध्रदत्वावच्छिन्न विषयताया अपि तादृशजलवद्ध्रदत्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतावच्छेदकीभूत वह्न्यभाववज्जलवत्कालीन जलवद्ध्रदत्वावच्छिन्न विषयत्वाव्यापकत्वेन तच्छून्यत्वस्यतादृश जलवद्ध्रदविषयकज्ञानेऽसत्त्वात्।

नचैवं व्यभिचारघटितवाधेऽव्याप्तिः तादृश प्रतिबन्धकता सामान्यावच्छेदकत्वस्य द्वितीययद्रूपावच्छिन्न विषयतायां निवेश्यत्वात्। अथ वाधविशिष्टव्यभिचारेऽतिव्याप्तिः यत् किंचित्प्रतिबन्धकतावच्छेदकत्वस्य वाच्यत्वात्।

नच जलव्यापक वह्न्यभावसमानाधिकरण जलवद्ध्रदरूप सत्प्रतिपक्षेऽव्याप्तिः, तादृशसत्प्रतिपक्षविषयताया अपि जलव्यापको वह्न्यभावोजलवांश्च हृद इति ज्ञान द्वयसाधारण

स्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतावच्छेदक विषयत्वाव्यापकत्वात् तादृशाव्यापकीभूत विषयताशून्य सत्प्रतिपक्षनिश्चया प्रसिद्धेरिति वाच्यम् । निरुक्तरुपस्य सत्प्रतिपक्षतायाः स्वयं निरसनीयत्वात् । नैवं सर्वं गगनवदित्यत्र गगनाभाववत्सर्वरुपबाधे ऽव्याप्ति प्रसंगात् । अवच्छिन्न विशेष्यतानिरुपितगगनाभावत्वावच्छिन्न प्रकारताशालिनिश्चयत्वावच्छिन्नाया गगनाभाववत्सर्वस्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतायाः गगनाभाववान् घट इति निश्चयसाधारण्यानुरोधेन कल्पनीयतया गगनाभाववत्सर्वत्वावच्छिन्न विषयतायास्तादृश प्रतिबन्धकतावच्छेदकीभूत विषयत्वाव्यापकत्वात् । अथवावह्न्यभाववद्ध्रदे ऽव्याप्तिः वह्न्यभाववद्ध्रदत्वावच्छिन्न विषयताया स्वादृशतादृश विषयत्वावच्छिन्न प्रतिबन्धकतावच्छेदकीभूतह्रदवृत्ति वह्न्यभावत्वावच्छिन्न विषयत्वाव्यापकत्वात् । एवं रीत्याऽसम्भवः स्यादतः विशिष्टान्तराघटितत्वादि निवेशः ।

न चैवमपि लक्ष्यतावच्छेदकावच्छिन्न विषयत्वाव्यापकीभूत विषयता शून्यत्वस्य प्रतिबन्धकतावच्छेदकीभूत विषयताशालिज्ञाने निवेश्यत्वान्नदोषः, तथाहि वह्न्यभाववद्ध्रदत्वावच्छिन्न विषयत्वाव्यापकीभूत विषयता शून्यत्वं न ह्रदवृत्ति वह्न्यभावत्वावच्छिन्न विषयता शालिज्ञानेस्ति, एवं सर्वत्र तथा च नाव्याप्तिः । नन्वेवं वह्न्यभाववज्जलवद् वृत्तिजलवद्ध्रदेऽतिव्याप्तिवारणाय विशिष्टरुपबाटितस्य निवेश्यतां किं विशिष्टान्तरा-

घटितत्व-निवेशेन? सत्यं तथासति, जातिमद् वह्न्यभाववद्-ध्रदेऽतिव्याप्तिः, तथाहि जातिमद्वह्न्यभाववद्ध्रदत्वावच्छिन्न विषयतायाअव्यापकी भूतविषयता शून्यत्वस्य तादृशविषयत्वावच्छिन्न प्रतिबन्धकतावच्छेदकीभूत वह्न्यभाववद्ध्रदत्वावच्छिन्न विषयताशालिज्ञाने सत्त्वेपि वह्न्यभाववद्ध्रदत्वावच्छिन्नविषयकत्वस्य तादृशाव्यापकीभूत विषयताशून्यजातिमान् वह्न्यभाववानित्य प्रतिबन्धकज्ञान साधारणत्वेन तस्य वह्न्यभाववद्ध्रदत्वस्य धर्तुमशक्यत्वात् भवत्यतिव्याप्तिरतः विशिष्टान्तराघटितत्व निवेशः।

प्रथमकल्पाभिप्रायेणास्यानुगमः। प्रकृतानुमिति प्रतिबन्धकतावृत्ति रूपवत्त्वं। वृत्तित्वं स्वविशिष्ट निश्चयत्वव्यापकत्व सम्बन्धेन। वैशिष्ट्यं स्वावच्छिन्न विषयताकत्व स्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्यत्व स्वकालीन तादृशप्रतिबन्धकतावृत्तिरूपावच्छिन्न विषयत्वव्यापकीभूत विषयिता शून्यत्वैतत्त्रितय सम्बन्धेन वृत्तित्वं स्वविशिष्ट निश्चयत्वव्यापकत्वसंबन्धेन वैशिष्ट्यं स्वावच्छिन्न विषयताकत्वस्वावच्छिन्न विषयत्वाव्यापकीभूत विषयिता शून्यत्वोभय सम्बन्धेन॥ ६३॥

ननु—विशिष्टदोष घटकीभूततदेकदेशविषयितायाः स्वरूप सम्बन्ध रूपावच्छेदकत्व सत्त्वेऽपि यादृशविशिष्ट विषयिता सामान्यस्य तादृशावच्छेदकत्व विवक्षणमतिप्रसङ्गवारणासम्भवा दिति गाढी।

नन्वत्रकल्पे जातित्वेन ह्रदत्वावगाहि जातिमान् वह्न्य-भाववानिति ज्ञानकालीन जातिमद्ध्रद ज्ञानस्यापि प्रतिबन्धक-तया प्रतिबन्धकतावच्छेदक विषयितात्वस्य जातिमान् वह्नभाव वानिति ज्ञानीय विषयितायामपि अक्षतत्वात्। नच तथापि जातित्वेन ह्रदत्वसामानाधिकरण्येन वह्न्यभाववत्त्वावगाहि जातिमनिति ज्ञानीय विषयितामादाय व्यापकत्वभंगलः ह्रदत्व सामानाधिकरण्येन वह्न्यभावद्ध्रदादा वव्याप्तिरिति वाच्यं अव्यापकीभूत विषयिताशून्य ज्ञानीय यद्रूपावच्छिन्न विषयि तात्वव्यापकमित्यादेर्निवेश्यत्वात्। नत्वेवं सति अव्यापकीभूत विषिताशून्य ज्ञानीय यद्रूपावच्छिन्न विषयित्वं प्रतिबन्धकता वच्छेदकं तद्रूपावच्छिन्नत्वमित्यनेनैव उपपत्तौ सामान्यपद मनर्थकमेव बाधैकदेश विषयितायां स्वव्यापकीभूत विषयिता ज्ञानीयत्व विरहादेव बाधैकदेशे अतिव्याप्ति वारण सम्भवात्। ६४ ॥

नच गोत्वभावो गोत्वाभाववानित्यत्र बाधभ्रमविषय गोत्वा-भावेऽतिव्याप्तिरितिवाच्यं यद्रूपावच्छिन्न संसर्गता निरूपित यद्रूपावच्छिन्न विषयतात्वं यद्रूपावच्छिन्न विषयत्व सामाना धिकरणाभाव प्रतियोगितावच्छेदकं तद्रूपावच्छिन्न संसर्गता निरूपित तद्रूपावच्छिन्न विषयताशू यत्वस्याव्यापकीभूत विषयताशून्यत्वेन विवक्षणात्। न च तथापि समवायेन गोत्व-वत् समान कालीन गोत्वाभावो गोत्वाभाववानित्यत्र बाधभ्रम विषये गोत्ववत् समानकालीन गोत्वाभावेऽतिव्याप्तिः समवाय-

त्वावच्छिन्न संसर्गतानिरूपित गोत्वत्वावच्छिन्नविषयत्वस्य गोत्ववत् समानकालीन गोत्वाभावत्वावच्छिन्न विषयत्वाव्यापकत्व विरहादिति वाच्यं ? यद्रूपावच्छिन्न विषयता निरूपित यद्रूपावच्छिन्न विषयतात्व यद्रूपावच्छिन्न विषयत्व समानाधिकरणाभाव प्रतियोगितावच्छेदकं तद्रूपावच्छिन्न विषयतानिरूपित तद्रूपावच्छिन्न विषयताशून्यत्वरूपस्य तस्य विवक्षणीय तयातिव्याप्ति विरहात्।

नच तथापि संयोगवत् संयोगवत् संयोगाभावस्य यत्र साध्यत्वं संयोगवत् संयोगस्य पक्षत्वं तत्र साध्यघटक प्रथम संयोगवत्वं संयोगेन अन्यत्र संयोगवत्वं कालिकेन तत्र संयोगवत् संयोगवत् संयोगवत् संयोगे वाधभ्रमविषयेऽतिव्याप्ति संयोगत्वावच्छिन्न विषयता निरूपितायाः संयोगवत् संयोगत्वावच्छिन्न विषयतानिरूपिताया वा स्वावच्छिन्न विषयत्वाव्यापकत्व विरहादिति वाच्यं, यद्रूपावच्छिन्न संसर्गतानिरूपित यद्रूपावच्छिन्न विषयतानिरूपित यद्रूपावच्छिन्न विषयित्व स्वावच्छिन्न विषयत्वाव्यापकं तद्रूपावच्छिन्न संसर्गतानिरूपित तद्रूपावच्छिन्न विषयताशून्यत्व विवक्षया संयोगत्वावच्छिन्न संसर्गतानिरूपित संयोगत्वावच्छिन्न विषयता निरूपित संयोगत्वावच्छिन्न विषयतायाः स्वावच्छिन्न विषयत्वाव्यापकत्वेन तत्रातिव्याप्ति विरहादिति चेत्, न, गगनाभाववज्जलवज्जलस्य पक्षत्वं जलवज्जलवज्जलाभावस्य साध्यत्वं तत्र साध्यघटक प्रथमजलवत्त्वं स्वरूपेण। पक्षघटक गगना

भाववत्त्वं च स्वरूपेण, तत्र वाध भ्रमविषये जलवज्जवद् गगनाभाववज्जलवज्जले अतिव्याप्तेः, तज्ज्ञाने गगनाभाववत्वावच्छिन्न विषयतानि रूपित स्वरूपत्वावच्छिन्न संसर्गतानिरूपित जलत्वावच्छिन्न विषयता निरूपित जलत्वावच्छिन्न विषयतायाः सत्त्वेन स्वरूपत्वावच्छिन्नसंसर्गता निरूपित जलत्वावच्छिन्न विषयता निरूपित जलत्वावच्छिन्न विषयतायाः सद्विषयत्व व्यापकत्वात्।

यदि च संसर्गताया मध्य पातितया यद्रूपा वच्छिन्न विषयता निरूपित यद्रूपावच्छिन्नसंसर्गता निरूपित यद्रूपावच्छिन्न विषयतात्वं यद्रूपावच्छिन्न विषयत्वसमानाधिकरणाभाव प्रति योगितावच्छेदकं तादृशविषयता शून्यत्व निवेशे नोक्तातिव्याप्तिः। जलत्वावच्छिन्न विषयतानिरूपित स्वरूपत्वावच्छिन्न संसर्गता जलत्वावच्छिन्न विषयितायाः तादृश विषयत्वाव्यापकत्वात्। समानाधिकरण विषयतयो रभिन्नत्वपक्षे तज्ज्ञान स्वरूपत्वावच्छिन्न संसर्गतानिरूपित जलत्वावच्छिन्न विशेष्यतारूप विषयिता निरूपित जलत्वावच्छिन्न विशेष्यतारूप विषयतायाः सत्त्वेऽपि जलत्वावच्छिन्न विषयतानिरूपित स्वरूपत्वावच्छिन्न संसर्गतानिरूपितत्वस्य गगनाभाव प्रकारतायामेव सत्त्वेन जलत्वावच्छिन्न विषयताया असत्त्वात्तादृशा व्यापकीभूत विषयताशून्यत्वस्य निरुक्त बाध भ्रमेऽसत्त्वादिति यदि सूक्ष्म मीक्ष्यते तदा गुणीय संयोगेन वह्न्यभावस्य साध्यत्वे पर्वतस्य पक्षत्वे गुणीयसंयोगेन वह्निमान पर्व्वतइति बाध

भ्रममादाय संयोगेन वह्निमत् पर्वतेऽतिव्याप्तिः। गुणीयत्व निष्ठविषयितायाः वह्नित्वावच्छिन्न प्रकारता निरूपितत्व संयोगत्वावच्छिन्न संसर्गतात्व धर्मद्वयावच्छिन्न निरूपकता निरूपिता निरूप्यतावत्वस्यासत्त्वेन यद्रूपावच्छिन्न विषयता निरूपित यद्रूपावच्छिन्न विषयता पदेन गुणीयत्व विषयताया धर्त्तुमशक्यतया किञ्चिदवच्छिन्न संसर्गतानिरूपित संयोगत्वा वच्छिन्नविषयतायाः संयोगेन वह्निमत् पर्वतत्वावच्छिन्न विषयित्वाव्यापिकाया अपि निरुक्त वाधभ्रमेऽसत्त्वात्, तज् ज्ञानीय संयोगत्वावच्छिन्न संसर्गतानिरूपितगुणीयत्वनिष्ठ विषयताया सम्बन्धानवच्छिन्नत्वात्। अत एव सामान्यपद मावश्यकं तथाच न निरुक्ताव्याप्त्यतिव्याप्ति प्रसङ्ग इति। वस्तु तस्तु—गुणोनद्रव्यमित्यत्र गुणोद्रव्यमित्याकारक स्वरूपतो द्रव्यत्वप्रकारक वाधभ्रमविषये गुणे अतिव्याप्तिवारणार्थमेव सामान्य पदनिर्देशस्यावश्यकत्वात्। निरुक्त स्थले यद्रूपाव- च्छिन्न विषयतानिरूपित यद्रूपावच्छिन्न विषयत्वादिरूपां यामेवाव्यापकीभूत विषयितां निविशतां तादृश निखिलाव्याप- कीभूत विषयिताशून्यात्वस्त्येव इति। ९५॥

ननु विषयतात्व व्यापकत्वापेक्षया विषयत्व व्यापकत्व कल्पनस्यैव गुरुतया कथं गदाधरेण विषयतात्व व्यापकत्व कल्पस्य गुरुत्वमाशङ्कितं तथाहि विषयतावृत्यभावप्रतियोगिता- वच्छेदकत्वं नास्तीत्यभावापेक्षया विषयतावद्वृत्ति भेदप्रति- योगितावच्छेदकत्वं नास्तीत्यस्यगुरुत्वात्। सत्यं अत्यन्ता-

भावाप्रतियोगित्वस्य भेदप्रतियोगितावच्छेदकत्वाभाव रुपस्य वा व्यापकत्वशरीरे अभावस्य भेदस्यवा सर्व्वत्राव्याप्तिवारणाय तादृश प्रतिवन्धकतात्व तदितरोभय धर्म्मानवच्छिन्न प्रतियोगिताकत्वस्य प्रतिवन्धकत्व तदितरोभय धर्म्मानवच्छिन्नावच्छेदकताकप्रतियोगिताकत्वस्य वा विशेषणत्वेनास्य लाघवं। परन्तु विषयतात्वव्यापकत्वाभिप्राये तत्र प्रतिवन्धकतावच्छेदकत्व तदितरोभयधर्म्मानवच्छिन्नप्रतियोगिताकत्वस्यात्यन्ताभावे प्रतिवन्धकतावच्छेदकतदितरोभयधर्म्मानवच्छिन्नावच्छेदकताकप्रतियोगिताकत्वस्यवा भेदे विशेषणीयत्वात्। अन्यथा असम्भव प्रसंगात्। इति विषयतात्वव्यापकत्व गौरवं कल्पयता आशङ्कितं।

ननु तथापितद्व्यक्तिवृत्तित्वविशिष्टं नास्तीत्यभावं तद्व्यक्ति वृत्तित्व विशिष्ट वान्नेति भेदं चादाय पुनरसम्भवः, तन्निवारणायात्यन्ताभावनिरूपितोभया वृत्ति धर्ममात्रावच्छिन्न प्रतियोगित्वाभावरूप तादृशधर्ममात्रावच्छिन्न भेदीय प्रतियोगितावच्छेदकत्वाभावस्य च व्यापकत्व निर्व्वचने पुनर्लाघव गौरवकल्पनं गदाधरस्य न संगच्छते एवं प्रतिवन्धकतायाः प्रतिवन्धकभेदेन भिन्नत्वमते सर्व्वत्र तद्व्यक्तिर्नास्तीत्यभावमादायासम्भव इति चेत्? सत्यमत्र समाधानं— विषयत्वव्यापकत्वकल्पे तादृशप्रतिवन्धकतात्वातिरिक्ततादृशप्रतिवन्धकतावृत्तिधर्म्मानवच्छिन्न प्रतियोगिताकाभावस्य तादृशप्रतिवन्धकतातिरिक्त प्रतिवन्धकवृत्तिधर्म्मानवच्छिन्ना

वच्छेदकताक प्रतियोगिताकभेदस्य वा निवेशनं कार्य्यं, एवं विषयितात्व व्यापकत्वकल्पे तादृश प्रतिबन्धकतावच्छेदकतात्वातिरिक्तप्रतिबन्धकतावच्छेदकतावृत्ति धर्म्मानवच्छिन्न प्रतियोगिताकाभाव प्रतियोगित्वाभावरूपव्यापकत्वस्य निवेशनीयत्वान्नासम्भवः, एवं विषयतात्व व्यापकत्वपक्षएव गौरवं तत्र गुरुत्तराभाव निवेशदिति ॥ ९६ ॥

अथाहार्य्यज्ञानीय विषयतायाः प्रतिबन्धकावृत्तित्वेनानाहार्य्यज्ञानसाधारणी न भवति अतः स्वरूपसम्बन्धरूपावच्छेदकत्वकल्पे अनाहार्य्यत्व निवेशः।

ननु अव्यापकीभूत विषयिताशून्यत्व कल्पनादेव तादृशदोषवारण सम्भवात् कथमनाहार्य्यत्व निवेशः तथाहि वह्न्यभाववद्ह्रदत्वावच्छिन्न विषयत्व समानाधिकरणाभावप्रतियोगितावच्छेदकं वह्नित्वावच्छिन्न विषयतानिरूपितवह्न्यभाववद्ह्रदत्वावच्छिन्न विषयतात्वं तच्छून्यत्वं, एवं तादृश विषयत्व समानाधिकरणाभावप्रतियोगितावच्छेदकं यत्संयोगत्वावच्छिन्न विषयतात्वं तच्छून्यत्वंच न वह्न्यभाववद्ह्रदो वह्निमानितिज्ञाने अस्तीति द्विरूपे एकरूपेचानाहार्य्यत्व निवेशनम् नकिंचित् फलोपधायकमितिचेत्। सत्यमत्रसमाधानं गुणपक्षक द्रव्यत्व साध्यकस्थले द्रव्यभिन्नोगुण इति वाधेऽव्याप्तिः, द्रव्यभिन्नगुणत्वावच्छिन्न विषयत्व समानिधिकरणाभावप्रतियोगितावच्छेदकं यद् द्रव्यत्वत्वावच्छिन्न विषयतानिरूपित द्रव्यभिन्नगुणत्वावच्छिन्न विशेष्यताकज्ञाने सत्त्वेन

सादृश ज्ञानत्वावच्छिन्न विषयतायाः प्रतिवन्धकतावच्छेद-कत्वविरहादव्याप्तिरतः अनाहार्य्यत्वनिवेशः। ह्रदोवह्निमान् वह्न्यभाववद्ह्रदोघटाभाववांश्चेति निश्चयस्य घटघत्त्वबुद्धि प्रति इच्छाजन्य प्रत्यक्षत्वादाहार्य्यत्वेन अप्रतिवन्धकत्वापत्तिः, तत्तद्ंशे तत्तदनाहार्य्यत्वं विशिष्ट निश्चयत्वेन प्रतिवन्धकता-कल्पनाददोषः।

ननु लक्षण शरीरे तादृशाननुगत निवेशासम्भवेन कागति-रिति चेत् सत्यं—अभावविशिष्टान्यत्वेन तस्यप्रवेशात् वैशिष्ट्यं च स्वप्रतियोगिमत्त्व स्वावच्छिन्नप्रतिवन्धकतावच्छेदक विष-यिता निरूपकतावच्छेदकधर्म्मावच्छिन्न विषयताकत्वोभय सम्बन्धेन।

ननु तथापि प्रतिवन्धकतावच्छेदक विषयतावत्त्वमेवो-च्यतां किंतादृश विषयतानिरूपकतावच्छेदकधर्म्मावच्छिन्न विषयतावत्वोक्तेन ?

ननु जलवान् वह्न्यभाववान् जलवांश्चह्रद इत्याकारक-ज्ञानस्येव ह्रदे वह्निमत्त्वाज्ञानप्रतिवन्धकीभूतघटवान् वह्न्यभाव-वान घटवांश्चह्रद इत्यादि ज्ञानानामपि ज्ञानविशिष्ट ज्ञानत्वेनैव प्रतिवन्धकत्वस्य कल्पनीयतया तेषामेकोक्त्या कथं संग्राह्यत्व-मितिचेन्न वह्निमद्ह्रद इति ज्ञानं प्रति निश्चय विशिष्ट निश्चय-त्वेन प्रतिवन्धकत्वस्यकल्पनीयतया एकरूपेण तेषां संग्राह्य-त्वात्। वैशिष्ट्यञ्च स्वसामानाधिकरण्य—स्वीयपह्न्यभावत्वा-वच्छिन्न प्रकारतावृत्ति विशेष्यतावच्छेदकता विशिष्टप्रकारता

निरूपित ह्रदत्वावच्छिन्न विशेष्यताकत्वोभय सम्बन्धेन। विशेष्यतायां प्रकारतावृत्तित्वं च स्वावच्छेदकधर्म्म व्यापक वह्न्यभावप्रतियोगित्व विशिष्टस्वरूपत्वावच्छिन्न संसर्गतानिरूपितत्व—स्वनिरूपितत्वोभय सम्बन्धेन, प्रकारतायां विशेष्यतावच्छेदकता वैशिष्ट्यं च स्वावच्छेदकधर्म्मावच्छिन्नत्व स्वावच्छेदक सम्बन्धवच्छिन्नत्वोभय सम्बन्धेन ॥ ६७ ॥

अथ यद्रूपपदेन किंधर्त्तव्यं? न तावत् सामानाधिकरण्य सम्बन्धेन वह्न्यभाव विशिष्ट ह्रदत्वं, नवा वह्न्यभावह्रदत्वोभयं आद्ये वह्न्यभावविशिष्टह्रदत्ववान् घट इतिज्ञानीय विशेष्यतायाः प्रकारावच्छिन्नाया वह्न्यभावविशिष्टह्रदत्वावच्छिन्नतया प्रतिवन्धकतायां तद्रूपावच्छिन्न विषयित्व व्यापकत्वविरहादसम्भवः। द्वितीये एकत्रद्वयमितिरीत्या वह्न्यभावह्रदत्ववान्घट इति ज्ञानीय विशेष्यतायाः प्रकारावच्छिन्नाया स्तादृशोभय धर्म्मावच्छिन्नत्वेन प्रतिवन्धकताया स्तदव्यापकत्वादसम्भव इति चेन्न, ह्रदत्वावच्छिन्नानुयोगिताकस्वरूपघटित सामानाधिकरण्यसम्बन्धेन वह्न्यभावविशिष्टह्रदत्वमेव यद्रूपपदेन धर्त्तव्यम्। वह्न्यभाववान् ह्रदइति ज्ञानएव तादृशरूपघटित सामानाधिकरण्यस्य संसर्गत्वं स्वीक्रियते। ननु वह्न्यभाव विशिष्ट ह्रदत्ववानितिज्ञाने तथा च यथा श्रुतमेवसम्यक्। एतेन ह्रदत्वावच्छिन्न विषयता निरूपित वह्न्यभावत्वावच्छिन्न विषयताया वह्न्यभाव विशिष्टह्रदत्वावच्छिन्न विषयित्वाव्यापकत्वेऽपि नासम्भव इति

अथवा अथयद्रूपवृत्ति निरूपकतानिरूपित विषयता शालि-निश्चयत्वव्यापकत्वं वृत्तित्वं च स्वावच्छेदकत्वात्वेत्यादि सम्ब-न्धेन इति चेत् एकत्र द्वयमितिरीत्या तादृशाकार ज्ञानस्या प्रतिबन्धकत्वात् अव्याप्तिः । उभयोरेव ज्ञानयोर्वह्निवह्नित्वाभा-वाभावत्वहृदत्वगत यावत्वस्यतादृशरूपत्वात् एवं च तादृशयो र्भेदाभावात् । अत्रसमाधानं—धीविशेषविषयत्वेन यद्रूपं विशेषणीयं तथाहि विलक्षणयोर्ज्ञानयो र्वैलक्षण्यं सम्भवति एत-न्मते तादृशरूपवृत्ति निरूपकतान्निरूपित विषयता भ्रमे न तिष्ठतीतिनातिप्रसंगः ।

चन्द्रनारायणमते—तदपि न सम्भति इति तादृश रूपवृत्ति आधेयतानिरूपिताधिकरणतावद्विषयताशालीत्यादि-कोऽर्थोज्ञेयः ।

दक्षिणदेशीयास्तु—यदवच्छेदकताकनिरूपकता निरूपित विषयताशालि निश्चयत्व व्यापकं तादृश प्रतिबन्धकत्वं तदाश्रय धर्म्मवत्वं दोषत्वं एवञ्च तन्मते अवच्छेदकतावच्छेदक साधार-ण्येन विलक्षणा वच्छेदकत्व मितिनैकत्र द्वयमितिरीत्या ज्ञान मादायकापि क्षतिरिति भावः ॥ ६८ ॥

तज् ज्ञान विशिष्ट ज्ञानत्वं तज् ज्ञान समानाकारकत्वं, वैशिष्टं च स्वनिरूपित मुख्य विशेष्यता विशिष्ट मुख्यविशेष्यता कत्व सम्बन्धेन वैशिष्ट्यं च स्वावच्छेदकता पर्य्याप्त्यधिकरण धर्म्म पर्य्याप्तावच्छेदकताकत्व मुख्यविशेष्यतावच्छेद कतानात्मक स्वनिरूपित विषयतास्वावच्छिन्न प्रति योगिताक

पर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्व— स्वसामानाधिकरण्यैत त्रितयसम्बन्धेन, रूपवृत्तित्वं च मुख्य विशेष्यतावच्छेदक तानात्मकस्वनिरूपितविषयतात्वावच्छिन्न : प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन । साक्षात् परम्परासाधारणं निरूपितत्वं । भ्रमात्मक वह्नयभाववान् ह्रदइति ज्ञानीय मुख्यविशेष्यता निरूपित विषयतापर्याप्त्यनुयोगितावच्छेदक धर्म्मः वह्नित्व, वह्नि, अभावत्व अभावगतयावत्वमेव तद्वृत्तित्वं वह्नयभाववान् ह्रदइति प्रमीय विशेष्यताया एव नतुवह्नित्वादिना घटाद्यवगाहि तादृशज्ञान निरूपित विशेष्यताया इति । नहि यथार्थ तादृश ज्ञानसमानाकारत्वं भ्रमस्य सम्भवति इति सर्व्वत्रानुसन्धानरीतिरवधेया । मुख्यविशेष्यतावच्छेदकतायाः स्वीयसांसर्गिका वच्छेदकतायाश्च व्यावर्त्तनाय स्वनिरूपित विषयतायां, मुख्यविशेष्यतावच्छेदकतानात्मकत्वं निवेशितं । महानसीय वह्नित्वावच्छिन्न विषयतावच्छेदकतात्वावच्छिन्नस्येव वह्नयभाववान् ह्रद इति ज्ञानीय मुख्यविशेष्यता निरूपित विषयतात्वावच्छिन्नस्यापिव्यासज्य वृत्तित्व सम्भवात् तादृश यावत्वस्य तत्पर्य्याप्त्यवच्छेदकत्वस्याक्षतत्वात् इति ॥ ६६ ॥

स्वरूप सम्बन्धरूपावच्छेदकत्वकल्पे पाषाण मयत्ववत् पर्व्वतेऽतिव्याप्तिः प्रदर्शिता भट्टाचार्येण— ननु पाषाण मयत्ववत् पर्व्वतत्वावच्छिन्न विषयता सामान्यान्तर्गता वह्निमान् पर्व्वतः पाषाण मय इति ज्ञानीय पाषाण मयत्ववत् पर्व्वतत्वावच्छिन्न

विषयता, साच प्रतिबन्धकतानवच्छेदिका पाषाण मयो न वह्निमानिति ज्ञान काले वह्निमान् पर्व्वतः पाषाण मय इति ज्ञानस्याहार्य्यतया अप्रतिबन्धकत्वात्। आहार्य्य निश्चय वृत्तित्व विशिष्टापि वह्निमत् पाषाणमयत्ववत् पर्व्वतत्वावच्छिन्न विषयता भवति अतः अनाहार्य्यत्व निवेशोऽपि अव्याप्तिर्न्न भवति किमिति तदुपात्तं? सत्यम्—अव्यापकीभूत विषयता-शून्यत्वस्य निवेशसत्त्वेन वह्निमत् पाषाणमयत्ववत् पर्वतत्वावच्छिन्न विषयतायाः पाषाणमयत्ववत् पर्वतत्वावच्छिन्न विषयताया अव्यापकत्वात् तत् शून्यत्व विरहबोधस्तु मशक्यत्वात् भवत्यत्ति व्याप्तिः। नियताहार्य्यस्था न एव अनाहार्य्य निश्चयावृत्तित्व विशिष्टा तादृशविषयता न भवति। केचित् वह्निमत् पाषाण मयत्वात् पर्वतत्वावच्छिन्न विषयतापि प्रतिबन्धकतावच्छेदकाभवति, पाषाण मयो वह्न्यभाववानिति ज्ञानानन्तरं तादृशज्ञानस्य अंशत आहार्य्यतया पाषाणमयत्ववत् पर्वतांशे अनाहार्य्यत्वं इत्याहुः॥ १०० ॥

यादृश विशिष्ट विषयक निश्चय विशिष्ट यादृशविशिष्ट विषयक निश्चयत्वं इत्यत्र निश्चयवैशिष्ट्यं तादात्म्येनोक्तौ पर्य्यवसान सम्भवे कथं एकक्षणावच्छेदेन एकात्मवृत्तित्व सम्बन्धेनाभिहितं? यद्वा यादृश विशिष्टविषयता निरूपकत्वे सति यादृश विशिष्ट विषयता निरूपक निश्चयत्वं प्रतिबन्धकता नतिरिक्तवृत्ती त्येव कथं नोक्तं? सत्यं जातित्वेन जलावगाहिनो जातिमान् ह्रदयभाववानिति ज्ञानस्यापि जलावच्छिन्न विशेष्यता

कतया एवं जातित्वेन द्रव्यत्वावगाहिनो जलत्वांशजातिमांश्चेति ज्ञानस्य तुल्यविषयताकत्वेनाप्रतिबन्धकतया तादृश विशिष्ट द्वय विषयताप्रतिबन्धकतातिरिक्त वृत्तिभवतीत्यतः यद्रूपावच्छिन्न विषयताया अव्यापकीभूत विषयताशून्य यद्रूपावच्छिन्न विषयताकत्वेसति यद्रूपावच्छिन्न विषयताया अव्यापकीभूत विषयताशुन्य यद्रूपावच्छिन्न विषयकनिश्चत्वं । प्रतिबन्धकतानतिरिक्त वृत्तीत्येव पर्य्यवसितं तथाच खण्डशः ज्ञानस्याप्राप्तत्वात् समूहालम्बनस्य प्राप्तत्वात वह्न्यभाववद जलवत्वावच्छिन्न विषयताया जलवद् हृदत्वावच्छिन्न विषयतायाश्च परस्पराव्यापकत्वेन तादृश समूहालम्बने अव्यापकी भूत विषयता शून्यत्वं न वर्तते इति । तादृशाव्यापकीभूत विषयता शून्यत्वं विशिष्टद्वयाघटितत्व ञ्च न निरुक्तज्ञानस्येति, परन्तु तादृश विशिष्ट द्वयाघटितत्व प्रतियोग्यप्रसिध्या असम्भवः अतः वैशिष्ट्यं न तादात्म संबन्धेनोक्तं । अथ यद्रूपावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्य ज्ञान वृत्तित्वोपलक्षित यद्रुपावच्छिन्न विषयताकत्वे सति यद्रुपावच्छिन्न विषयित्वाव्यापकीभूतविषयताशून्य ज्ञान वृत्ति त्वोपलक्षित यद्रूपावच्छिन्न विषयक निश्चयत्वं प्रति बन्धकता नतिरिक्त वृत्ति तद्रूपावच्छिन्न विषयता विशिष्ट तद्रूपावच्छिन्न विषयता शून्य प्रतीतिविषयतावच्छेदकत्वस्य लक्ष्यतावच्छेदके विशेषणीयत्वात् । एवं खण्डशो ज्ञाने न सम्भवति परन्तु समूहालम्बनएव, एवंच प्रागुक्तातिव्याप्तिरपि

न भवति वह्न्यभाववज्जलवत्त्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्य ज्ञान वृत्तित्वोपलक्षिता समूहालम्बन ज्ञानीय तादृश विषयता भवति इति; चेन्न यादृशस्थलविशेषे समूहालम्बन मेव भवति न परन्तु खण्डशोज्ञान मेव भवति तत्रत्य बाधादौ तादृशविशिष्टद्वयाघटित प्रतियोग्यप्रसिद्ध्या भवत्यव्याप्तिरतः एकक्षणावच्छेदेनैकात्मवृत्तित्वसम्बन्धेन निश्चय वैशिष्ट्य मुक्तं ॥ १०१ ॥

नन्वत्र विशिष्टद्वयाघटितत्वकल्पे किं निश्चयद्वयप्रवेशेन? सत्यं जलवान् वह्न्यभाववान्नवेति संशयीयवह्न्यभावत्वावच्छिन्न प्रकारतानिरूपित जलवत्त्वावच्छिन्न विषयताक ज्ञानविशिष्ट जलवद्ह्रदत्वावच्छिन्न विषयकज्ञानत्वं प्रतिबन्धकतातिरिक्त-वृत्ति भवति। अतो विशिष्टद्वयाघटितत्वं तादृश ज्ञानस्येति अतिव्याप्तिः।

नचाव्यापकीभूतविषयताशून्यत्व निवेशसत्त्वा न संशय मादायास्यप्रतिबन्धकत्वं। तथाहि वह्न्यभाववज्जलवत्त्वावच्छिन्न विषयताया अव्यापकीभूता वह्नित्वावच्छिन्नविषयता तच्छू-न्यत्वं न तादृशसंशये इति नातिव्याप्तिरिति वाच्यं जातेः पक्षत्वे द्रव्यत्वस्य साध्यतायां द्रव्यभेदवज्जातिरूप बाधोभवति किन्तुद्रव्यभेदवत् सद्भेदवद्वृति सद्भेदवज्जातित्वावच्छिन्ने अतिव्याप्तिः। तथाहिसद्भिन्नो द्रव्यं नवेति संशयीय निरवच्छिन्न द्रव्यत्व निष्ठप्रकारताकज्ञाने द्रव्यत्वत्वावच्छिन्न

विषयतानिरूपित सद्भिन्नत्वावच्छिन्नविषयता द्रव्यभेदवत् सद्भिन्नत्वावच्छिन्न विषयत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात्। तादृशविषयत्व स्वरूपाव्यापकीभूत विषयता शून्यत्वमस्त्विति निरुक्ताव्यापकीभूत विषयता शून्यत्वं अतोऽतिव्याप्तिरिति निश्चयपदं।

वस्तुतस्तु—ह्रदपक्षकस्वरूपतोभेदसाध्यकस्थले, भेदभेदवदभावभेदवदवृत्ति अभावभेदवद्ध्रदे अतिव्याप्त्यापत्तेः तादृशस्थलीय अभावभेदवान् भेदोनवेति संशयकालीने ह्रदोऽभावोनवेति संशये तादृशज्ञान विशिष्ट ज्ञानत्वस्य, रूपद्वयसाधारणाव्यापकीभूत विषयता शून्यत्वस्य सत्त्वादिति ॥१०२॥

अथ विशिष्टद्वयाघटित्त्व निवेशेऽपि सामानाधिकरण्येन साध्यतायां वह्निमान् ह्रद इत्यादौ वह्न्यभाववज्जलवद्वृत्ति जलवद्ध्रदे अतिव्याप्तिरेव, तत्तावच्छेदावच्छेदेन तादृश जलवत्वस्यैव प्रतिवन्धकतया व्यापकतावच्छेदक रूपभेदेनच व्यापकता वैलक्षण्यस्यावश्यकतया जलवान् वह्न्यभाववान् जलवांश्चह्रदइतिज्ञान साधारण्याज्ज्ञानवैशिष्ट्यावच्छिन्न प्रतिवन्धकतायाः कल्पयितुमशक्यत्वात्। स्वातन्त्र्येण तत्त प्रतिवन्धकताकल्पने च ज्ञानवैशिष्ट्यावच्छिन्नत्व निवेशनं प्रतिवन्धकतायामफलम्। तस्यविशिष्टद्वयाघटितत्वं निर्विरोधमितिचेन्न, ज्ञानवैशिष्ट्यावच्छिन्न प्रतिवन्धकतास्थले सामानाधिकरण्येनज्ञानमपि सामानाधिकरण्यज्ञानं प्रतिवन्धातीति तर्कमाथुरीप्रतिपादितरीत्यनुसारेण दर्शित स्थलेऽपि

ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकताया एव लाघवतः आवश्यकत्वादिति।

वस्तुतस्तु ह्रदोवह्निमानिति ह्रदत्वसामानाधिकरण्येन ज्ञानं प्रति जलवान वह्न्यभाववान ह्रदो जलवान वह्न्यभावजल-वद्वृत्ति जलवद्ध्रदः। शैवालवान वह्न्यभाववान ह्रदः शैवालवानित्यादि निश्चयानां लाघवत एकरुपेण निश्चय विशिष्ट निश्चयेत्वेन कल्पत इति न काप्यनुपपत्तिः। वैशिष्ट्यंच एकक्षणावच्छेदेनैकात्म वृत्तित्व स्वीय वह्न्यभावत्वावच्छिन्न प्रकारतानिरुपित संसर्गतानिरुपित परम्परागतावच्छेदकता (यत्र व्यापक वह्न्यभावप्रतियोगिकस्वरुपत्वावच्छिन्न संसर्गतादिनिरुपितजलत्वादिनिष्ठावच्छेदकता) वद्धर्म्मा-वच्छिन्नप्रकारता विशिष्टप्रकारतानिरुपित ह्रदत्वावच्छिन्न विशेष्यताकत्वोभयसम्बन्धेन प्रतियोगितायां प्रकारता वैशिष्ट्यंच स्वतादात्म्य, स्वविशिष्ट प्रति योगिताक संयोगत्वा वच्छिन्न संसर्गताकत्वोभय संबन्धेन प्रतियोगितायां प्रकारता-वैशिष्ट्यंच स्वावच्छेदक धर्म्मावच्छिन्नत्व स्वविशिष्टभावीय संयोगसम्बन्धावच्छिन्न प्रतियोगित्वाभावत्वावच्छिन्नाव-च्छेदकताकत्वोभय सम्बन्धेन। अभावे स्ववैशिष्ट्यंच स्वनिरुपित विशेष्यतावच्छेदक सामानाधिकरण्य स्वावच्छे-दकधर्म्मावच्छिन्नत्व स्यानवच्छेदक धर्म्मावच्छिन्नत्वोभय सम्बन्धावच्छिन्न स्वनिष्ठावच्छेदकताक प्रतियोगिताक भेदवत् प्रतियोगिताकत्व सम्बन्धेन ॥ १०३ ॥

यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्ट विषयक निश्चयत्वं प्रकृतानुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टद्वयविषयता शून्य प्रतीतिविषयतावच्छेदक मित्यर्थकरणे ह्रदो वह्निमान् धूमादित्यत्र एकत्र द्वयमिति रीत्या जलत्वावच्छिन्ने भासमान वह्निव्यापकीभूताभाव प्रतियोगित्व ह्रदवृत्तित्वोभयवज्जले अतिव्याप्तिः तज् ज्ञाने तादृश विशिष्ट विषयता द्वय शून्यत्वात् निष्कृष्टार्थस्तु तादृश विशिष्ट विषयता विशिष्टतादृशविशिष्ट निरुपित विषयताशून्य प्रतीति विषयतावच्छेदकमिति, वैशिष्ट्यं च स्वाश्रय समानाधिकरण ज्ञान वृत्तित्व सम्बन्धेन ।

न च विशिष्टद्वयाघटितत्वशरीरे अनुमितेः प्रकृतत्व निवेशन मनर्थक मिति वाच्यं ।

ह्रदो वह्निमान् गगनाभाववत् प्रतियोगित्ववत् कालीन ह्रदादित्यत्र वह्निव्यापकी भूताभाव प्रतियोगि तादृश ह्रद रुपासाधारण्याव्याप्ति वारणायानुमितौ प्रकृत साध्यकत्वस्य वह्न्यभाववत् वह्निव्यापकतावत् कालीन जल हेतुक वह्नि साध्यक स्थले वह्निव्यापकी भूताभाव प्रतियोगि तादृश जल रुपासाधारण्ये अव्याप्ति वारणाय च प्रकृतपक्षकत्वस्य निवेशात् । आद्यस्य गगनाभाववत् प्रतियोगित्ववत् प्रतियोगित्ववज्जलरुपविशिष्टद्वयेन द्वितीयस्य च वह्न्यभाववत् वह्निव्यापकत्ववत् वह्निव्यापकत्ववद्धर्मात्व रुप विशिष्टद्वयेन घटितत्वात्

अथवा ह्रदो गगना भाववद् वह्नयधिकरण निरूपितत्ववत् कालीन वह्निमान् जलादित्यत्र तादृश वह्निव्यापकीभूताभाव प्रतियोगि जलरूपासाधारण्ये अव्याप्तिरिति।

न च तथाप्यभावपक्षक वह्निसाध्यक वह्नयभाववद् वह्निव्यापकत्ववत् कालीन जलरूप हेतुके अव्याप्तिस्तादृशा साधारण्यस्य प्रकृतानुमिति प्रतिबन्धकतावच्छेदक विषयतायां विशिष्टद्वयघटितत्वादितिवाच्यं। हेतुसाध्यभेदेन हेत्वाभासलक्षणस्य नानात्वेन तादृशस्थलीयलक्षणे तादृश विशिष्टद्वय विषयतायां तादृशासाधारण्य विषयक ज्ञानीयतादृश विशिष्टद्वयविषयताभेदस्यागत्या निवेशनीयत्वात् यत्र गगनाभाववत् प्रतियोगित्ववत् कालीनात्मनोहेतुत्वं आत्मनश्च पक्षत्वं द्रव्यस्य साध्यत्वं तत्र द्रव्यव्यापकीभूताभावप्रतियोगितादृशात्मरूपासाधारण्ये अव्याप्तिवारणाय साध्यता वच्छेदक निवेशनम्।

प्रमेयपक्षक वह्नि साध्यक वह्नयभाववद्वह्निव्यापकत्ववत् कालीन जल हेतुक स्थलीया साधारण्ये ऽव्याप्ति वारणाय पक्षतावच्छेदक निवेशः। ह्रदोवह्निमान् धूमादित्यत्र धूमाभावव जलवद् जलवद्ध्रदे चातिव्याप्ति वारणार्थं पक्षे साध्यव्याप्य हेतु मत्त्वावगाहित्वं निवेशितम्। अन्यदुक्तं तत्तत्समूहालम्बना नुमिति मादाय पुर्वोक्तदोषतादवस्थ्यात् अनुमितित्वव्यापक प्रतिबध्यता निवेशः॥ १०३॥

नच विशिष्टद्वया घटितत्वकल्पेनातिरिक्तवृत्तित्वरूपावच्छेद कत्व निवेशनं व्यर्थ मितिवाच्यं, अनुमितित्वावाच्छेदं प्रति चिकीर्षा सामाग्रयाः प्रतिबन्धकत्वमते कृति साध्यत्व प्रकारक निश्चय विशिष्टइष्टसाधानता प्रकारनिश्चयत्वे स्वरूपसम्बन्ध- रूपाववच्छेदकत्वसत्त्वात्तादृश विशिष्ट द्वय विषयता शून्यत्व निवेशेनैव गौरवात् । नचाऽव्याप्त्यतिव्याप्त्यभावात् फलमुख गौरवस्याकिञ्चित् करत्व मितिवाच्यं कृतिसाध्यत्ववत्पाक- कालीनेष्ट साधनत्ववत् पाक कालीन वह्निसाध्यक जलहेतुक स्थलेऽसाधारण्येऽव्याप्त्यापत्तेः ॥ १०५ ॥

नच वह्न्यभाववद् ध्रदत्वा वच्छिन्न विषयक निश्चय विशिष्ट वह्न्यभाववद् ध्रदत्वावच्छिन्न विषयक निश्चत्वस्य प्रकृतानुमिति प्रति बन्धकतानतिरिक्त वृत्तितयाऽसम्भवः । प्रतिबन्धकतायां ज्ञान वैशिष्ट्यानवच्छिन्नत्व निवेशेन तद्वारणेऽपि वह्न्यभाववज्ज लवद् वृत्ति जलाभाववद्ध्रद पक्षक वह्निसाध्यक स्थले तादृश जलवद् ध्रदरूपाश्रयासिद्ध्यव्याप्तिः, तन्निश्चयस्यपक्षे साध्यवत्ता बुद्धि प्रत्यपि ज्ञान विशिष्टज्ञानत्वेन प्रतिबन्धकत्वात् । नच प्रकृतानुमितित्वव्यापक प्रतिबध्यता निरूपित प्रतिबन्धकता विशिष्टान्य ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकताया विशिष्टद्वया- घटितत्व शरीरे प्रवेशेपि न प्रागुक्त दोषावकाशः, वैशिष्ट्यंच स्वव्यापकत्व स्वव्यभिचारित्वोभय सम्बन्धेनेतिवाच्यं । घटो- गगनाभाववद् भाववत् कालीन गगनवानित्यत्र साध्याभाववत् पक्षरूप बाधेऽव्याप्ति प्रसङ्गात् । गगनाभाववान अभाववान्

अभाववान् घट इत्याकारक ज्ञानस्य प्रतिबन्धकत्वानुरोधो-नावश्यकल्प्य तादृश निश्चये विशिष्ट निश्चयत्वावच्छिन्न प्रति-बन्धकतयैवोपपत्तौ तादृशबाधनिश्चयस्य ज्ञान वैशिष्ट्यान-वच्छिन्न प्रतिबन्धकत्वान्तरे मानाभावात। तथाच गगनाभाववद् भावत्वावच्छिन्न विषयक निश्चय विशिष्टाभाववद् घटत्वा-वच्छिन्न विषयक निश्चयत्वस्य प्रकृतानुमिति प्रतिबन्धकता विशिष्टान्य ज्ञान वैशिष्टावच्छिन्न प्रतिबन्धकतानतिरिक्त वृत्तित्वात्।

नचेदं ज्ञानं गगनाभाववदभाववत्कालीन गगनाभावा भाववति तादृश गगन प्रकारकं इत्याकारकाप्रामाण्यज्ञानस्य तादृशगगनाभावो व्याप्यवृत्तिरित्यव्याप्यवृत्तित्व ज्ञानस्यच पृथगुत्तेजकत्वानुरोधेन तादृशबाध निश्चयस्य पक्षे साध्यवत्ता बुद्धिं प्रति विशिष्ट निश्चयत्वावच्छिन्न प्रतिबन्धकत्वान्तर मवश्यं कल्प्यं अन्यथा ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकताया मपि तयोरनुगतरूपेणोत्तेजकत्वे गगनाभाववानभावव वान् अभाव वान् घट इति ज्ञानं यदा तादृशा प्रामाण्यादि ग्रहास्कन्दितं तत्र तादृश साध्यानुमित्युत्पादापत्ति रितिवाच्यं।

तज्ज्ञानानां तद्व्यक्तित्वेनैव ज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्ध कतायामुत्तेजकत्वात् नत्वनुगतरूपेण तथाच बाधनिश्चय-कालीन तादृशाप्रामाण्य ज्ञानव्यक्तेरेव ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकताया मुत्तेजकत्वात् प्रागुक्त ज्ञानद्वय कालीनतादृशा

प्रामाण्य ज्ञानव्यक्ते रनुत्तेजकतया उक्तापत्त्यभावादितिचेन्न प्रतिबध्यतावच्छेदकविशिष्टान्यत्वस्य तादृशविशिष्टद्वयविषयतां निवेशनीयत्वात् । वैशिष्ट्यं च स्वावच्छेदकत्व, स्वनिरूपित प्रतिबन्धकतानवच्छेदकीभूतविषयताशून्य ज्ञाननिष्ठ प्रकृतानुमितित्वव्यापक प्रतिबध्यता निरूपित प्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेन ।

एतेन तादृश निश्चय विशिष्टतादृश निश्चयत्वं प्रकृतानुमित्यवृत्ति तादृश विषयता द्वय शून्यत्व विवक्षयाऽनतिरिक्तवृत्तित्वस्य विशिष्टद्वयघटितत्व शरीरे प्रवेशोऽव्यर्थं इति परास्तं पूर्वोक्ताश्रयासिद्ध्यादावव्याप्तेः ॥ १०६ ॥

विशिष्ट द्वयाघटितत्व कल्पस्यानुगमस्तु—

प्रकृतानु मिति प्रतिबन्धकता वृत्ति व्यापकतारूपाभावीय प्रतियोगित्वीय परम्परागत निश्चयनिष्ठावच्छेदकता विशिष्टप्रतियोगिताकाभाववत् प्रतीतिविषयतावच्छेदकत्वं, अवच्छेदकता वैशिष्ट्यं च स्वनिरूपित विषयित्व निष्ठावच्छेदकता निरूपितावच्छिन्नत्व सम्बन्धावच्छिन्नावच्छेदकता यद्धर्मावच्छिन्न विषयतात्वावच्छिन्नत्व, स्वनिरूपित सामानाधिकरण्य सम्बन्धावच्छिन्न वच्छेदकता निरूपित विषयित्व—निष्ठावच्छेदकता निरूपिता वच्छिन्नत्व सम्बन्धावच्छिन्नावच्छेदकता यद्धर्मावच्छिन्नविषयता वैशिष्ट्यावच्छिन्न त्व, स्वविशिष्टावच्छेदकत्वानिरूपितत्व, एतत्त्रितयसंसर्गेण. स्ववैशिष्ट्यं च स्वनिरूपित विषयित्व निष्ठावच्छेदकतानिरूपितावच्छिन्नत्व

सम्बन्धावच्छिन्नावच्छेदकतावद्धर्म्मावच्छिन्नविषयतात्व निष्ठावच्छेदकताभिन्नत्व स्वनिरूपितसामानाधिकरण्यसम्बन्धावच्छिन्न ावच्छेदकतानिरूपित विषयित्वनिष्ठावच्छेदकतानिरूपितावच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावद्धर्म्मावच्छिन्नविषयतावैशिष्ट्यनिष्ठावच्छेदकताभिन्नत्वोभयसंसर्गेण ॥ १०७ ॥

ननु वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदरूप विशिष्टस्य वह्न्यभाववज्जलवन्निरूपितवज्जलवद्ध्रदरूप विशिष्टान्तरघटितत्वा त्तत्रातिव्याप्तिशंकैव नास्तीति कथं विशिष्टद्वयाघटितत्व निवेशनस्य तद्वारण प्रयोजनकत्वोक्तिः संगच्छत इति चेन्न जलव्यापक वह्न्यभावाधिकरण निरूपितवज्जलवद्ध्रदरूप विशिष्टान्तर घटिते जलव्यापक वह्न्भावसमानाधिकरण जलवद्ध्रदरूपसत्प्रतिपक्षे ऽव्याप्ति वारणार्थं विशिष्टद्वयाघटितं यद्विशिष्टान्तरं तदघटितत्वस्यावश्यं विवक्षणीयतयोक्तस्थले ऽतिव्याप्ति सम्भवात्।

नचैवं मेयत्व विशिष्ट सत्प्रतिपक्षेऽतिव्याप्तिः तद्घटक विशिष्टान्तरस्य सत्प्रतिपक्षस्य विशिष्टद्वय घटितत्वादिति वाच्यं सत्प्रतिपक्षघटक विषयताभिन्न विशिष्टविषयता द्वय शून्य यद्रूपावच्छिन्न विषयकनिश्चयत्वं प्रकृतानुमिति प्रतिबन्धकतानतिरिक्तवृत्ति तादृशं यद्विशिष्टान्तरं तदघटितत्वस्य विवक्षितत्वात् सत्प्रतिपक्षस्य विशिष्टान्तरत्वाक्षतेः।

न च तथापि सत्प्रतिपक्षघटकविषयताभिन्न विशिष्टद्वयविषयताशून्यजलव्यापक वह्न्यभावाधिकरण निरूपितवज्जल

यद्रु ध्रदत्वावच्छिन्न विषयक निश्चयत्वस्य प्रकृतानुमिति प्रति बन्धकतानतिरिक्तवृत्तेः सत्प्रतिपक्षनिश्चये सत्त्वेन तादृश विशिष्टान्तरीभूत रूपावच्छिन्नाघटितत्वस्य सत्प्रतिपक्षेऽसत्त्वात् अव्याप्तिरितिवाच्यं । विशिष्टान्तर शरीरे तादृश विशिष्टद्वय विषयताशून्य यद्रूपावच्छिन्नविषयक निश्चये यद्रूपावच्छिन्न विषयत्वा व्यापकीभूत विषयता शून्यत्वस्यावश्यं निवेशनीयतया तादृश विशिष्टद्वय विषयता शून्य विषयत्वा व्यापकीभूत विषयताशून्य जलव्यापक वह्न्यभावाधिकरण निरुपितवज्जलवद्ध्रदत्वावच्छिन्न विषयनिश्चयत्वस्याप्रसिद्ध्या तस्यविशिष्टान्तर पदेन धर्त्तुमशक्यत्वात् ।

वस्तुतस्तु वृत्तित्व संसर्गेण वह्न्यभाववज्जलवद्विशिष्ट जल वद्ध्रदत्वावच्छिन्नेऽतिव्याप्तिप्रदर्शनपरग्रन्थतात्पर्यं । तथाच नास्ति विशिष्टान्तरघटितत्वशंका । वृत्तिपदंचैतादृश सम्बन्धतात्पर्यकमेवेति ॥ १०८ ॥

अथात्रविशिष्ट द्वयाघटितत्वमनिवेश्य विशेष्यदलस्थित प्रतिबन्धकतायां ज्ञानवैशिष्ट्यावच्छिन्नत्वासाधारण्य विषयत्वानवच्छिन्नत्व विरुद्धानुमितिजनकतावच्छेदक विषयत्वानवच्छिन्नत्व प्रतिवध्यताविशिष्ट विशेष्यतानवच्छिन्नत्वैतच्चतुष्टयाभाव निवेशे वह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादौनाति व्याप्ति र्नापि सत्प्रतिपक्षेऽव्याप्तिः । प्रतिबध्यतावैशिष्ट्यं च स्वावच्छेदकत्व स्वनिरूपितप्रतिबन्धकतानवच्छेदकीभूत विषयताशून्यज्ञाननिष्ठ प्रकृतानुमितित्वव्यापक प्रतिबध्यता

निरूपित प्रतिबन्धकतावच्छेदकत्वोभयसम्बन्धेनेति तु विभावनीयं ॥ १०६ ॥

यादृश विशिष्ट विषयक निश्चयत्वं ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतानतिरिक्तवृत्ति तादृशैकविशिष्टाघटितत्व निवेशे नैव सामञ्जस्ये तादृश गुरुतर निवेशनं किमर्थमितिचेन्न। वह्न्यभाववज्जलवद्वृत्ति जलवद्ध्रदत्वावच्छिन्न विषयत्ववान्नेति वह्न्यभाववज्जलवत् कालीनजलवद्ध्रदत्वावच्छिन्न विषयतावान्नेत्यादिभेदकूटनिवेशे गौरवात्, मन्मते च तत्र वह्न्यभाववज्जलवत्वावच्छिन्न विषयताविशिष्ट जलवद्ध्रदत्वावच्छिन्न विषयत्वाभावस्यैकस्य प्रवेशाल्लाघवम्। न च तादृशप्रतिबन्धकतावृत्तिरूपावच्छिन्न विषयताशून्यत्वरूप सामान्याभाव निवेशे किंवा तादृश प्रतिबन्धकतावृत्त्यभावीय (व्यापकतद्रूपाभावीय) प्रतियोगितानिरूपित परस्परावच्छेदकतावद्रूपावच्छिन्न विषयताशून्यत्वरूप सामान्याभावनिवेशे गौरवानवकाश इतिवाच्यम्! गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वमते यादृशासङ्कीर्ण बाधस्थले तदघटितरूपाप्रसिद्धिः तत्र प्रतिबन्धकतावृत्तिरूपावच्छिन्न विषयतात्वापेक्षया लघुतरे तादृश विषयताविशिष्टविषयतात्वे प्रतियोगितावच्छेदकत्व स्वीकाराद भावाप्रसिद्ध्या. गन्धाभाववदुत्पत्तिकालावच्छिन्नत्ववद्वृत्ति उत्पत्तिकालावच्छिन्नत्ववद्घटेऽतिव्याप्त्यापत्तेः। रूपे प्रतिबन्धकतावृत्तित्वं च स्वावच्छिन्न निश्चयत्वसम्बन्धेन।

अथवा यादृशस्थलविशेषे तादृशविशिष्टविषयकं ज्ञानं

एकमात्ररूपावच्छिन्नमेवजायते तत्र तादृशरूपावच्छिन्न विषयतात्वे एव लाघवतः प्रतियोगित्तावच्छेदकत्वं स्वीक्रियते न तु निवेशितानुगतरूपे गौरवात् तथा च निवेशितानुगता भावा प्रसिद्धिरिति ॥ ११० ॥

सत्प्रतिपक्षाघटक विषयताभिन्नत्वञ्च यादृश विशिष्टविषयक निश्चयविशिष्ट यादृशविशिष्टविशकनिश्चयत्वं सत्प्रतिपक्षतावच्छेदकरूपावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्न विषयताभिन्नत्वं विषिष्टद्वय विषयतायां निवेशनीयं, अतएव यत्र सत्प्रतिपक्षाऽप्रसिद्धिस्तत्र भिन्नान्तमनुपादेयमेवेति ग्रन्थः संगच्छते।

ननु यत्र सतप्रतिपक्षाप्रसिद्धिस्तत्रविशिष्टद्वयाघटितत्व निवेशएवकथमितिचेन्न काञ्चनमयः पर्वतो वह्निमानित्यत्र काञ्चनमयत्वाभाववत्तद्वयक्तिमद्वृत्तितद्वयक्तिमत्पर्वते अतिव्याप्ति वारणायैव तन्निवेशस्यावश्कत्वात्। भ्रमप्रमासाधारणे अत्र विरुद्धानुमितिजनकतावच्छेदकविषयतात्वेनसत्प्रतिपक्षविषयता भेदनिवेशनंभाव्यमिति ॥ १११ ॥

विरोधोऽपि फलतः प्रतिरोधएव तदन्यत्वेनवा विरोधि विशेषणीयमिति गादी। व्याप्तिग्रह विरोधिविषयतावच्छेदकस्य व्यभिचारत्वे साध्यसमानाधिकरणहेतुरूप विरोधेऽतिव्याप्तिरित्याशङ्कापरिहार्थं विरोधोऽपीति सव्यभिचारग्रन्थः। अस्यायमाशयः—प्रतिरोधः सत्प्रतिपक्षः तथा च विरोधः फलतः प्रतिरोध एव सत्प्रतिपक्षतुल्यएव यथासत्प्रतिपक्षस्य साध्या-

भावानुमापक विधया साध्यवत्त्वग्रहविरोधित्वेन दूषकत्वं तथा विरोधस्यापीति।

एवं साध्यव्यापकीभूताभाव प्रतियोगिजलस्यैव विरोधिरूपता, साध्यासमानाधिकरण हेतोश्चासाधारणरूपतेति हृदयम्। साध्यासमानाधिकरणहेतोर्विरोधितां निर्वाचितविरोधस्यच असाधारण्यरूपता मुपगम्य पक्षान्तरमाह तदन्यत्वेनवेति। साध्यासमानाधिकरणविषयताभिन्नत्वेन सव्यभिचार लक्षण घटक विरोधिविषयता विशेषनीयेप्यर्थः। तद्व्याख्यानाव सरे पक्षावृत्तित्वघटित साध्यव्यापकाभाव प्रतियोगिजलस्यानुमित्यप्रतिवन्धकत्वेन हेत्वाभासत्वाद्यप्रसङ्गाशंकानिराकरणार्थं तत्र प्रकृतानुमित्यप्रतिवन्धकत्वं पक्षे हेतुमत्तानिश्चयकलीनश्चैतदुभयाभावे निरुक्तयद्रूपावच्छिन्नविषयकत्व व्यापकता-निवेशनमिति पक्षवृत्तित्वाघटितस्यैव—दर्शित विशिष्टस्य हेत्वाभासता संगच्छेते॥ ११२॥

अथ स्वावच्छिन्नविषयताशून्य यद्रूपावच्छिन्नविषयता-शालिनिश्चयत्वं प्रकृतानुमितिप्रतिवन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नाघटितत्वेनैवोपपत्तौ विशिष्टान्तरयद्रूपे स्वावच्छिन्नविषयकप्रतीतिविषयताघच्छेदकत्वपर्य्यन्तनिवेशे गौरव मितिचेन्न। यत्रांकुरविशेषे अनाहार्य्यव्यभिचार विषयकं ज्ञानं मेयत्वविशिष्ट व्यभिचारमवगाह्यैवजायते आहार्य्य व्यभिचार ज्ञानन्तु तदनवगाह्यापि तत्र मेयत्वविशिष्ट व्यभि-चारे अतिव्याप्तिप्रसंगत। मेयत्वविशिष्ट व्यभिचारत्वावच्छिन्न

विषयकनिश्चयाप्रसिद्ध्या विशिष्टान्तरत्वेन व्यभिचारस्य धर्त्तुमशक्यत्वात् अस्मन्मतेच स्वावच्छिन्नाविषयका हार्य्य-प्रतीतिविषयतावच्छेदकत्वस्य व्यभिचारत्वे प्रसिद्धत्वात् अदोष इति ।

नच एतादृशांकुरोयगमे तत्स्थलीय व्यभिचारे अव्याप्तिः स्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्यानाहार्य तादृशनिश्चयाप्रसिद्धे रितिवाच्यम् ।

अनाहार्य निश्चयत्वविशिष्ट स्वावच्छिन्न विषयता-व्यापकीभूत विषयताशून्यत्वस्य विशेष्यदलघटकनिश्चये विवक्षणीयत्वात् ॥ ११३ ॥

अथ विशिष्टान्तरशरीरे प्रविष्टान्तरपदस्य स्वानवच्छिन्न-प्रकारतावच्छेदकार्थकत्वेनैवोपपत्तौ स्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकार्थकत्व मफलम् ।

नच यत्रांकुरविशेषे दोषद्वयविषयकमेव ज्ञानं नियमतो जायते नतु तदेकतरावगाहि तत्राव्याप्तिः एकदोषतावच्छेदकत्व स्वानवच्छिन्न प्रकारतावच्छेदक तादृशापरदोषतावच्छेदक रूपविविष्टान्तरावच्छिन्नाविषयक प्रतीतिविषयतावच्छेद-कत्वस्य स्वस्मिन् दुर्घटत्वात् । स्वावच्छिन्नाविषयक ज्ञानमात्रस्यैव तादृशदोषान्तरतावच्छेदकावच्छिन्नविषयत्वात् । अस्माकन्तु स्वावच्छिन्ना विषयकप्रतीति विषयतावच्छेदकत्व विरहेण निरुक्त विशिष्टस्य विशिष्टान्तरत्व विरहात् अन्यत पुनर्विशिष्टान्तरमादाय लक्षणसमन्वयसम्भवादितिवाच्यं ।

तदघटितत्व पदेनापि तदनवच्छिन्न प्रकारतावच्छेदकरुपार्थ विवक्षणादव्याप्ति सम्भावनाविरहादितिचेन्न व्यभिचारत्व-विशिष्टमेयत्वे अतिव्याप्तेः साक्षात्परम्परासाधारणावच्छेदक-त्वस्याननुगततया विशिष्टान्तरीभूत व्यभिचारत्वावच्छिन्न प्रकारतावच्छेदकत्वस्य व्यभिचार विशिष्टमेयत्वे सत्वात्। अस्माकन्तु विशिष्टान्तरीभूत व्यभिचारत्वा वच्छिन्नाविषयक-प्रतीतिविषयतावच्छेदकत्वस्य तत्रासत्वा न्नोक्तातिव्याप्ति-सम्भावना। अत्र लक्ष्यतावच्छेदके तादृशानतिरिक्तवृत्तित्व रूपावच्छेदकतावद्विषयतावच्छेदके रूपसम्बन्धरूपावच्छेद-कतावत्वस्यापि निवेशेनोक्ता मीमांसा निष्कलंकेति-चिन्त्यं ॥ ११४ ॥

विशिष्टान्तराघटितत्व सहित लक्षणानुगमस्तु। प्रकृतानु-मिति प्रतिबन्धकतावृत्ति व्यापकतारुपा भावीय प्रतियोगिता-निरुपित परम्परावच्छेदकतावद्धर्म्मविशिष्ट (लक्ष्यतावच्छे-दकविशिष्ट) धर्म्मवत्वं दोषत्वं सम्बन्धघटक वृत्तित्वञ्च-स्वविशिष्ट धर्म्मावच्छिन्न विषयकत्वसम्बन्धेन वैशिष्ट्यं स्वतादात्म्य, स्वविशिष्ट धर्म्मावच्छिन्नाविषयकप्रतीति विषयकावच्छेदकत्वोभयसम्बन्धेन। सम्बन्धघटकवैशिष्ट्यञ्च स्वावच्छिन्ना विषयकप्रतीविषयतावच्छेदकत्व स्वकालीन प्रकृतानुमिति प्रतिबन्धकतानतिरिक्तवृत्तिविषयतावच्छेद-कत्वोभयसम्बन्धेन ॥ ११५ ॥

विशिष्टान्तररूपावच्छिन्नविषयकत्वं लाघवाज्ज्ञाने निवेश्य मितिगादी।

अत्रानुगमः, प्रकृतानुमितिप्रतिबन्धकतावृत्तिव्यापकता रुपाभावोय प्रतियोगिता निरुपित परम्परागतावच्छेदकता वद्धर्म्मत्वं दोषत्वमिति। अवच्छेदकतावत्वञ्च स्वनिरुपित निरुयकत्वसम्बन्धावछिन्नविषयत्वनिष्ठावच्छेदकता निरुपित अवच्छिन्नत्वसम्बन्धावच्छिन्नावच्छेदकतावत्व, स्वाश्रयवृत्तित्वोभयसम्बन्धेन सम्बन्धघटकवृत्तिश्च स्वविशिष्टधर्म्मावच्छिन्नविषयकत्वसम्बन्धेन। स्ववैशिष्टाञ्च स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व स्वकालीनप्रकृतानुमितिप्रतिबन्धकतानतिक्तिवृत्तिविषयतावच्छेदकत्वोभयसम्बन्धेन ॥ ११६ ॥

विशिष्टान्तरतावच्छेदकरूपे स्वरूपसम्बन्धरूपावच्छेदकत्व निवेशेनैन सामञ्जस्ये किमर्थमनतिरिक्त वृत्तित्वरूपावच्छेदकत्वं निवेशितमितिचेन्न। निरवच्छिन्नस्वरूपसम्बन्धेन वह्न्यभाववतो ह्रदस्य दोषस्वीकर्त्तृ मते स्वरूपसम्बन्धरूपावच्छेदकत्व निवेशे तत्राव्याप्त्यापत्तेः तादृशह्रदत्वे स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकं प्रकृतानुमितिप्रतिबन्धकता निरूपित स्वरूपसम्बन्धात्मकावच्छेदकतावत् यत् शुद्धस्वरूपसम्बन्धघटितं वह्न्यभाववद्ह्रदत्वरूपं विशिष्टान्तरं तदवच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकत्वविरहादनतिरिक्त वृत्तित्वरूपावच्छेदकत्वनिवेश इति। नच यद्रूपावच्छिन्न

विषयतासामान्यं प्रकृतानुमिति प्रतिबन्धकता निरूपित स्वरूपसम्बन्धरूपावच्छेदकतावत् स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदक तद्रूयावच्छिन्नाघटितत्व निवेशेनैव सामञ्जस्यमितिवाच्यं। जलव्यापक वह्न्यभावसमानाधिकरणेत्यादि सत्प्रतिपक्षे अव्याप्त्यापत्तेः जलवद्ध्रदत्वावच्छिन्न विषयता सामान्यस्य तादृशविशिष्टान्तरत्वादिति॥ ११७।

अथ दोषपदार्थान्वयितावच्छेदके (व्यभिचारत्वादौ) अनुमिति प्रतिबन्धकतावच्छेदक विशिष्टान्तराघटित स्वावच्छिन्नविषयताकत्वस्य पारतन्त्र्येणान्वयोपगमेऽपि मेयत्व-विशिष्ट व्यभिचारो दोष इति व्यवहारो दुष्परिहर इति विशिष्टस्य शुद्धानतिरिक्ततया शुद्धस्य तादृशधर्म्मवत्वे विशिष्टेऽपि तथात्वस्याक्षतत्वात् विशेष्यवृत्तिपदार्थस्य वैशिष्ट्यावच्छेदेनाभावे मानाभावादितिचेन्न। विशिष्टान्तराघटितत्वविशिष्टानुमिति प्रतिबन्धकतावच्छेदक विषयतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकं यत् दोषपदार्थान्वयितावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकरूपं तदवच्छिन्नानुयोगिताक पर्य्याप्तिसम्बन्धेनान्वयितावच्छेदकधर्म्मे विशिष्टान्तराघटितत्वविशिष्टानुमितिप्रतिबन्धकतावच्छेदक विषयतावच्छेदकत्वस्यान्वयोपगमेनोक्तातिप्रसंगानवकाशात्॥ ११८॥

शुद्ध व्यभिचारादेर्मेयत्व विशिष्टव्यभिचाराद्यभिन्नत्वेऽपि नक्षतिरिति—गा-टी। विशिष्टान्तरपदेन स्वभिन्नतादृश-

विशिष्टरूप यथाश्रुतार्थग्रहणे प्रसजन्तीं क्षतिं वारयति नक्षति-रित्यन्तेन ॥ ११९ ॥

स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदक मिति गा-टी—ज्ञानेच्छादिसाधारण विषयतात्वस्यानुगततया स्वावच्छिन्न विषयत्वाभावकूटनिवेश आवश्यक इति महद् गौरवं तथाच ज्ञानीयानुगत तादृशविषयतात्वेनाभाव लाभार्थं प्रतीतिपदं ॥ १२० ॥

मेयत्व विशिष्ट व्यभिचारत्वाद्याश्रयाविषयकत्वस्य व्यभिचारत्वाद्यवच्छिन्न विषयकप्रतीतौ दुर्घटत्वात्तद्दोषः अतः स्वाश्रयाविषयकत्व मुपेक्ष्य स्वावच्छिन्नाविषयकत्व निवेशः इति गा-टी—॥ अथात्रस्वाश्रयाविषयप्रतीति विषयतावच्छेदकत्व निवेशेऽपि मेयत्वविशिष्ट व्यभिचारे नातिव्याप्तिः स्वाश्रयाविषयिणी व्यभिचारत्वेन घटावगाहिनी या प्रतीतिः तद्विषयतावच्छेदकत्वस्य व्यभिचारत्वे सत्त्वेन तस्य विशिष्टान्तरत्वानपायादिति चेन्न। एवं रीत्या सर्व्वत्रासम्भव-प्रसक्ते र्वारणार्थमेव स्वाश्रयाविषयक प्रतीति विषयताविशिष्ट-स्यैवान्तरपदेन विषक्षणीयत्वस्यावश्यकतया व्यभिचारत्वस्य विवक्षितविशिष्टान्तरानात्मकत्वेनोक्तातिप्रसंगसंगतेः। वैशि-ष्ट्यञ्च स्वावच्छेदकत्व—स्वसामाणाधिकरण्योभय सम्ब-न्धेन ॥ १२१ ॥

स्वावच्छिन्नाविषयक प्रतीति विषयवृत्तित्वस्य तादृश धर्म्मे विशेषणत्वे व्यभिचारत्वादेरपि मेयत्वादिना व्यभिचार-

त्वाद्यवच्छिन्नाविषयक प्रतीति विषये व्यभिचारादौ वर्त्तमान त्वादसम्भव इत्यत स्ताद्रृशविषयतावच्छेदकत्वेन धर्म्मो विशेषित इति गा-टी ।

अथ पश्चादुक्तस्य तदवच्छिन्नाविषयक प्रतीतिविषयतावच्छेदक इत्यत्रावच्छेदकदलस्याग्रे व्यावृत्तिमभिधाय पूर्व्वोक्त दलस्थावच्छेदकपदस्य पश्चाद्व्यावृत्त्यभिधानं सन्दर्भ विरुद्ध मिति चेन्न । विशिष्टान्तर रूपावच्छिन्नाविषयक प्रतीति-विषयत्वस्यनिवेश सत्त्वे अन्तरपदार्थे ताद्रृशविषयवृत्तित्व-निवेशेऽपि क्षतिविरहात्, व्यभिचारत्वावच्छिन्नाविषयक प्रतीतिविषयवृत्ति यद्व्यभिचारत्वादिकम् तदवच्छिन्नाविषयक मेयत्वावच्छिन्न विषयक प्रतीति विषयत्वस्य व्यभिचारादौ सत्त्वेनोक्तासम्भवानवकाशात् । किन्तु मेयत्व विशिष्टव्यभि-चारादावतिव्याप्ति स्तद्वारणार्थं पश्चादुक्तदले ऽवच्छेदकत्व निवेश एवोक्तासम्भवः संगच्छते, इतिसन्दर्भ संगति-रवधेया ॥ १२२ ॥

अथ धूमव्यभिचारि वह्निमान् धूमवान् वह्नेरित्यादौ बाधादे-र्व्यभिचारादिघटिततया तत्राव्याप्तिरित्यादि गा-टी । नचात्र धूमव्यभिचारिवह्नेः पक्षत्वे एवोक्तदोषदानसम्भवात् धर्म्मि-पर्य्यन्तानुसरण मनुचितमितिवाच्यं धूमव्यभिचारिवह्नय-वच्छेदेनैव धूमाभावसत्त्वात् अवच्छेदावच्छेदेन सामानाधि-करण्येनच बाधबुद्धेः प्रतिबन्धकतासङ्कलनेन उभयविधबाधे दोषदानाभिप्रायेण धर्म्मिपर्य्यन्तानुसरणौचित्यात् । ताद्रृशवह्नेः

पक्षत्वेतु तादृश वह्नित्वावच्छेदेन धूमाभाववत्त्वबुद्धे र्भ्रमत्वात् नैतत्स्थले अवच्छेदावच्छेदेन बाधदोषः सम्भवतीति हृदयम् ॥ १२३ ॥

प्रथमनचकल्पे—यद्रूपावच्छिन्नविषयकत्वं स्वावच्छिन्न विषयकत्वावच्छिन्नप्रतिबन्धकता सामान्यावच्छेदकं इत्यत्रा-वच्छेदकत्वद्वयं अनतिरिक्तवृत्तित्वरूपंबाच्यं तथाच स्वावच्छिन्नविषयताव्यापकं प्रतिबन्धकतासामान्यं यद्रूपाव-च्छिन्नविषयताव्यापकं तादृशं यद्विशिष्टान्तरं तदघटितत्वमिति समुदितार्थः। एतत्कल्पे स्वातन्त्र्यण विशेष्यदलं नास्ति एतावतैव तदर्थनिर्वाहात्। तत्र द्वितीयावच्छेदकत्वस्य स्वरूप-सम्बन्धरूपत्वे जलव्यापकवह्न्यभावसमानाधिकरण जलवद् ह्रदरूपसत्प्रतिपक्षेऽव्याप्तिः स्वावच्छिन्नविषयिताव्यापक प्रति-बन्धकतासामान्यस्यैव जलवद्ह्रदत्वावच्छिन्नविषयिताकत्वेन (समानाकारकज्ञानीयविषयताया ऐक्येन यद्रूपावच्छिन्न विषयतासामान्यं प्रतिबन्धकतासामान्यावच्छेदकं इति निवेशेऽप्ययमेव दोषइति विभावनीयं) जलवद्ह्रदस्यैव विशिष्टा-न्तरत्वसम्भवात्। एवञ्चप्रथमावच्छेदकत्वस्य स्वरूपसम्बन्ध-रूपत्वे वह्न्यभाववद्ह्रदरूपबाधत्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदक विषयतावच्छेदकरूपाप्रसिद्धिः स्यात्, अभाववान् वह्न्यभाववान् अभाववांश्चह्रद इति ज्ञानद्वयसाधारणज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायां वह्न्य-भाववान् ह्रद इति ज्ञाननिष्ठायाः सुतरां वह्न्यभाववद्ह्रदत्वा-

वच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकता सामान्यान्तर्गतत्वेनावश्यकस्य तदनतिरिक्त विषयतावच्छेदकत्वस्य कुत्राप्यसत्त्वात् ॥ १२४ ॥

एवञ्चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वप्रवेशे असम्भवभयेन तत्र तत्राव्यापकीभूतविषयताशून्यज्ञानीयत्वं निवेश्यम्, नच यद्रूपावच्छिन्नविषयतायां यद्रूपावच्छिन्न विषयत्वाव्यापकीभूतविषयताशून्यज्ञानीयत्वनिवेशनमनर्थकं स्वावच्छिन्न विषयत्वाव्यापकी भूतविषयताशून्यज्ञानीयत्वनिवेश एव चरितार्थत्वादितिवाच्यम् । जातिमद्वह्न्यभाववद्ध्रदेऽतिव्याप्तेः यद्रूपपदेन वह्न्यभाववद्ध्रदत्वस्यधर्तुमशक्यत्वात् वह्न्यभाववज्जातिमत्त्वस्यापि स्वावच्छिन्न विषयत्वाव्यापकीभूतविषयताशून्यज्ञानीयविषयतानिरूपकतावच्छेदकत्वेन प्रतिबन्धकतायां वह्न्यभाववद्ह्रदत्वावच्छिन्न विषयत्वाव्यापकत्वादिति । एवंच ह्रदे वह्न्यभावत्वस्य तादृशविशिष्टान्तरतया वह्न्यभाववद्ह्रदादौ लक्षणसमन्वयः । नच ह्रदे वह्न्यभावः वह्न्यभाववद्ह्रदइति ज्ञानद्वय साधारणं नैकं प्रतिबन्धकत्वमिति कथं ह्रदेवह्न्यभावत्वं वह्न्यभाववद्ह्रदत्वावच्छिन्नविषयत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदक विषयतावच्छेदकमितिवाच्यं स्वरूपसम्बन्धातिरिक्तसम्बन्धानवच्छिन्न वह्न्यभावत्वावच्छिन्नविषयता निरूपिताधेयतासम्बन्धातिरिक्तसम्बन्धानवच्छिन्न ह्रदत्वावच्छिन्न विषयताशालिनिश्चयत्वेनैकरूपेणोभयोः प्रतिबन्धकत्वकल्पनात् ।

नचैवं कालिकस्वरूपोभयसम्बन्धेन वह्न्यभाववद्ध्रदज्ञानस्याप्रतिबन्धकत्वापत्तिः, तदीयवह्न्यभावत्वावच्छिन्न विषयतायाः स्वरूपातिरिक्तेन कालिकेनावच्छेददादितिवाच्यम्। स्वरूपत्वावच्छिन्नसंसर्गत्वानिरूपित वह्न्यभावत्वावच्छिन्न विषयतानिरूपिताधेयत्वानवच्छिन्न संसर्गत्वानिरूपितह्रदत्वावच्छिन्न विषयताशालि निश्चयत्वेन ह्रदे वह्निवैशिष्ट्यावगाहि बुद्धिं प्रति प्रतिबन्धकत्व कल्पनेनैव सर्व्वदोष व्युदाससम्भवात्।

एतच्चसंसर्गताया मध्यपातित्वानभ्युपगमे बोध्यम्। स्वसंयोगवत् प्रतियोगिक संयोगवदनुयोगिकसंयोगेन वह्निमानिति ज्ञानसाधारणस्य संयोगसम्बन्धावच्छिन्न वह्न्यभाववत्ताबुद्धि प्रतिबन्धकत्वापत्तेर्व्वारणाय तत्स्वीकार आवश्यक इति तथाचैतन्मते तादृशपरम्परायाः संसर्गत्वे मानाभावइति।

नचैवंविशिष्टान्तरा प्रसिद्धिनिबन्धनासम्भवभिया कल्पस्यास्यपरित्यागो न संगच्छते ह्रदे वह्न्यभावन्वादेः विशिष्टान्तरस्योक्तरीत्या प्रसिद्धिसंभवादितिचेन्न बाधविशिष्ट व्यभिचारेऽतिव्याप्तिवारणार्थं यद्रूपावच्छिन्नविषयतायां स्वावच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्य ज्ञानीयत्व निवेशस्यावश्यकतामभ्युपेत्य तादृशविशिष्टान्तराप्रसिद्धि निबन्धनासम्भवरूपदोषस्योद्भाविततत्वात्। अन्यथा स्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतासामान्यानवच्छेदक विषयतावच्छेदक विशिष्टान्तरव्यभिचारविशिष्टबाधत्वघटक

मेवात्र संभवतीति तथाच तदघटितत्वेनातिव्याप्तेरशक्यपरिहार्त्वं। तन्निवेशेच विशिष्टान्तराप्रसिद्धैयव नातिव्याप्तिः एवंन सर्व्वत्रैवोक्तरीत्या विशिष्टान्तराप्रसिद्धेरसम्भव इति ग्रन्थ संगतिः।

न्यायरत्नपादास्तु अतिव्यप्तिवारणार्थं दत्त विशेषणेना सम्भवोभवतीत्यथभिप्रायः, नितरां बालकबुद्धिप्रसूतइति मत्वा एकरूपेणैव ह्रदे वह्न्यभावः वह्न्यभावद्वह्रदत्वादेः प्रतिबन्धकत्वमितिप्राचीन मतभिप्रायेण प्रथमनचकल्पोत्यितिः तथाच व्यभिचारघटितबाधीदौ सर्वत्रद्वितीयरूपं विशिष्टान्तरं तदघटितत्वमप्यस्ति इति सर्व्वत्र लक्षनसमन्वयः ग्राह्याभावबुद्ध्यैव प्रतिबन्धकत्वं नत्वेकरूपेण इति स्वकीयमताभिप्रायेणासम्भवोदत्तः, परेतुकल्पे एतन्मताभिप्रायकत्वंस्वस्य स्पष्टीकृतं। अथभवतु येनकेनापि मताभिप्रायेण लक्षणे असम्भवो नभवत्येवइतिचेत् सत्यंप्राचीनमते असम्भवोनास्ति परन्त्वव्याप्तिर्भवति, तथाहिगुणकर्म्मान्यत्वविशिष्टसत्त्वाभाववान घट इत्यनुमितौ विशिष्टसत्तावद्घटस्यैव बाधत्वं नतु घटवृत्तित्वविशिष्टसत्तादेः, तस्यगुणादिसाधारण्यात्। तथाच तत्विशिष्टान्तराप्रसिद्ध्या विशिष्टसत्तावद्घटरूपबाधे अव्याप्तिः एतन्मतेऽसम्भवः॥ १२५॥

अत्र स्वावच्छिन्न विषयतायां असाधारण्यविषयत्वाव्यापकीभूत विषयिताशून्यज्ञानीयत्वोपलक्षितासाधारण्य विषयतास्व, पक्षधर्मिकहेतुमत्ताज्ञानकालीनत्वोभयाभाव-

वह्निश्चयीयत्वं निवेश्यं अन्यथा वह्निव्यापकी भूताभावप्रतियोगिजलरूपासाधारण्ये अव्याप्तिः स्वावच्छिन्नविषयित्वावच्छिन्नप्रतिबन्धकत्वाप्रसिद्धेरिति । एवमग्रेऽपि ॥ १२६ ॥

अनुगमस्तु धर्म्मविशिष्टि धर्म्मवत्त्वं वैशिष्ट्यं स्वतादात्म्य स्वविशिष्टधर्म्मावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकत्वो भयसम्बन्धेन, सम्बन्धघटक वैषिष्ट्यंच स्वविशिष्टविषयता व्यापक प्रतिबन्धकतात्वव्यापकत्व, स्वावच्छिन्नाविषयकप्रतीति विषयतावच्छेदकत्व,स्वावच्छिन्नविषयत्वाव्यापकीभूत विषयता शून्यज्ञानीय विषयतावच्छेदकत्व एतत्त्रितयसम्बन्धेन । प्रतिबन्धकतात्वव्यापकताच स्वविशिष्टविषयिता व्यापकत्वसम्बन्धेन उभयश्च विषयितम्यां स्ववैशिष्ट्यंच स्वावच्छिन्नत्व स्वावच्छिन्नविषयित्वाव्यापकीभूतविषयताशून्यज्ञानीयत्वोभयसम्बन्धेन ॥ १२७ ॥

अथात्र बाधत्वावच्छिन्नाविषयक प्रतीतिविषततावच्छेदकं यद्व्यभिचार विशिष्टमेयत्वादिकं एवं व्यभिचारत्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकं बाधत्वविशिष्ट मेयत्वादिकं तदाश्रयाविषयक प्रतीत्यप्रसिद्धया सर्व्वत्रासम्भव सम्भवे अव्याप्तिदानं सन्दर्भ विरुद्धं इति चेन्न, विशिष्टान्तररूपे प्रकृतानुमिति प्रतिबन्धकताया अनतिरिक्त वृत्तित्वेसति स्वरूपसम्बन्धरूपावच्छेदकतावती या विषयता तदवच्छेदकत्वस्य विवक्षणेऽसम्भवाभावात् ।

नच तथापि ह्रदोवह्निमानित्यत्र वह्नयभाववद् ह्रदत्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकं यद् वह्नयभाव व्याप्यवद् ह्रदत्वादिकं तदाश्रयाविषयक प्रतीति विषयतावच्छेदकत्वस्य बाधत्वेऽसत्त्वात् प्रसिद्धस्थलीय बाधेऽव्याप्ति सम्भवेऽप्रसिद्धस्थलानुधावनमनुचितमितिवाच्यं, वह्नयभाववयाप्यवद् ह्रदत्वाश्रयाविषयकं यद् वह्नयभावव्याप्यवद् ह्रदत्वेन घटावगाहि ज्ञानं तद्विषयतावच्छेदकत्वस्य तादृश बाधत्वे सत्त्वादव्याप्ति विरहादिति ॥ १२८ ॥

स्वावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदकेत्यादि। उभयत्रैवावच्छेदकत्वं अनतिरिक्तिवृत्तित्वरूपं वाच्यं द्वितीयावच्छेदकत्वस्य स्वरूपसम्बन्धरूपत्वे स्वावच्छिन्न विषयकत्वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदक विषयतावच्छेदकत्वस्य स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूत जलवद् ह्रदत्वे सत्त्वेन स्वपदेन जलव्यापकवह्नयभावसमानाधिकरणजलवद् ह्रदत्वस्य धर्त्तुं शक्यतया तत्र सत्प्रतिपक्षाव्याप्तिः, तथाच प्रथमावच्छेदकत्वस्य स्वरूपसम्बन्धरूपत्वे वह्नयभाववद्ह्रदादावव्याप्तिः, अभाववान्वह्नयभाववान् मेयत्व विशिष्टवह्नयभाववद्ह्रद इत्यादिज्ञाननिष्ठाया ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकताया अपि मेयत्व विशिष्टबाधत्वावच्छिन्नविषयत्वावच्छिन्न प्रतिबन्धकता सामान्यान्तर्गततया तदवच्छेदक विषयिता निरूपकतावच्छेदकरूपा प्रसिद्धे रिति।

एवञ्चानतिरिक्तवृत्तित्वरूपावच्छेदकत्वप्रवेशे अव्यापकी-

भूतविषयताशून्यज्ञानीयत्वमपि तत्र तत्र निवेशनीयम्। स्वाव-च्छिन्नाविषयक प्रतीतिविषयतावच्छेदकेत्यत्र स्वानवच्छिन्न-प्रकारतावच्छेदकेत्युक्तौ यत्राङ्कुरविशेषे व्यभिचारविषयक ज्ञानं नियतमेववाधविषयकं भवति तत्र व्यभिचारे ऽव्याप्तिः, स्वावच्छिन्न विषयत्वावच्छिन्न प्रतिवन्धकता सामान्याव-च्छेदक विषयितानिरूपकतावच्छेदक स्वानवच्छिन्नप्रकारता वच्छेदकव्यभिचारत्वकत्वेन वाधत्वस्य स्वपदेनधर्त्तुं शक्य-त्वात्। स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकत्वस्य व्यभिचारत्वे विरहात्।

अथ तदघटितत्वमपि तदनवच्छिन्नप्रकारतावच्छेदकत्व रूपमेव वाच्यमिति न काप्यनुपपत्तिः वाधत्वानवच्छिन्न-प्रकारतावच्छेदकत्वस्त व्यभिचारत्वे सत्त्वेनोक्तस्थले वाधत्वस्य स्वपदोपात्तत्वेऽपि क्षति विरहादितिचेन्न, यत्रा-ङ्कुरविशेषे मेयत्वविशिष्ट वाधविषयकं ज्ञानं नियमतो मेयत्व विशिष्ट व्यभिचार विषयकमेव भवति तत्र मेयत्व विशिष्ट वाधत्वावच्छिन्न विषयत्वावच्छिन्न प्रतिवन्धकता सामा-न्यान्तर्गत मेयत्वविशिष्ट व्यभिचारत्वावच्छिन्न विषयत्वा-वच्छिन्न प्रतिवन्धकतावच्छेदकत्वस्य वाधत्वे ऽसत्त्वेन स्वपदेन मेयत्व विशिष्टवाधत्वस्य धर्त्तुमशक्यतया स्वपदगृहीत मेयत्वविशिष्टव्यभिचारत्वानवच्छिन्नप्रकारता वच्छेदकत्वस्य तत्र सत्त्वान्मेयत्वविशिष्टवाधे ऽतिव्याप्त्यापत्तेः। सिद्धान्तेतु स्वपदगृहीत मेयत्वविशिष्ट व्यभिचारत्वावच्छिन्नाविषयक-

प्रतीतिविषयतावच्छेदकत्वस्य बाधत्वे ऽसत्त्वादतिव्याप्तिव्युदास इति।

एवञ्च स्वावच्छिन्नविषयत्वाव्यापकीभूत विषयताशून्य ज्ञानीयस्वावच्छिन्न विषयत्वव्यापक प्रतिबन्धकतासामान्यं यद्रूपावच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्य ज्ञानीय यद्रूपावच्छिन्न विषयत्वव्यापकं तादृश यत्किञ्चिद्रूपं स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकं यस्य एवम्भूतं पक्षत्वं तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व मिति सत्यन्तस्य निष्कृष्टार्थः॥ १२६॥

अत्र यद्रूपावच्छिन्न विषयतायां स्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्यज्ञानीयत्वमपि निवेशनीयं, अन्यथा गगनाभाववत्सर्व्वरूपबाधे ऽव्याप्त्यापत्तिः। (अवच्छिन्न विशेष्यतानिरूपित गगनाभावत्वावच्छिन्न प्रकारताकत्वेनैव गगनवत्सर्व्वमिति ज्ञाननिरूपित प्रतिबन्धकत्व निर्वचनात्)। गगनाभावत् सर्व्वत्वावच्छिन्न विषयत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदक विषयितानिरूपकतावच्छेदक स्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकगगनाभाववद् घटत्वादिरूप यत् किञ्चिद्रूपकत्वात् स्वपदेनधर्त्तुं शक्यतापाता दिति उक्तनिवेशेतु गगनाभाववद् घटत्वादि विषयताया गगनाभाववत् सर्व्वत्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्यत्वविरहा न्नाव्याप्तिरिति। एवमुक्तनिवेशाकरणे जलव्यापकयद्वयभावसमानाधिकरण जलवद्ध्रदत्वमपि स्व-

पदेनधर्त्तुं शक्यं तादृशवह्न्यभावकालीनजलवद्ह्रदत्वादावपि स्वावच्छिन्नविषयत्वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदकत्वस्य स्वावच्छिन्नाविषयकप्रतीतिविषयता वच्छेदकत्वस्यच सत्त्वादिति। एवञ्च ह्रदे वह्न्यभावः वह्न्यभाववद्ह्रद इत्यादीनां पूर्व्ववदेकरूपेण प्रतिबन्धकत्व कल्पनेऽपि नक्षतिः। नचोक्तविवक्षायामेव यद्रूपावच्छिन्ने लक्षणं संगमनीयं, तद्रूपावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदकत्वेन स्वं विशिष्योपादेयमिति धूमव्यभिचारिवह्निमत्वस्य निरुक्तविशेषणानाक्रान्ततया स्वपदेनग्रहीतुमशक्यतया कथमेतत् कल्पे तदवलम्बनेन दूषणमुद्भावित मितिवाच्यम्। उक्तनिवेशेबाधविशिष्टव्यभिचारत्वादा वतिव्याप्तेरशक्यपरिहारत्वात्। तर्हि स्वपदेन बाधवैशिष्ट्यमादायातिव्याप्ति र्व्वारणीया, उक्तविशेषणदाने धूमव्यभिचारिवह्निमत्त्वस्येव बाधवैशिष्ट्यादेरपि उक्तविशेषणानाक्रान्ततया स्वपदेनग्रहीतु मशक्यत्वात्।

अत्र सत्यन्तार्थानुगमस्तु,—धर्म्मवृत्तिधर्म्मावच्छिन्नाविषयकप्रतीति विषयतावच्छेदकत्वं, वृत्तित्वंच स्वविशिष्ट विषयिताव्यापक प्रतिबन्धकतात्वव्यापकत्व स्वावच्छिन्नाविषयकप्रतीति विषयतावच्छेदकत्व स्वावच्छिन्नविषयत्वाव्यापकीभूत विषयताशून्यज्ञानीयविषयतावच्छेदकत्व एतत्त्रितयसम्बन्धेन प्रतिबन्धकतात्वव्यापकत्वंच स्वविशिष्ट विषयताशालिनिश्चयत्व व्यापकत्व सम्बन्धेन, उभयत्र स्ववैशिष्ट्यं स्वावच्छिन्नत्व स्वावच्छिन्न विषयित्वाव्यापकीभूत

विषयिताशून्य ज्ञानीयत्वोभयसम्बन्धेन ॥ १३० ॥

स्वावच्छिन्न विषयित्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकीभूत यत् किञ्चिद्विषयित्वं यादृश यादृश धर्म्मावच्छिन्नानिरूपितं तादृशधर्म्मावच्छिन्ना विषयकप्रतीतिविषयतावच्छेदकं यत् स्व तद्धर्म्मावच्छिन्नत्वमेवेति भ-टी।

अत्रापि अवच्छेदकताद्वयं पूर्ववदनतिरिक्त वृत्तित्व रूपं ग्राह्यं, पूर्ववद्व्यापकीभूत विषयिताशून्य ज्ञानीयत्वञ्च निवेशनीयम्।

अनुगमस्तु—धर्म्मविशिष्ट धर्म्मवत्त्वं दोषत्वं वैशिष्ट्यञ्च स्वतादात्म्य, स्वविशिष्ट विषयितावृत्तिधर्म्मावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वोभयसम्बन्धेन, विषयितावृत्तित्वञ्च, स्वावच्छिन्न निरूपितत्वसम्बन्धावच्छिन्न स्वतिष्ठावच्छेदकताक प्रतियोगिताक भेदवत्त्व सम्बन्धेन, विषयितायां स्ववैशिषयञ्च स्वविशिष्ट विषयित्वव्यापक प्रतिबन्धकतात्वव्यापक धर्म्मावच्छिन्न निरूपितत्व, स्वावच्छिन्न विषयित्वाव्यापकीभूत विषयिताशून्यज्ञानीयत्वोभयसम्बन्धेन, प्रतिबन्धकतात्व व्यापकत्वञ्च, स्वविशिष्ट विषयिता व्यापकत्वसम्बन्धेन। उभयत्र विषयितायां स्ववैशिष्ट्यं स्वावच्छिन्नत्व स्वावच्छिन्न विषयित्वाव्यापकीभूत विषयिताशून्य ज्ञानीयत्वोभय सम्बन्धेन ॥ १३१

अत्र—तादृशधर्म्मानवच्छिन्न प्रकारतावच्छेदकत्वस्य तादृशधर्म्मानवच्छिन्न विषयितानिरूपकतावच्छेदकत्वस्य वा विवक्षणे यत्राङ्कुरविशेषे मेयत्वविशिष्टव्यभिचार विषयकं ज्ञानं नियतं वाधविषयकमेव जायते तत्र मेयत्व विशिष्ट व्यभिचारेऽतिव्याप्तिः। व्यभिचारत्वावच्छिन्न निरूपितविषियतायाः स्वावच्छिन्नविषयित्वावच्छिन्नप्रति-वन्धकतासामान्यान्तर्गत वाधप्रतिवन्धकतानवच्छेदकत्वेन धर्त्तुमशक्यतया स्वावच्छिन्नविषयितायाः एव यत्किञ्चिद् विषयिता पदेन धर्त्तव्यत्वात्, स्वस्मिन् यादृशधर्म्मान्तर्गत वाधत्वानवच्छिन्नप्रकारतावच्छेदकत्वस्य वाधत्वान-वच्छिन्नविषयिता निरुपकतावच्छेदकत्वस्य वा नपायात्। ममतु यादृशधर्म्मान्तर्गत वाधत्वावच्छिन्नविषयकप्रतीतिविष-यतावच्छेदकत्वस्य स्वस्मिन्नसत्त्वाददोषइति ॥ १३२ ॥

नचवाधत्वावच्छिन्न विषयित्वावच्छिन्नप्रतिवन्धकता-सामान्यावच्छेदकीभूत वाधविषयितायाः वाधादिघटकैक देशवह्नित्वाद्यवच्छिन्नानिरूपितत्वादसम्भव इतिवाच्यं, साक्षात्परम्परासाधारणनिरूपितत्वस्यानुगतत्वाभ्युपगमे उक्त विशिष्ट विषयितायाः अपि वह्नित्वाद्यवच्छिन्नानिरूपितत्व विरहात्। अथवा यादृशधर्म्मावच्छिन्नानिरूपितत्व पदेन यादृशधर्म्मावच्छिन्नविषयकप्रतीतिविषयतानवच्छे-दकावच्छिन्नानिरूपितत्वस्य विवक्षणाददोषः ॥ १३३ ॥

अथवा कल्पे पर्य्यावृत्त्यादिकं पूर्वोक्तरीत्यनु-

सन्धेयं। अनुगमस्तु धर्म्मविशिष्ट धर्म्मवत्त्वं। वैशिष्ट्यं च स्वतादात्म्य स्वविशिष्टविषयतात्वव्यापकत्वोभय सम्बन्धेन। व्यापकत्वं च स्वावच्छिन्न निरूपितत्व सम्बन्धेन। विषयितायां स्ववैशिष्ट्यं च स्वविशिष्टविषयिता व्यापक प्रतिबन्धकतात्वव्यापक धर्म्मावच्छिन्नत्व स्वावच्छिन्न विषयित्वाव्यापकीभूतविषयिताशून्यज्ञानीयत्वोभयसम्बन्धेन। प्रतिबन्धकतात्व व्यापकत्वं च स्वविशिष्टविषयता व्यापकत्वसम्बन्धेन। उभयत्रव्यापकतायां स्ववैशिष्ट्यं स्वावच्छिन्नत्व स्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्य ज्ञानीयत्वोभयसम्बन्धेन॥ १३४॥

तथापि विशेषगुणाभावान् द्वितीयक्षणावच्छिन्नोघटोगुण सामान्याभाववानित्यादि गदाधरः। देशकालाद्यवच्छिन्न धर्मिकस्थले अवच्छेदावच्छेदेन बुद्धिरेव नोत्पद्यते, प्रतिबध्नातिच तत्र सामानाधिकरण्येन बाधादिबुद्धिरपिसामानाधिकरण्येन विशिष्टबुद्धिं। तत्रैक धर्मिणि एकावच्छेदनभावाभावग्रहस्य विरोधितायाएवानुभविकत्वात् इत्यभिप्रायेण द्वितीयक्षणावच्छिन्न इत्यादि स्थलानुसरणं। अथ तथापि पूर्व्वोक्तस्थल एव गुणसामान्याभाववान् घटो विशेषगुणाभाववानिति वैपरीत्येनानुमितौ आश्रयासिद्धिघटित बाधाद्यव्याप्तिसम्भवे स्थलान्तरानुसरणंकिमर्थं तत्र तादृशव्यापकता घटितविशिष्टसमवायेन बाधबुद्धेरपि शुद्धसमवाय घटिताश्रयासिद्धिघटितत्वासम्भवादितिचेन्न, संशयपक्षतावादिनयो

गुणसामान्याभाववान्घटो विशेषगुणवान्नवेति सामग्रयाः संशयस्यासङ्कलनेन तत्र तादृशानुमितेरप्रसिद्धया आहार्य्य स्थलतुल्यत्वात् । विशेशगुणवत्ता बुद्धिं प्रति गुणसामान्याभाववत्तानिश्चयस्यापिप्रतिवन्धकत्वेन गुणसामान्याभावस्य दर्शितसंशयधर्म्मिताबच्छेदकत्वोगमे आहार्य्यत्वप्रसंगः । नहि आहार्य्याकारसंशयं कश्चिदुपैति ॥ १३५ ॥

एतेन स्वावच्छिन्न निरूपित विषयित्वावच्छिन्नयत् किञ्चित् प्रतिवन्धकतावच्छेदक विषयिताक विशिष्ट निरूपित विषयितात्व व्यापकस्वावच्छिन्न निरूप्यताकत्वमितिभट्टो ।

अत्रादि पूर्वोक्तरीत्या सत्प्रतिपक्षेऽव्याप्तिवारणाययत् किंचित्प्रतिवन्धकतावच्छेदकत्वं अनतिरिक्तवृत्तित्वरूपं वाच्यं जलवद्ह्रदत्वावच्छिन्नविषयिता सामान्यावच्छिन्न सत्प्रतिपक्षप्रतिवन्धकतानतिरिक्तवृत्तिजलव्यापक वह्न्यभावसमानाधिकरण जलवद्ह्रदत्वावच्छिन्न विषयितात्वव्यापकत्व जलवद्ह्रदत्वावच्छिन्ननिरूप्यतायां सत्त्वात् दर्शितसत्प्रतिपक्षैकदेशे जलवद् ह्रदेऽतिव्याप्तिरिति (एतेनस्वावच्छिन्ननिरूपित विषयिता सामान्यं यत् किंचित् प्रतिवन्धकतानिरूपित स्वरूपसम्बन्धात्मकावच्छेदकतावदितिनिवेशेपि नास्तिनिस्तारः) तद्वारणार्थं स्वावच्छिन्न विषयित्वावच्छिन्नत्व पदेन स्वावच्छिन्न विषयित्व व्यापकत्वं विवक्षणीयं इति ।

उक्तसत्प्रतिपक्षस्या लक्ष्यत्वे गगनाभाववदभाववत्कालीन घटादेः पक्षत्वे गगनाभाववदभाववत् कालीनघटो गगना

भाववानिति बाधैकदेशे अतिव्याप्तिरूहनीया। अत्र बाध प्रतिबन्धकताया ज्ञानवैशिष्ट्यावच्छिन्नत्वात्, अवश्यकल्पनीयया ज्ञानवैशिष्ट्यावच्छिन्न प्रतिबन्धकतयैवोपपत्तौ स्वतन्त्रबाधप्रतिबन्धकतायां मानाभावादिति। एवंसर्व्वत्र। गगना भाववत् सर्वरूपबाधे अव्याप्तिवारणार्थं यत्किञ्चित् प्रतिबन्धकतावच्छेदकीभूत विशिष्टविषयितायां पूर्व्ववत् स्वावच्छिन्नविषयत्वाव्यापकीभूत विषयताशून्य ज्ञानीयत्वं निवेश्यम्॥

अथ प्रतिबन्धकतावच्छेदकीभूत विषयितायां स्वावच्छिन्न विषयत्वाऽव्यावकीभूत विषयताशून्यज्ञानीयत्वनिवेशे प्रतिबन्धकतायां स्वावच्छिन्नविषयकत्वव्यापकत्व निवेशनमफलं पूर्वोक्तयत्किञ्चित् सत्प्रतिपक्ष प्रतिबन्धकतावच्छेदक विशिष्ट सत्प्रतिपक्षविषयितायां जलवद्ह्रदत्वावच्छिन्न विषयित्वाव्यापकीभूत विषयिताशून्य ज्ञानीयत्व विरहेण तादृशैकदेशे स्वपदेन धर्त्तुमशक्येऽतिव्यातिव्युदाससम्भवादितिचेन्न यत्राङ्कुरविशेषे जलवद्ह्रदविषयकं ज्ञानं नियतसत् प्रतिपक्षविषयकमेव समूहालम्बनंजायते नतु कदाचिदपि सत्प्रतिपक्षं परित्यज्य तत्रसत्प्रतिपक्षैकदेशे जलवद्ह्रदेऽतिव्याप्तिः। मन्मतेतु अभावविशिष्टान्यज्ञानीय (वैशिष्ट्यंचस्वावच्छिन्न प्रतिबन्धकतावच्छेदकत्व स्वप्रतियोयोगिज्ञानविशिष्टत्वै तदुभयसम्बन्धेन ज्ञानवैशिष्ट्यंच सामानाधिकरण्य विशेष्यत्वैतदुभय—तादात्म्यैतदन्यतरसंसर्गेण) स्वावच्छिन्न विषयित्वव्यापकत्वा

प्रतिबन्धकतायां निवेशनीयतया सत्प्रतिपक्षांशेऽप्रामाण्य-ज्ञानास्कन्दित समूहालम्बनज्ञानीय जलवद्ध्रदत्वमात्रावच्छिन्न विषयिताया अभावविशिष्ट ज्ञानत्वेन तज्ज्ञाने सत्प्रतिपक्ष-प्रतिबन्धकताया असत्त्वात्तस्या अभावविशिष्टान्य जलवद्-ह्रदत्वावच्छिन्न विषयत्वव्यापकत्व विरहेण जलवद्ध्रदत्वा-वच्छिन्नेऽतिव्याप्तिव्युदास सम्भवात् ॥ १३६ ॥

अस्यानुगमस्तु प्रकृतानुमिति प्रतिबन्धकता विशिष्ट-धर्म्मवत्त्वं वैशिष्ट्यंच स्वविशिष्टविषयिताव्यापकत्वसम्बन्धा-वच्छिन्नाधेयत्व स्ववृत्तिधर्म्मावच्छिन्न विषयितात्व व्यापकत्वोभयसम्बन्धेन। स्ववृत्तित्वंच स्वविशिष्टविषयिता व्यापकत्वसम्बन्धेन। द्वितीयसंसर्गघटक व्यापकत्वं च स्वावच्छिन्ननिरूपितत्वसम्बन्धेन। उभयत्र स्ववैशिष्ट्यं स्वावच्छिन्नत्व स्वावच्छिन्नविषयत्वाव्यापकीभूतविषयता-शून्यज्ञानीयत्वोभयसम्बन्धेन ॥ १३७ ॥

स्वावच्छिन्नानिरूपितविषयित्वानवच्छिन्ने त्यादि। यद्-यद्रूपावच्छिन्नविषयिता स्वावच्छिन्नानिरूपिता भवति तत्तद्रूपावच्छिन्न विषयिताव्यापक प्रतिबन्धकताभिन्न प्रकृता-नुमितिप्रतिबन्धकता स्वावच्छिन्नविषयित्व व्यापिका इत्यर्थः। अत्रापि पूर्व्वोक्तरीत्या व्यावृत्यादिकं अनु-सन्धेयम् ॥ १३८ ॥

अस्यानुगमस्तु धर्म्मविशिष्ट धर्म्मवत्त्वं, वैशिष्ट्यञ्च स्वतादात्म्य स्वविशिष्ट विषयितानिरूपकतावच्छेदकधर्म्म-

विशिष्टान्य प्रतिबन्धकतावृत्तित्वैतदुभयसम्बन्धेन विषयितायां स्ववैशिष्ट्यञ्च स्वावच्छिन्नानिरूपितत्व स्वावच्छिन्न विषयत्वाव्यापकीभूत विषयताशून्य ज्ञानीयत्वोभय सम्बन्धेन (तेन न गगनाभाववत्सर्वरूपबाधे पूर्वोक्तरीत्या ऽव्याप्ति प्रसङ्ग इति) प्रतिबन्धकतायां धर्म्म वैशिष्ट्यञ्च स्वविशिष्ट विषयिता व्यापकत्व सम्बन्धेन। प्रतिबन्धकता वृत्तित्वञ्च स्वविशिष्ट विषयित्व व्यापकत्व सम्बन्धेन, विषयितायामुभयत्र स्ववैशिष्ट्यं स्वावच्छिन्नविषयत्वाव्यापकीभूत विषयताशून्य ज्ञानीयत्वोभयसम्बन्धेन ॥ १३६ ॥

स्वसजातीय विशिष्टान्तराघटितत्वमेव यत् पदार्थ विशेषणं देयम्, साजात्यञ्च स्ववृत्तिहेत्वाभासविभाजक रूपेणेति। अत्र स्वपदेन लक्ष्यत्वेनाभिमतस्योपादाने मेयत्व विशिष्टव्यभिचारेऽतिव्याप्तिः, व्यभिचारस्य मेयत्वविशिष्ट व्यभिचाराविषयक प्रतीतिविषयत्वाभावेन विशिष्टान्तरत्व विरहात्। अतः स्वपदेन लक्ष्यतावच्छेदकत्वेनाभिमत मुपादाय स्वाश्रयस्वजातीयवृत्ति विशिष्टान्तररूपा घटितत्वमेवार्थो वोच्यः। विशिष्टान्तरत्वंच स्वावच्छिन्ना विषयक प्रतीति-विषयतावच्छेदकत्वं, सजातीयत्वं च स्ववृत्ति (पक्षे साध्यवन्निष्ठावगाहित्वावच्छिन्नप्रतिबध्यतानिरूपित प्रतिबन्धकता, हेतुधर्मिकसाध्यव्याप्यवगाहित्व प्रतिबन्धकता इत्यादि) अन्यतम प्रतिबन्धकतावत्त्वं, वृत्तित्वंच स्वावच्छेदकविषयितानिरुपकतावच्छेदकधर्म्मवत्त्वसम्बन्धेन, प्रतिबन्धकतावत्त्व

ज्ञानेनैव एवञ्च मेयत्व विशिष्ट व्यभिचारादौ नातिव्याप्तिः, अत्रवदन्तिकल्पाभिप्रायेतु स्ववृत्त्यन्यतमाभाववत्त्वं (पक्षे साध्यवैशिष्ट्यावगाहित्वाभाव इत्यादीना मन्यतमः) वृत्तित्वंच स्वप्रयोजकविषयतावत्त्वं। प्रतिबध्यतावच्छेदकधर्म्माभाव प्रयोजकत्वं प्रतिबन्धकतावच्छेदकीभूत विषयतायामनुभव सिद्धमिति। साजात्यघटक हेत्वाभास रूपश्चेदानीं विशिष्टान्तराघटितत्वघटित मभिप्रेतं, अन्यथा व्यभिचारविशिष्ट मेयत्वेऽतिव्याप्ति शङ्काया अनवतारः॥ १४०॥

अथानुयोगिस्वत्वान्तर्भाव कल्पे अत्रवदन्तीत्यादि वक्ष्यमाणलक्षणप्रविष्ट विरोधिविषयताप्रयुक्तत्वदलस्य वैयर्थ्य माशङ्कितं भट्टाचार्येण तन्न समीचीनं यतो यद्विषयकनिश्चयस्य विरोधिविषयिताप्रयुक्त स्तादृशोभयाभाव इति सर्व्वस्यैव वैयर्थ्य सम्भवति उदासीनातिव्याप्तिवारणमात्रप्रयोजकत्वात्तस्येति उदासीनानांच तद्रूपेणसाजात्यविरहादेवनिवृत्तेरितिचेन्न। वृक्षःकपिसंयोगीत्यत्र कपिसंयोगाभाववद्वृक्षेऽतिव्याप्तिः, अव्याप्यवृत्तित्वज्ञानाभावविशिष्ट वृक्षविशेष्यककपिसंयोगाभावनिश्चयस्य वृक्षः कपियोगीतिबुद्धे विरोधित्वात् कपिसंयोगाभाववद्वृक्षवृत्तिबाधत्वरुपहेत्वाभासविभाजकरूप प्रसिद्धेः। अस्माकन्तु अव्याप्यवृत्तित्वभ्रमाभाव विशिष्ट यद्विषयक निश्चयस्य विरोधिविषयता प्रयुक्त स्तादृशोभयाभाव इति रीत्या विशेष्यदलस्यवक्तव्यत्वेन कपिसंयोगाभाववद्वृक्षे तदसत्त्वा न्नातिव्याप्तिः। नच सत्यन्तदलप्रविष्ट बाधत्वादि-

रूप हेत्वाभास विभाजकरूपघटकनिश्चयेषु अव्याप्यवृत्तित्व भ्रमाभाववैशिष्ट्यं निवेश्य विशेष्यदलं विनाप्युक्तातिप्रसङ्ग वारण सम्भवः कपिसंयोगाभाववद्वृक्षवृत्ति उक्तवाधत्वरूप हेत्वाभास विभाजकरूपाप्रसिद्ध्या स्वपदेन तदुपादाना-सम्भवादिति वाच्यं, वाधत्व व्यभिचारत्वादिरूप नाना हेत्वा-भास विभाजकशरीरप्रविष्ट नाना निश्चयेषु अव्याप्यवृत्तित्व ज्ञानानां भ्रमत्वेनाभाव निवेशापेक्षया अव्याप्यवृत्तित्व भ्रमा-भाववैशिष्ट्यं सकृदेव यद्रूपावच्छिन्ननिश्चये निवेश्य विशेष्यदले प्रवेशलाघवात् अथैवं रीत्या विशेष्यदलस्य सार्थक्यं यदि व्यवस्थाप्यके तदा वृक्षः कपिसंयोगी धूमान्यधूमादित्य-त्रोक्तरीत्या कपिसंयोगाभाववद्वृक्षे ऽतिव्याप्तिवारकतया विरोधिविषयताप्रयुक्तत्व दलस्यापि सार्थक्य सम्भवेन तद्वै-यर्थ्याभिधानमसङ्गतमिति चेन्न अव्याप्यवृत्तित्व भ्रमाभाव विशिष्ट यद्विषयकनिश्चयस्य विषयता प्रयुक्त स्तदुत्तरानुमितौ तादृशोभयाभाव इत्येतावन्मात्रस्य विशेष्यदलस्य प्रवेशेनैव सामञ्जस्ये विरोधिपदस्यवैयर्थ्याभिधाने ग्रन्थतात् पर्य्यात् ॥ १४१ ॥

विशिष्टान्तराघटितत्वेनाघटितस्येत्यादि। अत्र धूमवान् अवृत्तिवह्ने रित्यत्र धूमाभाववद्वृत्तिवह्निरूपव्यभिचारत्वस्य व्याप्तिग्रहत्वव्यापक प्रतिवध्यतानिरूपित प्रतिवन्धकता नतिरिक्तवृत्ति विषयिता निरूपकतावच्छेदक धर्म्मवद्वृत्ति वह्निरूप (स्वसजातीय) विशिष्टान्तरहेत्वसिद्धि घटितत्वे-

ऽव्याप्तिरतः साधनग्रहाविरोधित्वं निवेशः। एवं अवृत्तिवह्नि कालीनधूमवान्वह्नेरित्यत्र धूमाभाववद्वृत्तिवह्निरूपव्यभिचारस्वीकरीत्या वृत्तिवह्निरूपस्वसजातीयतापन्न साध्यासिद्धिघटितत्वादव्याप्ति रतः साध्यग्रहाविरोधित्वं निवेशितं।

तदर्थश्च साध्यतावच्छेदक विशिष्ट साध्यग्रहत्वाव्यापकत्वे सति हेतुतावच्छेदकविशिष्टहेतुग्रहत्वाव्यापिका या व्याप्तिग्रहत्वव्यापकप्रतिबन्धकता तन्निरूपिता या प्रतिबन्धकता तदनतिरिक्तवृत्तिस्वावच्छिन्न विषयताक धर्म्म एव व्यभिचारत्व मित्यादिरीत्यापरिष्कार्य्यं। तथाच स्ववृत्ति (निरुक्त प्रतिबन्धकतेत्यादि) अन्यतम प्रतिबन्धकतावत्त्वमेव साजात्यं। वृत्तित्वं प्रतिबन्धकतावत्त्वं च स्वावच्छिन्न विषयिता व्यापकत्व सम्बन्धेन।

अत्र वदन्ति कल्पे तु हेतुधर्म्मिक व्याप्त्यवगाहित्वाभाव प्रयोजकतावृत्ति धर्म्मवत्त्वं व्यभिचारित्वमिति। वृत्तित्वं च स्वविशिष्ट रूपवृत्तित्वसम्बन्धेन रूपेस्ववैशिष्ट्यं च स्वावच्छिन्नविषयित्वसमानाधिकरणाभाव प्रतियोगितावच्छेदकतात्वावच्छिन्न पर्य्याप्त्यनुयोगितानवच्छेदकत्व स्वकालीन साध्यतावच्छेदक विशिष्ट साध्यावगाहित्वाभावप्रयोजकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकत्व स्वकालीनहेतुतावच्छेदक हेत्ववगाहित्वाभाव प्रयोजकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्याप्त्यनुयोगितानवच्छेदकत्वैतत्तितयसंसर्गेण, सम्बन्ध

घटकरूपवृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकवर्य्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन एवं वाधत्वादिकमपि यथायथं निर्वाच्यम् ॥

स्ववृत्तिहेतुधर्म्मिक व्याप्त्यवगाहित्वाभावाधिकरणतापक्षे साध्यावगाहित्वाभावाधिकरणता इत्याद्यन्यतमाधिकरणतावत्त्वमेव साजात्यं वाच्यम्। वृत्तित्व मधिकरणतावत्त्वं च स्वरूपसम्बन्धेन ॥ १४२ ॥

स्ववृत्ति यावद्धेत्वाभास विभाजकरूपेण साजात्यमितिगदाधरः—॥

स्ववृत्ति हेत्वाभासविभाजकरूपत्वव्यापकत्वमित्यर्थः, व्यापकताच स्वरूपसम्बन्धावच्छिन्नाधेयत्वसम्बन्धेन।

ननुतथापि स्ववृत्ति यावद्धेत्वाभास विभाजकरूपेण स्वसजातीय विशिष्टान्तर भूतो यो व्यभिचार स्तद्घटितं यत् यत् स्वं तदन्तर्गतेन धूमव्यभिचारिवह्निमत्त्वेन घटिते धूमाभाववद्धूमव्यभिचारिवह्निमत्त्वे अव्याप्ति रशक्यपरिहारेतिचेन्न तद्घटितत्वपदेन तदवच्छिन्नविषयत्वाव्यापकीभूतविषयताशून्य ज्ञानीयत्वोपलक्षित विषयतावत्त्व तदवच्छिन्न विषयकत्वोभयाभाववत् प्रतीति विषयतावच्छेदकत्वस्य विवक्षणेनोक्ताव्याप्तिवारणात्। उक्तबाधप्रतीतेः तदवच्छिन्नविषयकत्वेऽपि तदवच्छिन्न विषयत्वाव्यापकीभूतविषयताशून्यज्ञानीयत्वोपलक्षित विषयताशून्यत्वेनोभयाभाववत्त्वात्। मेयत्वविशिष्ट व्यभिचारत्वस्य

तद्विषयकज्ञानविषयतावच्छेदकत्वादतिव्याप्तिभिया उपलक्षितान्तानुधावनप्रयासः—॥ १४३ ॥

अथ हेत्वाभास विभाजकरूपाणि यावन्ति तत् प्रत्येकाश्रयीभूत विशिष्टान्तरघटितं यद् यत्स्वं तदघटितीक्तौ न कोऽपि दोषः? वाधविशिष्टव्यभिचारस्यापि स्ववृत्तिवाधत्व व्यभिचारत्वादि प्रत्येकाश्रयीभूत वाधव्यभिचार घटितत्वात्, धूमव्यभिचारिवह्निमद्घटित वाधस्यापि स्ववृत्ति यावद्धेत्वाभास विभाजकरूपान्तर्गत वाधत्वाश्रयीभूतविशिष्टान्तर घटितत्वाभावेन निरुक्तस्वानन्तर्गतत्वात्। नच यावत् प्रत्येक पदयोरनुगमा सम्भवः, धर्म्म विशिष्ट धर्म्मावच्छिन्ना विषयक प्रतीति विषयतावच्छेदकत्वस्यैवानुगमकत्वात्। वैशिष्ट्यं च स्वतादात्म्य स्वाश्रयवृत्ति हेत्वाभासविभाजकरूपत्वव्यापकत्वोभयसम्वन्धेन, व्यापकताच स्वाश्रयवृतिरूपवत्त्व सम्वन्धावच्थिन्नाधेयत्व सम्वन्धेन रूपवत्त्वं च स्वावच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकत्वसम्वन्धावच्छिन्न स्वनिष्ठावच्छेदकताक भेदवत्त्वाधेयत्वोभयसम्वन्धेन। आधेयताच स्वावच्छिन्ना विषयक प्रतीति विषयतावच्छेदकत्व सम्वन्धेन।

मैवं यत्रांकुरविशेषे मेयत्वविशिष्टव्यभिचारविषयकं ज्ञानं नियतं कदाचित् वह्न्यभाववद्ध्रद विषयकं, कदाचिच्च वह्नित्वेन घटाद्यवगाहि वह्न्यभाववद्ध्रदइत्याकारकमेवजायते नत्वनयोरन्यतरमनवगाह्यापि तत्र मेयत्वविशिष्टव्यभिचारेऽतिव्याप्त्यापत्तेः। वाधत्वस्यापि स्ववृत्ति यावद्धेत्वाभास

विभाजकरूपाणां प्रत्येक यावदाश्रय विशिष्टान्तरवाधत्वा वच्छिन्नाविषयकमेयत्वविशिष्टव्यभिचारविषयकवह्नित्वावच्छिन्नघटादिविषयकवह्न्यभाववद्ध्रद इत्याकारकप्रतीतिविषयतानव च्छेदकत्वस्य मेयत्वविशिष्टव्यभिचारत्वे स्वपदेन तान्यादातु मशक्यत्वात्।

वृत्तिनियामकसंसर्गेण तद्वृत्तिमत एव तद्धर्म्मत्वात् आधेयत्वस्य च वृत्त्यनियामकतया तेन सम्बन्धेन कस्यापि धर्म्मत्व विरहात् ॥ १४४ ॥

"तादृशधर्म्मवत्त्वं" तद्रूपावच्छिन्नत्व मित्यादि गादी। साधनादिविशेषणक साध्याभाववद्वृत्तित्वादिविशेष्यक ज्ञानस्य व्याप्त्यादिज्ञान प्रतिवन्धकत्वेऽपि साध्याभाववद्वृत्तित्वादे राधेयतासम्वन्धेन साधनीयत्वादिकं नदोषः, साधनादेः साध्याभाववद्वृत्तित्वादि धर्म्मता विरहादिति ॥ १४५ ॥

अत्र तादृश विशिष्टस्यैवाऽप्रसिद्ध्या न तथा व्यवहार इति भट्टी।

ननु प्रतिवन्धकतावच्छेदक स्वावच्छिन्न विषयिताकधर्म्म विशिष्टात्मकस्य दूषधात्वर्थस्याप्रसिद्ध्या पर्वते वह्नेः साधने धूमो न दुष्ट इति व्यवहारः कथमुपपद्येत? सत्यं तत्र प्रतिवन्धकत्वं दूषधात्वर्थः तस्यच स्वावच्छेदक विषयितानिरूपकतावच्छेदक धर्म्मावच्छिन्न सम्वन्धित्व सम्वन्धावच्छिन्न प्रतियोगिताकत्व सम्वन्धेन, नञर्थाभावेऽन्वयः निष्ठार्थश्चाश्रयत्वं, तथाच तादृशसम्बन्धेन प्रतिवन्धकत्व विशिष्टोयोऽभा-

वस्तदाश्रयोधूमइति समुदितार्थः, सम्बन्धित्वंच स्वज्ञानविषय प्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेनेति सर्वं सुस्थम् ॥ १४६ ॥

अथ पर्व्वतस्य पक्षत्वे पर्व्वतस्य काञ्चनमयत्वविरहो न दोष इति शिरोमणिः—॥ अत्र गदाधरेण पक्षतावच्छेदकाद्यनिवेशे ऽसम्भवमाशङ्क्य किञ्चिद्धर्म्मावच्छिन्न विशेष्यता निरूपित साध्यतावच्छेदकावच्छिन्न प्रकारताशाल्यनुमिति पर्यन्तं निवेश्य निरुक्तातिव्याप्ति सङ्गमनं कृतम्।

अत्रेयमाशंका—काञ्चनमयत्वविशिष्ट पर्व्वतत्वस्यालीकस्य यत् किञ्चिद्धर्म्म पदेनोपादातु मशक्यतया काञ्चनमयत्व पर्व्वतत्वयोरेकतरदेव यत्किञ्चित् पदेनोपादेयं तथाच कातिव्याप्ति सम्भावना, काञ्चनमयत्वाभाववान् पर्व्वत इति निश्चयप्रतिवध्यतायाः काञ्चनमयो वह्निमानित्याद्यनुमिति साधरण्याभावादितिचेन्न। पक्षतावच्छेदकाद्यनिवेशनिवन्धना सम्भववारणार्थं विशेष्यत्वादिष्वेव यत् किञ्चित्त्वं निवेश्यं नतु तदवच्छेदकधर्म्मे अन्यथा काञ्चनमय पर्व्वतपक्षकस्थले काञ्चनमयत्व विशिष्ट पर्व्वतत्वस्याप्रसिद्ध्या उपादातु मशक्यतया काञ्चनमयत्वाभाववत्त् पर्व्वतरूपाश्रयसिद्धावव्याप्तिः।

एवंच निरुक्तविशिष्टस्याप्रसिद्धावपि काञ्चनमयत्व पर्व्वतत्व धर्म्मद्वयावच्छिन्ने विशेष्यतायाः सुप्रसिद्धाया यत् किञ्चित्पदेनोपादातुंशक्यतया निरुक्तविशेष्यतानिरूपितसाध्यतावच्छेदकावच्छिन्न प्रकारताशालि अनुमितित्व व्यापकत्वस्य

काञ्चनमयत्वाभाववत् पर्व्वत इति निश्चयप्रतिवध्यतायां सत्वात् काञ्चनमयपर्व्वतपक्षकस्थले अव्याप्ति विरहः। तथाच निरुक्तनिवेश महिम्ना पर्वतपक्षकस्थले काञ्चनमयत्वाभाववत्पर्व्वते अतिव्याप्ति सम्भवेन सन्दर्भसङ्गतिरवधेया, विशेष्यतायां यत्किञ्चित्त्व निवेशे अनुगमस्तु—विशेष्यता विशिष्ट प्रतिवध्यतानिरूपित प्रतिवन्धकतावच्छेदकीभूत स्वावच्छिन्न विषयताक धर्म्मवत्त्वं, वैशिष्ट्यंच स्वविशिष्टानुमितित्व व्यापकत्वसम्वन्धेन, स्ववैशिष्ट्यं च स्वनिरूपित साध्यतावच्छेदकावच्छिन्न प्रकारताकत्व स्वावच्छेदकावच्छिन्न विशेष्यता निरूपित साध्यव्याप्ति प्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्न विशेष्यत्वाभिन्न प्रकारताकत्वोभयसम्वन्धेन ॥ १४७ ॥

उत्तरपदस्याव्यवहितोत्तरार्थकमिति गादी।

नन्वत्र किन्ताव दव्यवहितोत्तरत्वं? तृतीयक्षणसाधारणं द्वितीयक्षणसाधारणं वा? द्वितीयक्षणमात्रवृत्तित्वे काञ्चनमयह्रदोवह्निमान्गगनादित्यादौ काञ्चनमयत्व व्यापकाभावप्रतियोगिगगनेऽतिव्याप्तिः—निरुक्तनिश्चयोत्तर काञ्चनमयह्रदोवह्निमान् वह्निव्याप्य गगनवांश्चेत्याकारक वुद्धेराहार्य्यतया अनुमितित्वासम्भवेन तदुत्तरानुमितिसामान्ये निरुक्तोभयाभावसत्वात्। काञ्चनमयत्व प्रकारकवुद्धिप्रति काञ्चनमयत्व व्यापकीभूताभाव प्रतियोगि गगनवत्तावुद्धेः ज्ञानवैशिष्ट्यावच्छिन्नप्रतिवन्धकत्वात् निरुक्तसमूहालम्वनवुद्धेरपि अव्य-

वह्नितीत्तरप्राक्क्षणोत्पन्नकाञ्चनमयत्व व्यापकाभाव प्रतियोगि गगनमिति निश्चयविशिष्ट गगनवद्ध्रदत्वावच्छिन्न धर्म्मिकतया तत्प्रतिवध्यीभूत काञ्चनमयत्वप्रकारक ह्रदत्वावच्छिन्न धर्म्मिकतया वा अनाहार्य्यत्वासम्भवात्। इति तृतीयक्षण साधारणमेव तद्वाच्यम्। तथाच निरुक्तनिश्चयनाशक्षणे अनाहार्य्यत्वसम्भवेन तादृशानुमितौ सम्भवन्त्या मुक्तोभयाभाव विरहाददोषइति।

नचैव मुक्तरीतिक्रमेण ह्रदोवह्निमान्जलादित्यत्र वह्नि-व्यापकीभूताभाव प्रतियोगिजलरूपासाधारण्येऽव्याप्तिरिति-वाच्यम्? यद्रूपावच्छिन्नविषयकनिश्चये असाधारण्यविषयकत्व हेतुमत् पक्षविशेष्यता शून्यत्वोभयाभावस्यनिवेशात् असाधारण्यादौच साध्यव्यापकीभूताभावप्रतियोगिहेतुः हेतुमांश्चपक्षइत्याकारक निश्चयमादायैव लक्षणसमन्वयः। नचाव्यापकीभूतविषयता शून्यत्व विरहात्तादृशनिश्चयो लक्षणाघटक इतिवाच्यम् अव्यापकीभूतविषयताशून्यज्ञानीयत्वोपलक्षित विषयताया विवक्षणात्॥ १४८॥

कालाध्वनोरत्यन्तसंयोगे इत्यनेनाधिकरणेद्वितीया इतितु नयुक्तं व्यापकतात्मकस्यात्यन्तसंयोगस्यात्राविवक्षितत्वात्। इति गा० टी०—॥

नन्वत्र व्यापकत्वनिवेशे असम्भवएव स्यात् ततकथमविवक्षितत्वोक्तिः संगच्छते? तथाहि यद्रूपावच्छिन्नविषयक-निश्चयपदेन नानाकालवृत्ति नानानिश्चयबोधनात् तादृश-

निश्चयोत्तर कालस्य नानाकाले सत्वात्, तत्र तत्र कस्या अप्यनुमितिव्यक्तेः रसत्त्वेनानुमितौ निरुक्तव्यापकत्वं बाधितमेव। नच तादृशकालत्वव्यापकत्वं न तादृशकालत्व समानाधिकरण भेदप्रतियोगितानवच्छेदकत्वरूपम्, अपितु तादृशभेदप्रतियोगितावच्छेदकतानवच्छेदकरूपवत्त्वरूपमेव तथाच तादृशानुमितित्ववत्त्वेन न व्यापकत्वाप्रसिद्धि रनुमितिव्यक्तिष्विति वाच्यम्।

तथासति तादृशानुमितित्ववत्त्वेन ह्रदादि पक्षकवह्न्याद्यनुमितेरपि व्यापकतया तत्रच निरुक्तोभयाभावासत्त्वेनाव्याप्तेः (आहार्य्यस्थले लक्षणागमनं) इतिचेन्न, यद्रूपावच्छिन्न विषयकनिश्चयविशिष्टानुमितित्व व्यापकविरोधिविषयताप्रयुक्त निरुक्तोभयाभावइति विवक्षणेनादोषात्। वैशिष्ट्यंच स्वाव्यवहितोत्तरकालत्वव्यापकत्वसम्बन्धेन, तथाच यत्किञ्चिन्निश्चयमादाय लक्षणसमन्वयसम्भवेन नोक्तदोषावकाश इति।

ननु तथापि स्वमते उत्तरपदस्य उत्तरकालीनार्थकत्व पर्य्यन्तानुधावनं विफलं स्वाधिकरणसमयध्वंसाधिकरण समयध्वंसानधिकरणत्वेसति स्वाधिकरण समयध्वंसाधिकरणत्वरूपस्य स्वध्वंसाधिकरण समयध्वंसानधिकरणत्वेसति स्वाधिकरण समयध्वंसाधिकरणत्वरूपस्य वा अव्यवहितोत्तर कालत्वस्यैवानुमितौ सत्त्वात् तद्वृत्तित्वान्तानुधावनस्य निष्प्रयोजनकत्वात् अनुमितेरपिजन्यतया कालोपाधित्वादितिचेन्न यत्र अपेक्षाबुद्ध्यात्मिका पक्षःसाध्यवान् साध्यव्याप्य

हेतुमांश्चेत्यनुमितिः ततोलौकिक सन्निकर्षजन्यवाधनिश्चय-स्तत्र वाधेऽव्याप्त्यायत्तेः तन्निश्चयाव्यहितोत्तरकालात्मका-नुमितौ पक्षे साध्यावगाहित्व साध्यव्याप्यहेतुमत्त्वावगाहित्वो-भय सत्त्वादिति । नच उत्तरकालीनत्व पर्यन्तानुसरणेऽपि तद्दोष तादवस्थ्यं उक्तानुमिते र्वाधनिश्चयोत्तर कालवृत्तित्वादिति-वाच्यम्, उत्तरकालीनेत्यस्य उत्तरकालोत्पन्नपरत्वेन निरुक्तानुमितेरुत्तरकालोत्पन्नत्वविरहादिति।

नन्वत्र निरुक्ताखण्डाव्यवहितोत्तरत्वनिवेशे पश्चादुक्ता-व्यवहितपदस्य उत्तरपदस्य च खण्डशो व्यावृत्तिर्नसंगच्छते? तथाच ग्रन्थसंगत्यर्थं मन्नाव्यवहितोत्तरत्वं स्वध्वंसाधि करणत्वेसति स्वाधिकरणसुखत्वरूपमेववाच्यं एवंच सत्यन्त-दल खण्डने उत्तरत्वस्य स्वाधिकरणत्वखण्डने च अव्यवहि-तत्वस्य व्यावृत्तिः संगच्छते एवञ्चाव्यवहितोत्तरत्वस्यानु-मितौ विशेषणेन पूर्व्वोक्तापेक्षाबुद्ध्यात्मकानुमितौ व्यावृत्ते रसंगत्या वृत्तित्वपर्य्यन्तानुसरणं व्यर्थमेवेतिचेन्न।

काञ्चनमयह्रदो वह्निमान् गगनादित्यादौ काञ्चनमयत्व व्यापकाभावप्रतियोगिगगनादावतिव्याप्तेः—। तादृश निश्चय-द्वितीय क्षणे पक्षे साध्यावगाहि साध्यव्याप्य हेतुमत्त्वावगाह्य-नुमितेरसम्भवात् तृतीयक्षणोत्पन्नायाश्चानुमितौ स्वाधि-करणत्व विरहेणाव्यवहितोत्तरत्वाभावात्—अव्यवहितोत्त-रानुमितिसामान्ये पक्षोभयाभावसत्त्वात् वृत्तित्वविवक्षणेतु द्वितीयक्षणोत्पन्न सुखस्याव्यवहितोत्तरतया तद्वृत्तित्वेन

तृतीयक्षणोत्पन्नानुमितेरपि लाभात्तत्र उभयाभावविरहा द्दोष इति।

वस्तुतस्तु यत्र स्थलविशेषे दोषनिश्चयद्वितीयक्षणे काप्य-नुमितिर्नजायते तत्राव्यवहितोत्तरानुमित्यप्रसिद्धया ऽव्याप्ति-रिति वृत्तित्व निवेशः—। तथाचतादृश्या सुखवृत्तित्वेन तृतीय-क्षणोत्पन्नानुमितिलाभाददोष इति। काञ्चनमयत्वव्यापका-भाव प्रतियोगिगगने अतिव्याप्तेस्तु पाषाणमयपर्व्वते अतिव्याप्तेरिव वारणसम्भवइति ध्येयम्॥ १४६॥

पाषाणमयो नवह्निमानिति ज्ञानसहितस्य पर्व्वतः पाषाण मयइति ज्ञानस्य पर्वतो वह्निमानिति ज्ञानप्रतिबन्धकतया ज्ञानभेदेन विषयताभेदाभावात् पाषाणमयत्वविशिष्ट पर्व्वतादि विषयता सामान्यस्यैव उभयाभावप्रयोजकत्वात् पाषाणमयत्व विशिष्ट पर्व्वतादावतिप्रसंगस्य दुर्वारत्वादिति गा०टी०।

नच प्रकृतेऽपि निर्वह्निपर्वतो वह्निमानात्यादौ पाषाण मयत्ववत्पर्व्वतेऽतिब्याप्ति स्तदुत्तरानुमितयस्तु न निरुक्तरूपाः कदाचिदपि सम्भवन्ति, तादृशज्ञानस्याहार्य्यत्वात्, पाषाण मयत्वावच्छेदेन वह्न्यभाव ज्ञानसहितस्य निरुक्तनिश्चयस्य वह्निमानिति ज्ञानविरोधितया निरुक्तज्ञानीय विषयताया व्यापकाभावप्रयोजकत्वेन व्याप्याभावप्रयोजकत्वस्याक्षतत्वा दिति वाच्यम् विरोधिविषयिताप्रयुक्तत्वं अनुमितित्वव्यापक त्वञ्च उभयाभावाधिकरणतायामेव प्रकृतलक्षणे निविष्टं तथाच पाषाणमयो न वह्निमानिति निश्चयविशिष्ट पाषाण मयत्ववत्

पर्वतविषयक निश्चयोत्तरजात घटानुमिति निष्ठोभयाभावाधिकरणतायामेव पाषाणमयत्ववत् पर्वतत्वावच्छिन्न विषयता प्रयोज्यत्वस्य स्वीकरणीयतया तादृशनिश्चया समान कालीन पाषाणमयत्ववत् पर्वत विषयक निश्चयोत्तरजात घटाद्यनुमितौ विरोधिविषयता प्रयुक्तोभयाभावाधिकरणताया असत्त्वेन व्यापकताभंगात् अतिव्याप्त्यनवकाशादिति ॥ १५० ॥

विशिष्टान्तर विषयत्वाप्रयोज्य स्वविषयताप्रयोज्यतादृशोभयाभाव प्रयोजकाभावाधिकरणताकत्वरूपं तादृशविशेषणं बोध्यमिति—गा० टी०।

पर्व्वतो धूमवान्वह्नेरित्यत्र सामानाधिकरण्येनधूमस्य साध्यतायां मेयत्व विशिष्ट व्यभिचारेऽतिव्याप्तिः—धूमाभाववत्पर्व्वत इति भ्रमोत्तरानुमितिसामान्यनिष्ठोभयाभाव प्रयोजकत्वस्य पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायामपि सत्त्वेन तत्र व्यभिचारत्वरूप विशिष्टान्तर विषयित्वा प्रयोज्यत्व सत्त्वेन च व्यभिचारस्य बाधादिरूप विशिष्टान्तरस्यचाप्रसिद्धया मेयत्वविशिष्ट व्यभिचारत्वस्य विशिष्टान्तर विषयित्वाप्रयोज्य तादृशोभयाभावाधिकरणताकत्वेन स्वपदोपादान शक्यत्वादिति तद्वारणार्थं स्वविषयता प्रयोज्येति।

तथाच पक्षे साध्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां स्वविषयताप्रयोज्यत्व विरहान्नातिव्याप्तिः।

अत्र स्वविषयतात्व व्यापकरूपावच्छिन्न प्रयोज्यत्वमपि निवेश्य, मन्यथा धूमव्यभिचारिवह्निमान् धूमवानित्यत्र

धूमव्यभिचारिवह्निमत्त्वेऽतिव्याप्तिः, तस्य तादृशोभयाभाव प्रयोजक यत्किञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्ना प्रयोज्य पक्षे साध्यवैशिष्ट्यावगाहित्वाभावधिकरणताप्रयोजक-त्वात्। तन्निवेशे च वाधमात्रे निरुक्तरूपावच्छिन्नविषयताया एव प्रयोजकत्वादव्यापकतयानिरास इति।

नच पक्षे साध्यावगाहित्व साध्यव्याप्यहेतुमत्त्वावगा-हित्वैतदुभयाभाव प्रयोजकोयस्तदधिकरणताकत्वरूपविशिष्टा-न्तराघटितत्व निवेशेनैव सम्यक्त्वे अभाव पदंव्यर्थमिति-वाच्यम्। मेयत्वविशिष्टव्यभिचारेऽतिव्याप्तेः, विरोधिविषय-यत्वाधिकरणताविधया तादृशोभयाभाव प्रयोजक मेयत्व-विशिष्ट व्यभिचारविषयकस्मृतिनिष्ठमेयत्वविशिष्टव्यभिचार-विषयित्वाधिकरणतायाः संस्कारीय मेयत्वविशिष्टव्यभिचार विषयिता प्रयोज्यत्वस्य शुद्धव्यभिचारविषयक संस्कारेणतादृश स्मृत्यजननात्—विशिष्टान्तरव्यभिचारविषयितात्वव्यापकरूपा-वच्छिन्न विषयित्वाप्रयोज्यस्यापिच सत्त्वेन तस्य स्वपद-ग्राह्यत्व सम्भवात्। अभावपदोपादाने चाभावाधिकरणतात्वेन प्रयोजकतालाभाददोष इति। नच तादृशोभयाभाव प्रयोज-काभावनिरूपितोयस्तत्कत्व मेवोच्यतां किमधिकरणतात्व रूपेणाधिकरणतानिवेशेनेतिवाच्यम्। पर्व्वतोवह्निमान् पक्षे-साध्यवैशिष्ट्यावगाहित्वाभावादित्यादौ मेयत्वविशिष्टवह्न्य-भाववद्वृत्ति पक्षे साध्यवैशिष्ट्यावगाहित्वाभावरूपव्यभिचारे-ऽतिव्याप्तिः, तादृशस्मृतिनिष्ठतादृशविषयितायां उभयाभाव

प्रयोजकाभावनिरूपितायां पूर्ववत् तादृशसंस्कारीय तद्विषयताप्रयोज्यत्वस्य विशिष्टान्तरविषयित्वाप्रयोज्यत्वस्य-चसत्त्वादिति ॥ १५१ ॥

स्वविषयिताप्रयोज्यविशिष्टान्तरविषयित्वाप्रयोज्यइत्यादि-भटी। अत्र विशिष्टद्वयाघटितत्व निवेशोनास्ति ज्ञानविशिष्ट ज्ञानत्वेन प्रतिबन्धकतास्थले विशिष्टद्वयविषयितायां प्रयोज-कताद्वयमिति उभयाभाव प्रयोजकाभावधिकरणतायां जलवद्-ध्रदादिरूपविशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्नविषयता-प्रयोज्यत्वान्नवह्न्यभाववज्जलवद्वृत्तिजलवद्ध्रदादावतिव्याप्तिः। अथैव मसाधारण्येऽव्याप्तिः तादृशाधिकरणतायां हेतुमत् पक्षरूपविशिष्टान्तरप्रयोज्यत्वस्य सत्त्वात् इति चेन्न विशिष्टान्तराघटितत्वपदेन विशिष्टान्तरविषयितात्वव्यापक रूपानवच्छिन्न स्वविषयितानिष्ठ प्रयोजकतानिरूपित प्रयोज्य-तावन्निरुक्तोभयाभाव प्रयोजकाभावाधिकरणताकत्वस्य विवक्षितत्वान्नदोषः, एवंच ह्रदेऽवच्छेदावच्छेन वह्नेः साध्यता-स्थले सामानाधिकरण्येनबाधरूपविशिष्टान्तरघटिते अवच्छे-दावच्छेदेनबाधेऽव्याप्ति रित्यपि परास्तम्। सामानाधिकरण्ये-नबाधरूप विशिष्टान्तर विषयितानिष्ठ प्रयोजकत्वाभिन्नाया अवच्छेदावच्छेदेन बाधविषयितानिष्ठ प्रयोजकताया विशि-ष्टान्तरतादृशबाधविषयितात्वव्यापक रूपानवच्छिन्नत्वात्। नचैवं गगनाभाववद्भाववत्कालीन घटोगगनाभाववानि-त्यादिबाधेऽव्याप्ति स्तत्रावश्यक्लृप्त ज्ञानवैशिष्ट्यावच्छिन्न

प्रतिबन्धकतयैव सामञ्जस्ये ज्ञानवैशिष्ट्यानवच्छिन्नः बाध प्रतिबन्धकत्वान्तरेमानाभावेन ज्ञानद्वयविषयीभूततादृशविशिष्ट विषयिताद्वये पूर्ववत् प्रयोजकताद्वयस्वीकारस्य आवश्यकत्वादिति वाच्यम् ? तत्र अप्रामाण्यज्ञानानामनुगतरूपेणोत्तेजकत्व कल्पनासौकर्यार्थं ज्ञानवैशिष्ट्यानवच्छिन्न बाधप्रतिबन्धकतायाः आवश्यकत्वात् । वस्तुतस्तु सामानाधिकरण्येनबाधः घटिते अवच्छेदावच्छेदेनबाधस्थले असाधारण्ये गगनाभावत्वमावत्कालीन गगनाभाववद्घटरूप बाधप्रभृतिषु अव्याप्तिवारणार्थं स्वस्वविषयिता प्रयोज्य तादृशोभयाभाव प्रयोजक तत्तदभावाधिकरण व्यक्तीनां एकैकाधिकरणता व्यक्तिमादाय तत्तदधिकरणताव्यक्तिभिन्न स्वविषयता प्रयोज्य विशिष्टान्तरविषयित्वप्रयोज्य तादृशाधिकरणताभिन्न स्वविषयिता प्रयोज्याधिकरणताकत्वरूपं विशिष्टान्तरघटितत्वं वाच्यम् इतिनिरुक्तस्थलेषु तत्तदधिकरणतामादाय यथायथं लक्षण समन्वय इति नाऽव्याप्तिशंकालेशोपि एवञ्च गगनाभाववत् सर्वरूपबाधे नाव्याप्तिसम्भावना । अन्यथा गगनाभाववत् सर्वविषयितायाः गगनाभाववद् घटविषयितायाश्चैक्येन गगनाभावत्वावच्छिन्नप्रकारतानिरूपितावच्छिन्नविशेष्यतात्वेन प्रयोजकत्वात् स्वविषयिता प्रयोज्याभावाधिकरणतायां विशिष्टान्तर विषयितात्व व्यापकरूपावच्छिन्नप्रयोज्यत्वात् तत्राव्याप्तेः सर्वथानुद्धरत्वात् ॥ १५२ ॥

यत्किञ्चिद्विशिष्टान्तर विषयितात्वव्यापकरूपावच्छिन्ना

प्रयोज्यत्व निवेशेन तत्संग्रह सम्भवादिति—गा० टी० ॥

अत्र यत्किञ्चित्त्वानिवेशे व्यभिचारविषयित्वादेरप्यव्यापकत्वंस्यात्, बाधत्वादेरपि विशिष्टान्तरत्वादिति—अनुगमस्तु — स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकताविशिष्टान्यतादृशाधिकरणताकत्वं, वैशिष्ट्यंच स्वावच्छिन्नविषयितात्वव्यापकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिप्रयोजकतानिरूपित प्रयोज्यतावत्त्वसम्बन्धेन। प्रयोजकतायां रूपवृत्तित्वंच स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्य्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन ॥ १५३ ॥

यत्किञ्चिद्विशिष्टान्तरविषयितात्वव्यापकरूपावच्छिन्न तादृशबाधादिविषयितानन्तःपाति व्यभिचारादि विषयिता प्रयोज्यत्वनियमात्तत् संग्रहाय तादृशोभयाभाव प्रयोजकाभावाधिकरणता पर्य्यन्त निवेशः ॥ गा० टी० ॥

उभयाभावाधिकरणतायां विशिष्टान्तरविषयित्वाप्रयोज्यत्वनिवेशेव्यावृत्तिरियं, उभयस्य साध्यव्याप्तिवैशिष्ट्यहेतुमत्ताघटिततया साध्यव्याप्तिवैशिष्ट्याभावस्याप्युभयाभावप्रयोजकत्वमेकाभाववत्तथाप्युभयाभावप्रयोजकत्वं एकाभाववत्तयाप्युभयाभावप्रयोजकत्वादिति हृद्यम् ॥ १५४ ॥

तादृशोभयाभाव प्रयोजकविषयितावत्त्वं यद्रूपविशिष्टविषयकत्वव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यस्यसम्यक्त्वे यथासन्निवेशे न वैयर्थ्यम् इति गा० टी०।

अथैतादृश विवक्षणे पाषाणमयत्ववत्पर्व्वते ऽतिव्याप्तिः ज्ञानभेदेऽपि समानाकारकज्ञानीय विषयिताया ऐक्येन पाषाणमयत्वप्रकारता निरूपितपर्वतत्वावच्छिन्नविशेष्यताया अपि तादृशोभयाभावप्रयोजकविषयतारूपतया व्यापकत्वेन कथमुक्तं यथासन्निवेशे न वैयर्थ्यमिति। पूर्व्वत्र तु विरोधिविषयिता प्रयुक्तो भयाभावव्यापकत्व विवक्षया निवारिता अत्रतु तन्नास्तयेवेति चेन्न, निरुक्तप्रयोजकतावच्छेदकतात्वावच्छिन्नः प्रतियोगितावकपर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्तिनिरूपकताकाधिकरणत्वं यद्रूपावच्छिन्न विषयित्वव्यापकमित्यर्थे तात्पर्य्यात् तादृशाधिकरणतायाश्च केवलपाषाणमयत्ववत् पर्व्वत विषयक ज्ञाने ऽसत्त्वात् विशिष्टाधिकरणताया वैलक्षण्यात्, पाषाणमयोनवह्निमानिति ज्ञानसहित निरुक्तज्ञानीय विषयितात्वेनैववा पाषाण मयत्ववत्पर्व्वत इतिज्ञानीयविषयितायाः प्रयोजकत्वात्।

नचैवं प्रयोजकतैक्यात् वह्न्यभाववज्जलवद्वृत्ति जलवद्ध्रदे ऽतिव्याप्तिरितिवाच्यम्, विशिष्टद्वयोघटितत्व निवेशनैव तद्वारणमिति ॥ १५९ ॥

नच ह्रदोन वह्निमान् इतिनिश्चयानन्तरं जायमाने ह्रदोद्रव्यं जलमया वह्निमानित्याकारक समूहालम्बने इत्यादि—गा० टी॥

नच समूहालम्बनानुमितौ ह्रदमात्र प्रवेशे एव जलमयस्यह्रदत्वेन ज्ञायमानत्वसम्भवे द्रव्यपर्यन्तनिवेशनंव्यर्थमितिवाच्यम्, निर्व्विधेयकानुमितेरसम्भवात् सविधेयकत्व

सम्पत्तये तत् प्रवेशात् जलमयह्रदयो र्विशेषण विशेष्यभावेतु नेष्टसिद्धिरितिमन्तव्यम् ॥ १५६ ॥

तस्य घटादि निश्चयस्य विरोध्यविषयकत्वादिति गा॰ टी॰ अथघटादि विषयताया स्तादृशोभयाभाव प्रयोजकाभावाधिकरणताप्रयोजकत्वविरहादेव नातिव्याप्तिसम्भावना किं विरोधिविषयिताप्रयुक्तत्व निवेशनप्रयोजनमिति चेन्न प्रतियोगिनि स्वत्वं निवेश्य स्वविषयित्वप्रयोज्य: विशिष्टान्तर विषयवित्व प्रयोज्योभयाभाव प्रयोजकाभावाधिकरणताकं यद्दयत्तदन्यत्वरूप विशिष्टान्तराघटितत्वं वाच्यम्। तथाचोदासीने घटादावतिव्याप्तिवारणाय विरोधिविषयिताप्रयुक्तत्वदलसार्थक्यम्। निरुक्ताभावाधिकरणताकं यद्दयस्त्वं तदन्यत्वस्य विवक्षणे घटाद्यतिव्याप्ति सम्भवात्। नचानुयोगि स्वत्वमेवान्तर्भाव्यतां किं विरोधिविषयताप्रयुक्तत्वोपादानेनेतिवाच्यम् यथा सन्निवेशे वैयर्थ्याभावात्। यद्वा पाषाणमयत्ववत्पर्व्वतेऽतिव्याप्तिवारणार्थमेवविरोधिविषयताप्रयुक्तोभयाभावे तादृशानुमितित्वव्यापकतानिवेशस्यावश्यकत्वान्नवैयर्थ्य मिति ॥१५७॥

नक्षति र्न साध्यवत्पक्षे ऽतिव्याप्ति रिति—गा॰ टी॰॥ अथ स्वानन्तरोत्पन्नज्ञाने प्रतिबध्यतावच्छेदक धर्म्माभावस्य स्वीयप्रतिबन्धकतावच्छेदकविषयताप्रयोज्यत्वनियमात् कथं सिद्धावतिव्याप्तिः सम्भवति, यतः सिद्धिप्रतिबध्यतायां विधेयत्वस्यैवावच्छेदकविधया प्रवेशस्यावश्यकतया निरुक्तप्रकारताघटितोभयाभावस्य तत् प्रयोज्यत्वासम्भवात् सिद्धि-

प्रतिबध्यतायां प्रकारत्वस्यावच्छेदकत्वे वह्निमान् पर्वतइति सिद्ध्युत्तरं वह्निमत्पर्वतो घटवानित्यनुमितेरपि अनुदय प्रसङ्गः। विधेयत्वघटितोभयाभाव विवक्षायान्तु निर्व्वह्निपर्व्वते वह्नि विधेयकत्वमेवाप्रसिद्धं तच्च प्रत्यक्षएव सम्भवेन विधेयत्व घटितत्वासम्भवादितिचेन्न, यत्राङ्कुरविशेषे यत्सिद्ध्युत्तरं तत्प्रकारकं ज्ञानं कदापि न जातं तत्रत्यसिद्धि प्रतिबध्यतायां लाघवतस्तत् प्रकारताया एवावच्छेदकत्वस्वीकारा त्तत्रैवा तिव्याप्ति र्बोध्या। विधेयत्वंच अवच्छेदकतानात्मक प्रकारत्वं ॥ १५८ ॥

साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपितपक्षतावच्छेदक विषयतावहिर्भूत विषयिताया वा विवक्षितत्वादिति गा०टी० ॥

साध्यतावच्छेदकावच्छिन्न प्रकारतानिरूपित पक्षताव-च्छेदकावच्छिन्न विषयित्वावच्छिन्न प्रतियोगिताकभेदप्रति-योगितानवच्छेदकविषयिताविरोधिविषयिता इति भावः। निरुक्तविषयिताभिन्नत्व मात्रोक्तौ साध्यविषयिताया अपि तथात्वापत्तेरिति। अथ तथापि पर्व्वतो वह्निमान् वह्न्यभावा-दित्यत्र वह्निमत् पर्व्वतरूपस्वरूपासिद्धावव्याप्तिः, तद्विषयिताया अपि साध्यविशिष्ट पक्षविषयितात्वेन निरुक्तलक्षणानाक्रान्तत्वादिति चेन्न, विरोधि विषयिता पदेन साध्यवत्पक्षविषयितात्व पक्षधर्म्मिक हेतुमत्त्वावगाहित्वो भावप्रयोजकीभूतविषयताभिन्नत्वोभयाभाववद्विषयित्वस्य विव-क्षणेन, निर्दोषत्वसम्भवादिति ॥ १५९ ॥

यद्रूपावच्छिन्नांशे यद्रूपावच्छिन्नवैशिष्ट्यावगाहित्वं निविष्टमित्यादि—गा० टी० ॥ निरुक्तविरोधिविषयत्वस्यानुगमस्तु, निरुक्तोभयाभाव प्रतियोगितावच्छेदक विशेष्यता-विशिष्ट प्रकारतावत्त्वं विरोधि विषयत्वं। वैशिष्ट्यं स्वावच्छेदकावच्छिन्न विशेष्यतानिरूपितत्व, स्वावच्छेदकावच्छिन्न विशेष्यतानिरूपित प्रकारतावच्छेदकधर्म्मवत्त्वोभय सम्बन्धेन। धर्म्मवत्त्वञ्च स्वावच्छिन्नत्व स्वावच्छिन्न व्याप्यत्वावच्छिन्नत्वान्यतर संसर्गेण ॥ १६० ॥

निश्चयत्वं च विशेषण विशेष्यतावच्छेदकभावानापन्न विरोधिकोटिद्वयप्रकारकैकधर्म्मविशेष्यकज्ञानान्य ज्ञानत्वं गाटी।

अस्यानुगमस्तु प्रकारता विशिष्ट प्रकारताशालि ज्ञानान्य ज्ञानत्वं, वैशिष्ट्यं च स्वनिरूपक ज्ञानीयत्व, स्वावच्छेदक धर्म्मावच्छिन्न विरोधितावच्छेदक धर्म्मावच्छिन्नत्व, स्वनिरूपित विशेष्यतावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकरूपवृत्ति विशेष्यतानिरूपितत्वैतत्त्रितय सम्बन्धेन। वृत्तित्वं च स्वावच्छेदकतात्वावच्छिन्न प्रतियोगिताक पर्य्याप्त्यनुयोगितावच्छेदकत्व सम्बन्धेन।

नचैवं ह्रदोवह्निमान् वह्न्यभाववद्ध्रदादित्यादौ तादृशनिश्चयाप्रसिद्धिरितिवाच्यम् वह्निव्याप्य वह्न्यभाववद्ध्रदवान् ह्रदोवह्निमानिति ज्ञानस्यैव तादृशस्य प्रसिद्धत्वात्। अत्रच विशेष्यतावच्छेदकवैषम्यात्तथात्वमिति भाव्यम्। वस्तुतस्तु विशेष्यता वच्छेदकतायाः पर्य्याप्तिर्ननिवेश्या स्वनिरूपकज्ञानीयत्वमपि वैशिष्ट्यघटकसंसर्गतया निवेश्यम् ॥ १६१ ॥

भ्रमान्यवृत्ति यदीयविषयितासामान्यं तादृशनिश्चया-
वृत्ति ।—वक्ताभिधानस्य ग्रन्थकाररीति विरुद्धत्वादिति, गाटी।
अथात्र यत्र पर्व्वतत्वसामानाधिकरण्येन निर्व्वह्नित्वा-
वगाहि निर्व्वह्निः पर्व्वतो वह्निमानिति ज्ञानं तत्र पर्व्वतत्व
सामानाधिकरण्येन वह्निमत्त्वस्य दोषत्वापत्तिः भ्रमान्यवृत्ति-
तादृश विशिष्टविषयिता सामान्यस्यैव निरुक्तनिश्चया
वृत्तित्वात् पक्षे साध्यवैशिष्ट्यावगाहित्वज्ञानस्य नियतमेव
भ्रमत्वात्। उक्त ज्ञानस्याहार्य्यतया तादृशविशिष्टविषयक
निश्चयोत्तरानुमितिसामान्यएव पक्षेसाध्यवैशिष्ट्यावगाहित्वा
भाववत्त्वाच्चेतिचिन्त्यं।

नच निर्व्वह्निः पर्व्वतोवह्निमान् वह्निमांश्चपर्व्वतइति ज्ञानं
न विरोधिकोटिद्वयप्रकारकं सामानाधिकरण्येनभावाभावपतनात्
तथाच निरुक्तनिश्चयस्य तादृशत्वेन तत्र भ्रमान्यवृत्तित्वोपलक्षित
वह्निमत्पर्व्वतविषयताया वृत्तत्वाददोषइतिवाच्यम् तत्तदभाव
प्रकारकज्ञानमात्रस्यैव विरोधिकोटिद्वयप्रकारकज्ञानपदेन विव-
क्षणीयत्वात् नतु सम्वन्धविशेषान्तर्भावेन तदुक्तुं शक्यतइति।

सम्वन्धविशेषान्तर्भावेन तस्य वक्तव्यत्वे स्वावच्छेदक-
सम्वन्धावच्छिन्न प्रतिवध्यता निरूपित प्रतिवन्धकतावच्छेदक-
सम्वन्धावच्छिन्नत्वमेव विरोधिप्रकारतायां वाच्यमिति तथाच
निर्वह्नित्वावच्छेदेन वह्नेः साध्यत्वे नियताहार्य्यत्वेन तग्ज्ञानस्या
प्रतिवध्यतया स्वावच्छेदक निर्वह्नित्वव्यापक वह्निप्रतियोगिक-
संयोगसम्वन्धावच्छिन्न प्रतिवध्यत्वाप्रसिद्ध्या तत्र विरोधि-
कोटिद्वयप्रकारक ज्ञानमप्रसिद्धं तादृशनिश्चयस्यापि तथात्वं
सम्पादयतीतितत्रत्यदोषेऽव्याप्तिः। स्वावच्छेदक धर्म्मावच्छिन्न
प्रतिवध्यतानिरूपित प्रतिवन्धकतावच्छेदकसम्वन्धावच्छिन्न-
त्वस्य तत्र निवेशेतु सर्व्वत्रैव सम्भवन्तः सर्व्वे सम्वन्धा

लभ्यन्तइति विवादस्थलेऽपि सामानाधिकरण्येन भावा... पतनस्याकिञ्चित् करत्वमिति।

गुरुचरणास्तु—सम्बन्धप्रकारसाधारण भ्रमत्वस्य... गततया तत्तद्भ्रमान्यत्वं निवेशनीयमिति सामानाधिकर... निर्वह्नित्वाविशेषित पक्षधर्मिकं सामानाधिकरण्येन वह्नि... मवगाहमानस्य भ्रमस्य भेदो न निविश्यते, तथाच त... भ्रमान्यवृत्ति तद्विषयिताया स्तादृशनिश्चयवृत्तित्वमक्षुण्णमेवं... नदोषत्वापत्तिः। नचैवमपि तत्र सामानाधिकरण्येन साध्य... स्थले वाधेऽव्याप्तिरितिवाच्यम् तदानीं वह्निव्याप्यधूमव... निर्व्वह्निः पर्व्वतइत्यंशएवभ्रमत्वेन भ्रमान्यवृत्ति विषय... सामान्यस्य निश्चयावृत्तित्वादिति। तदानींनिश्चयस्य ता... त्वरक्षायै वाधविषयकनिश्चये [कर्त्तव्ये][वह्निव्याप्य धूमवत्व... धर्म्मितावच्छेदकत्वेनप्रवेश ध्रौव्यादितिप्राहु रन्यदूहनीयम्।

यद्वा तदानीं निश्चयस्य तादृशत्वरक्षायै वह्निमन्निर्वह्निपर्वते वह्न्यभाववत्त्व पतनमावश्यकं तथाच विषयताभेदः सुतरामेवेति। तद्भ्रमभेदानिवेशएव निर्द्दोषत्वसम्भवः। एतत्कल्पे निर्वह्निः पर्वतो वह्निमानित्यत्र निर्व्वह्नित्वावच्छेदेन वह्न्यभाववत्त्व-रूपवाधे लक्षणसंगतिश्चिन्त्या।

वह्निमान् वह्निव्याप्यधूमवान् निर्व्वह्निः पर्वतो, वह्न्यभाव-वाश्चं निर्वह्निरिति निश्चयस्य विरोधिकोटिद्वय प्रकारत्वेऽपि विशेष्यतावच्छेदकतापर्य्याप्त्यनुयोगितावच्छेदकरूप वैलक्षण्येन तादृशतया निरुक्तवाधविषयताया भ्रमान्यवृत्तित्वोपलक्षितायास्तत्र वृत्तेश्चेति। नच विशेष्यता वच्छेदकताया न्यूनवारक पर्य्याप्त्यनिवेशा न्निरुक्तनिश्चयस्य तादृशत्वव्याघात् इतिवाच्यम् तथासति नीलपर्वतो वह्निमान् धूमान्यधूमवानित्यादौ नीलपर्वत त्वावच्छेदेनतत्सामानाधिकरण्येन वा वह्नेः साध्यतायां पर्वतत्व

नाधिकरण्येमवह्न्यभाववत्वस्य दोषताप्रसंगात्। पर्वतो-
भाववानिति निरुक्तनिश्चयसहितस्य साध्यवैशिष्ट्यादि
कसमूहालम्बन निश्चयस्यातादृशत्वेनदर्शित भ्रमान्यवृत्ति
ता सामान्यस्यैव तादृश निश्चयावृत्तत्वात्॥ १६२॥

तथाच धर्म्मिभेदान्नवैयर्थ्यमिति—।

अत्रान्यतमस्यैव हेत्वाभासलक्षणत्वम्। तादात्म्येनच
येतरभेदानुमापकत्वं उचितमिति। हेतुतावच्छेदके ऽन्यो-
भावस्य तद्धर्म्मातिरिक्तत्वेऽपि सामानाधिकरण्यानपायात्
र्मभेदादित्युक्ति संगतिश्चिन्तनीया॥ १६३॥

अधिक विकाशतया विशेषण सार्थक्यमिति—। अधिक-
देशावृत्तितयेत्यर्थः। तद्धर्म्मत्वस्य निरुक्तनिरूपकतावच्छेद-
कत्वाव्यापकतया इतियावत्। स्वव्यापक साध्यव्याप्यताव-
च्छेदकधर्म्मान्तरघटितत्वमेववैयर्थ्यं निर्वाच्यम्। नतु स्व-
सामानाधिकरण्य घटितमितिहृदयम्। अन्यथा द्रव्यं गुण
कर्म्मान्यत्वे सति समवेतादित्यादावपि व्यर्थविशेषण घटि-
तत्वेन हेतोर्दुष्टत्वापत्तिः, हेतुघटक गुणत्वस्य साध्यव्याप्य-
तावच्छेदकत्वात्—समवेतत्व सामानाधिकरण्याच्च। व्यापकत्व
निवेशेच समवेतत्वाव्यापकत्वाद् गुणत्वस्यादोषइति। एवंरीत्या
पूर्वत्रापि सार्थक्यसम्भवेन ग्रन्थसंगति श्चिन्तनीया॥ १६४॥

तथाच निर्वह्नित्व विशिष्टविशेष्यतानिरूपित वह्निनिष्ठ-
प्रकारतानिरूपकत्वस्य तादृशविशेष्यतानिरूपित।या वह्नि-
प्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारता
तन्निरूपकत्वस्यच द्वयोरभावप्रयोजक भ्रमान्यवृत्ति विषयता-
निरूपकवान् इति अन्वयबोधइति—गा० टी०।

अत्रवदन्तिकल्पदूषण प्रसङ्गोक्तरीत्यात्रापि निर्वह्नि भाववानित्यादि विषयतायास्तादृशोभयाभाव प्रयोज कथमिदं संगच्छते इति चेन्न। परेतु कल्पोक्तस्य प्र वच्छेदकत्व प्रत्यासत्त्या प्रतिवध्य प्रतिबन्धकभावस्य प तस्येदानी मादरणीयत्वात् तथाच न निरुक्तस्थलेऽपि प्र प्रयोजक भावविरहइति।

अथावच्छेदावच्छेदेन प्रतिवध्यत्वादिस्थले विशेष्यता-च्छेदकव्यापकत्वघटित संसर्ग निवेशस्यावश्यकतया वि ष्यतावच्छेदकानन्तर्भावेन ..धवमाविष्कुर्वाणानां तेषामेव मतं कथं परिष्कृतमित्युच्यते, इतिचेत्? न। अवच्छेदावच्छेदेन प्रतिवध्यत्वादिस्थले वह्निमत्त्वबुद्धेः स्वीयप्रकारतावच्छेदक-संसर्गतानिरूपित संयोगत्व निष्ठावच्छेदकतानिरूपितप्रते-योगिकत्वनिष्ठावच्छेदकतानिरूपितवह्निनिष्ठावच्छेदकतानिरूपि-तव्यापकत्वनिष्ठावच्छेदकतानिरूपितावच्छेदकता समानाधि-करणविशेष्यतावच्छेदकत्वसम्बन्धेनप्रतिवध्यत्व मित्यादिरीत्या यथायथं प्रतिवध्यप्रतिवन्धकभावः कल्पनीयइति।

व्यवहारौपयिक लक्षणस्य निर्दुष्टत्वोपपत्तये निरुक्तक्रमेण परिष्कृतायाः परेतु कल्पोक्त प्रतिवध्य प्रतिवन्धकभावरीतेरुप-गमे इतरभेदानुमापनाय तावदन्यान्यत्वरूपगुरुतरस्य[illegible] लक्षणप्रयाससाफल्यं चिन्त्यम्। तयैवरीत्या इतरभेदानुमापक-लक्षणस्यापिसम्भवादिति ॥ १६५ ॥

समाप्ता।